Digitization by Arya Samaj Charitable Foundation, Chennai

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS.

No. 10

(PART II)

THE

SIDDHĀNTA RATNA

ERNMENT SANSKRIT LIBRARY,

BENARES.

1927.

251

Price, Rs. 2-12-0.]

Saleable at half of the printed pri

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

VID

1103

251

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS

No. 10

(PART II)

289

EDITED BY

GOPĪ NĀTHA KAVIRĀJA

THE

SIDDHĀNTA RATNA

Printed by

JAI KRISHNA DASS GUPTA,

at the Vidya Vilas Press,

Gopal Mandir Lane,

Benares City.

1927.

Saleable at half of the printed price.

Digitization by Arya Samaj Charitable Foundation, Chennai

Bharatiya Vidya Bhavan's Sri Sankaracharya Vidyapeetham

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीबलदेवविद्याभूषणविरचितं

सिद्धान्तरत्नम्

(सटीकम्)

THE

SIDDHĀNTA RATNA

(WITH COMMENTARY)

OF

BALADEVA VIDYĀBHŪṢAṆA

EDITED WITH INTRODUCTION ETC

BY

GOPINATH KAVIRAJ, M. A.,

PRINCIPAL, GOVERNMENT, SANSKRIT COLLEGE,

BENARES.

Bharatiya Vidya Bhawan's Sri Sankaracharya Jyoti
289

Digitization by Arya Samaj Charitable Foundation, Chennai

Pāñcharātra and Bhāgavata traditions which formed the nucleus of his teachings,one may trace in them the influences, direct or remote, of later Mahāyānic and Tāntric (of Tripura Sunadrī School) Cults.

II

Baladeva was born in a Khaṇḍayat Vaiśya family of cultivators at a village near Remuṇā in the Baleswar Subdivision of Orissa. He studied Bhakti S'āstra with one Vairāgī Pītāmbara Dāsa, who had been his 'Veśaguru'. He was known in the society of Vaiṣṇavas as Govinda Dāsa or Govinda Ekāntī. He received Māntric initiation however from a Kanojia Brāhmaṇa named Rādhā Dāmodara Dāsa, the author of Vedānta Syamantaka,to whom he often refers in his works†. His spiritual pedigree from Nityānanda is shown in the following table:

(1) Nityānanda
|
(2) Gaurīdāsa Pandit (disciple)
|
(3) Hṛdaya Chaitanya (,,)
|
(4) S'yāmānanda (,,)‡
|
(5) Rasikānanda Murāri (,,)
|
(6) Rādhānanda (son and disciple)
|
(7) Nayanānanda (son of 6 & disciple of 5)
|
(8) Rādhā Dāmodara (disciple)
|
(9) Baladeva Vidyābhūṣaṇa (,,)

---

writer elsewhere. See his 'Gauḍīya Vaiṣṇava Darśana' (in Bengali), in progress of publication in the Uttara (Lucknow).

† Cf begining of his Commentary on the Chhandah Kaustubha ; Siddhāntaratna, 8th pāda,

‡ He is said to have received Grace from Jīva Gosvāmī late in life.

Digitization by Arya Samaj Charitable Foundation, Chennai

Among Baladeva's disciples the names of Nanda Miśra and Uddhava Dāsa are well known. Baladeva was probably a contemporary of Mahāraj Jai Singh II of Jaipur and made himself famous by his memorable controversy with the Rāmānuji Vaiṣṇavas of the Galta Valley. He lived up to the third quarter of the 18th century, the date of his commentary on Rūpa Gosvāmī's Stavamāla being S'aka 1686 or 1764 A. D.

The present author is known to have been the writer of numerous works, some of which have been published. The following is a list of some of his writings:–

1–2. Sāhityakaumudī and its Commentary, called Kṛiṣṇānandinī.
3–4. Govinda Bhāṣya on the Brahma Sūtras & its Commentray Sūkṣmā.
5-6. Siddhāntaratna & its Commentary.
7. Kāvyakaustubha.
8. Commentary on the Gītā (Gitabhūṣaṇa).
9. Commentary on Chhandah Kaustubha of his Guru Rādhādāmodara.
10-11. Prameyaratnāvalī & its Commentary called Kāntimālā.
12. Com. on Stavamālā of Rūpa Gosvāmī.
13. Com. on Rūpa's Laghu Bhāgavatāmṛta.
14. Nāmārtha śuddhi, Commentary on Sahasranāma.
15. Com. on Jayadeva's Chandrāloka.
16. Siddhāntadarpaṇa.
17. Com. on Tattvasandarbha.
18. Com. on Rūpa's Nāṭakachandrikā.

Besides the above he commented on some of the important Upaniṣads.

Digitization by Arya Samaj Charitable Foundation, Chennai

III

It is not possible to sum up here the contents of Baladeva's work, nor to furnish an exhaustive account of S'rī Chaitanya's religio-philosophical teachings. But it may be of interest to the general reader to point out in this connection some of the characteristic features of the Bengal School of Thought.

(1) The doctrine of the so-called "Fifth Puruṣārtha" would seem to stand out as conspicuous in the whole system. The Supreme End of human life has been conceived elsewere as Mokṣa or Liberation from the shackles of Matter, attainable by means of Knowledge. Though the conception of saving Knowledge differs in every system it is everywhere assumed that nothing but the light of true Knowledge is really capable of rooting out Saṃsāra which has its origin in Ignorance. The place of Karma is generally held to be a subordinate one. Leaving out the Kāmya Karma which can at best lead to Heaven (which is a perishable state), the higher type of Karma also is unable by itself to secure immunity from the round of mundane existence. The best it can effect is to purge the mind and render it fit to receive the Light. The Bengal Vaiṣṇavas however look down with contempt on the Ideal of the so-called Mokṣa as an End worthy of pursuit. The question of Heaven is of course out of the point. They hold that the true End of Man is Bhakti or Divine Love--Love, which is an End in itself and not a means to an end as in several earlier systems. It appears to the Beatified Soul as सेवानन्द, the Joy of Divine Servitude, which forms the fifth or Transcendent Puruṣārtha. It is a unique

Digitization by Arya Samaj Charitable Foundation, Chennai

doctrine, of which we meet with faint adumbrations in some of the stotras of the Kashmiri S'aivas and also in the Vīra S'aiva Literature. The Vallabha School being almost contemporary is not considered here.

(2) Bhakti or Love is not a mental mode. It is free from desire & is always pure and fresh. As soon as it manifests itself, all desires, even for Liberation, vanish. It is the Essence of Hlādinī and Saṃvit S'aktis combined; and with it there is a keen longing for God and cessation of every other desire. As Hladinī and Saṃvit represent the Essence of the Lord in its active form or Power (स्वरूपशक्ति), it is intelligible how Divine Love partakes of the nature of God Himself. Its potency is infinite. It is able in a sense to control the Divinity Itself (भगवद्वशीकारः). It is eternal and exists eternally on the Eternal Plane in the Eternal Comrades & Servants of the Lord. But it comes down from time to time on the lower planes through the succession of His Bhaktas. This shows that no amount of personal exertion is capable of generating it. It can be had only as a free gift from the Bhaktas. Love pertains to God as His essential and inseparable attribute (अपृथग्विशेषण) & to the Bhakta as an extrinsic & separable attribute (पृथग्विशेषण). But it enhances the Delight of both. Hence through it God Himself, essentially infinitely joyous, gets as it were an excess of joy, and realises the Joy of His own Nature and causes His Bhaktas to participate in it. Bhakti is thus of the nature of Bliss which is an End in Itself. As it is inseparably connected with God, its object, viz. God, is also sometimes spoken of as the End.

Digitization by Arya Samaj Charitable Foundation, Chennai

Being essentially Ānanda, Bhakti cannot be reduced to Action. But when its shows itself in the body it appears as identified with body, senses, etc. and at that time it looks like Action. To a worldly man therefore cursed with the taint of Saṃsāra it reveals itself at first as Action, and through continued practice appears in its pure Essence as Divine Joy with the cessation of Saṃsāra. This will explain why even the liberated souls never cease to cherish it.

Bhakti is two fold–as साधन (Means), which is Divine Service (भगवत्सेवा), and as फल (End), which is Divine Love.

(3) This Bhakti is to be distinguished from pure Jñāna, though it is itself a variety of it. Jñāna is of two kinds–viz. (i) Jñāna proper, Realisation of the two padārthas, *Tat* and *Tvam*, and (ii) Vijñāna, which is known as Bhakti. (i) Meditation on pure त्वम्पदार्थ results in the attainment of the position of तत्पदार्थ, but no Divine Grace (प्रसाद). The fruit of this is Kaivalya. But the knowledge of pure तत्पदार्थ enables one to secure His Grace. The fruit is Sālokya and the other forms of Mukti. In both cases scriptural knowledge is the spring of action (प्रवृत्ति) and is described as the means (द्वार). (ii) But Bhakti or Vijñāna induces not only His Grace but also His subjection (वशीकार). Its fruit is neither Kaivalya, which the devotee never aspires after as being a state of 'self-loss', nor the Muktis viz. Sālokya and the rest which are tainted with selfishness in the form of personal desire (काम) and personal enjoyment (भोग), but the abounding Joy resulting from His Service. This is the true End of Man. The Vidyā, which

Digitization by Arya Samaj Charitable Foundation, Chennai

is often laid down in the S'rutis as leading to the Realisation of the Supreme End of Man, is this Vijñāna of (i.e.Bhakti towards)the Supreme Self as to His Essence and Attributes preceded by a knowledge of the Individual Self.

(4) The Lordship of God is of two kinds,considered from the stand point of Majesty (ऐश्वर्य) or Fellowship (माधुर्य). Hence Jñāna and Bhakti, having the nature of the Lord as their object, are each twofold.

(a) Majesty (ऐश्वर्य) means manifestation of God's Supreme Power (पारमैश्वर्य) independently of His activity as a human being (नरलीला).

(b) Fellowship (माधुर्य) is non-transgression of the limitations involved in नरलीला,whether Supreme Power is manifest or not.

To explain–when God descends as a human being and takes on all the limitations which such a descent implies, He does not as a rule go beyond those self-inposed limitations but behaves exactly as a man. This represents माधुर्य. But when He shows Himself as the Lord, as when He showed His Universe–form to Arjuna (cf Gītā XI), even though His form may happen to be human, it represents ऐश्वर्य.

Knowledge of ऐश्वर्य is naturally different from that of माधुर्य. For instance,when the Jīva realises that the object of his worship is the Supreme Lord possessed of infinite power, he feels awe (सम्भ्रम) and respect (आदर) in His Presence. This feeling tends to slacken or weaken his individual character which may be वात्सल्य,or सख्य or माधुर्य. But when the Lordship of God is not recognised by the worshipper but only His Sweetness & Fellowship, the

Digitization by Arya Samaj Charitable Foundation, Chennai

Jīva feels at home in the presence of God & his personal character remains intact.

The devotee who is attached to माधुर्य has also the knowledge that the object of His worship is the Supreme Lord, but it is only a secondary Knowledge which does not in any way interfere with the working of his personal nature. This Knowledge which rises only occasionally strengthens in a sense his भाव or feeling. He feels a sense of Delight at the fact that his Son, or Friend or Beloved is the Lord of the Universe.

The view of certain critics that the people of Braja were lowest among Bhaktas, as they had no knowledge of the Lordship of the object of their worship and that they realised Mokṣa only when they recognised His Lordship (महिमा),is therefore erroneous. माधुर्यं is as much a characteristic of Brahma as ऐश्वर्य, so that the Knowledge of माधुर्य has every right to be treated as Brahmajñāna. We can not affirm that ऐश्वर्य is real as it pertains to the nature of Brahma, and that माधुर्य is not real as it is assumed in the human form through Māyā to show Mercy to men. The people of Braja were possessed of both the types of Brahmajñāna, but they were specially attached to माधुर्य only. And it was for this reason that they were adored by Brahmā, Uddhava and others*.

---

* Rūpa Gosvāmī appears to deny ऐश्वर्यज्ञान to the people of Braja: यदैश्वर्यज्ञानशून्यत्वादेषां रागे प्रधानता । Baladeva says that this is meant to show that they did not feel respect and awe in the presence of Kṛṣṇa and *not* to show that they had no ऐश्वर्यज्ञान at all.

Digitization by Arya Samaj Charitable Foundation, Chennai

(5) That Divine Wisdom is two fold has already been mentioned. Knowledge (ज्ञान) being a means to Bhakti, it is intelligible how Bhakti too is of two kinds.

(a) The first is the so-called विधिभक्ति. Of the Bhaktas who attain to Perfection (सिद्धि) along this path, some are द्रुत,'bold',who are capable of self-exertion. They realise the Supreme State along the अर्चिरादि or Devayāna path. But those who are आर्त्त, 'helpless' are the objects of His special Grace. As they are resigned & devoid of the power of self-exertion, God Himself takes care of them. They have not to travel by the Devayāna path. They are carried up by God Himself on His own conveyance (वाहन) at His sweet Will to His Divine Mansion (धाम).

(b) The second is रूचिभक्ति, otherwise known as राग. These Bhaktas, who look upon God as their Beloved, are dearest to Him & are also carried up by Himself.

(6) But what is the nature of the Supreme Self whose knowledge is deemed indispensable for the realisation of the summum bonum of human life ? The neo-Vaiṣṇavas describe it,exactly as their predecessors in the field have done, as essentially Intelligence and Joy. The Divine Person (विग्रह) is identical with the Divine Essence (स्वरूप). In the Supreme Unity which the Godhead represents there is absolutely no distinction between Essence and Attributes. Intelligence Power, Lordship are only different names employed to indicate the same Essence. It is called 'Person' (विग्रह) in view of Its eternally manifest character (व्यक्ति). The Divine Body,if we may use the term 'Body' in this

Digitization by Arya Samaj Charitable Foundation, Chennai

sense, is therefore Eternal, Spiritual and Supernatural. It is not material Sattva,however pure, as some* aver. Brahma is the technical name given to this Essence or Person of God (भगवान्). His qualities, e.g. Will Power (सत्यकामत्व), etc. on one hand and Intelligence, Joy (ज्ञान, आनन्द), etc. on the other, are infinite in number & identical with His Essence.

(7) The question may arise: if in the Supreme Unity of Divinity there in no room for distinction, so that Attributes or Qualities,and Person are all identical with Substance, how is the use of dualistic language, i.e. the employment of terms which imply some sort of dualism in thought (e. g. the sixth case-ending in phrases like 'His Body,' 'His Attributes,'etc),to be justified ?The Gauḍīya School answers this question, saying that the use of dualistic terms is due,on the analogy of (जलकल्लोल) waves of water, to the exigencies of language. Cf Br. Sut. 3-2-28.

(8) Like the great S'aṅkarāchārya, the Gauḍīya School also denies threefold distinction (viz. सजातीय, विजातीय and स्वगत) in Brahma which is thus an absolutely homogeneous Substance. But It possesses an Ineffable and Inscrutable Power (अचिन्त्यशक्ति)

---

* This is evidently the view of the S'rī Vaiṣṇavas, who regard S'uddha Sattva as the Body of the Lord. But it must be remembered that they distinguish S'uddha Sattva from the natural Sattva of Sāṅkhya and hold it to be supernatural (अप्राकृत). As to whether it is material or spiritual there is a difference of opinion among themselves. Cf- Tattvatraya.

Digitization by Arya Samaj Charitable Foundation, Chennai

by virtue of which It retains Its Unity & yet appears as Many, so that different words which are not synonymous are used for It even by the Wise. This multiple appearance is not therefore an instance of **स्वगतभेद**. The Power is technically known as **विशेष** which is thus described : **यत्र भेदाभावो भेदकार्यं च प्रमिते तत्रैव भेदप्रतिनिधिर्विशेषः कल्प्यते.** From this it is clear that the function of this Power, which is in fact the **स्वभाव** of the Lord (**स्वभावस्तु विशेषात्मा**), is to exhibit the same Substance as different. It is to be distinguished from **भेद** which means real difference. Thus the difference of God, Soul and Prakṛti which are really separate entities is due to **भेद**, while the difference of God and His Bodies and Qualities which are in reality identical is due to **विशेष-निर्भेदेऽपि तत्त्वे भेदव्यवहारो विशेषबलात्*** ।

---

*The Vaiṣṇavas assert that the assumption of a Power like this Viśeṣa is indispensable for the S'āṅkara School as well, as otherwise in the scriptural statements like **विज्ञानमानन्दं ब्रह्म**, etc. the words **विज्ञान, आनन्द**, etc. are bound to be synonymous with each other & therefore tautological, all representing the same Essence, viz. Brahma. Another defect following from non-admission of Viśeṣa in Brahma would be the difficulty of explaining why Pure Consciousness being always self-revealed (**साक्षात्कृत, भात**) as the Substrate of Cosmic Illusion, Eternal Joy which from this point of view is identical with Pure Consciousness, is not manifested during mundane existence.

These objections hold good against Neo-Vedānta which maintains **विज्ञान, आनन्द**, etc. as synonymous. The old School however is an advocate of lakṣaṇā, asserting

Digitization by Arya Samaj Charitable Foundation, Chennai

(9) The Supreme Lord is vested with infinite power, of which three only are familiar to us, viz. स्वरूपशक्ति, तटस्था शक्ति and मायाशक्ति. The स्वरूपशक्ति, otherwise

---

that the words विज्ञान, आनन्द, etc. are not synonyms, because they signify attributes (विज्ञानत्व, etc.) which are mutually different. Hence the object of the denotative function (अभिधा) of words is the Qualified Brahma, i.e. Consciousness as qualified by the attributes referred to above. Pure and indivisible Consciousness, the Naked Essence,-is never directly reached by words (वाच्य), but is meant through implication (लक्ष्य). The defect in this view is that what is never denoted by any word cannot be an object of implication. The stock example--सोऽयं देवदत्तः—will serve as an illustration. Even if lakṣaṇā is admitted in Brahma the relation between वाक्यार्थ (i. e. Unity) and the purified or attributeless पदार्थ must be either difference (भेद) or identity in difference (भेदाभेद). In that case the वाक्यार्थ or Unity would certainly be false, because everything other than, but superimposed on, Brahma is necessarily false. Now if there is no विशेष in the Essence it is difficult to explain why the Unity is not revealed in the Essence which is self-luminous Absolute Consciousness. In other words, though Pure Brahma is self-luminous & is One, the Unity does not manifest itself. This shows that Pure Brahma is not subversive of the illusion of difference, while the manifestation of Unity is. Pure Brahma and Unity are however the self-same thing. Hence it is pointed out that though the Essence (तत्त्व) is identical, the difference in function cannot be explained except by an appeal to विशेष.

Digitization by Arya Samaj Charitable Foundation, Chennai

known as चित्शक्ति, is the Spiritual Power which exhibits purely spiritual existences. It is called अन्तरङ्गा or Esoteric, because it is identical with the Lord. The तटस्था or जीवशक्ति is the Power which creates limited & imperfect spiritual monads or souls (जीव). The मायाशक्ति is the Exoteric (बहिरङ्गा) Material Power which creates Matter & material phenomena. All these Powers combined form the Supreme Power (परा शक्ति) of the Almighty. The Esoteric or Spiritual Power of God has three attributes–Sandhinī, Saṃvit & Hlādinī, corresponding to the three aspects of the Divine Essence, viz. Sat, Chit and Ānanda. Sandhinī is that by which God, Himself of the nature of Being, holds existence & lends it to others. Through this He pervades all time, space and substace. Through Saṃvit S'akti God realises Himself as conscious and awards the power of consciousness to others. Similarly, though God is Himself Joy (आनन्द-स्वरूप) He realises this through His Hlādinī S'akti & imparts it to others.

(10) The world and the differences apparent therein are real. The Soul too is equally real & persists beyond the Sphere of Māyā as an eternal spiritual Atom. Its so-called bondage is its investment with the particles of Matter. The manifestation of the Universe is an instance of Pariṇāma, and not of Vivarta, and in this light the Brahmasūtras are explained in the School.

The above will suffice, I hope, to give one a fair idea of the nature of 'Chaitanya's religio-philosophical teachings. For a fuller study however the reader may consult with advantage, besides the works already mentioned, the following modern tracts-'Jaiva Dharma', 'S'rī S'rī

Digitization by Arya Samaj Charitable Foundation, Chennai

Chaitanya S'ikṣāmṛta'and 'Mahāprabhu: his life & teachings' by Kedarnath Datta Bhaktivinod. It will appear that I have studiedly avoided in this brief review any allusion to the Doctrine of Divine Sport (लीलावाद), specially as it was taught by S'rī Chaitanya Deva, as it is too intricate a subject for proper appreciation by the rational faculty of man. To the mystic consciousness purged of its impurities by devotion and resignation, the secrets of Divine Sport reveal themselves spontaneously.

GOPINATH KAVIRAJ

Digitization by Arya Samaj Charitable Foundation, Chennai

पादसूची

पादसंख्या	पादनाम	विषय	पृष्ठाङ्काः
१.	प्रथमः पाञ्चजन्यपादः	परमपुरुषार्थोपायनिर्णयः	१-६४
२.	द्वितीयः कौमोदकीपादः	भगवदैश्वर्यादिनिर्णयः	६५-१२५
३.	तृतीयः सुदर्शनपादः	विष्णुपारम्यनिर्णयः	१२६-१६८
४.	चतुर्थः तार्क्ष्यपादः	विष्णोः सर्ववेदवेद्यत्वनिर्णयः	१६९-२०१
५.	पञ्चमः वामनपादः	केवलाद्वैतनिरासः	२०२-२११
६.	षष्ठः त्रिविक्रमपादः	विधान्तरेण केवलाद्वैतनिरासः	२१३-२९८
७.	सप्तमो नन्दकपादः	केवलानुभूतिव्युदासः	२९९-३२४
८.	अष्टमः पञ्च पादः		३२५-३५१

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीविष्णुपुराणेऽप्येतदभिप्रेत्याह श्रीमान् पराशरः —"जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः। ब्रह्मा भूत्वाऽथ जगतो विसृष्ट्यै संप्रवर्त्तते ॥ सृष्टं च पात्यनुयुगं यावत् कल्पविकल्पना। सत्त्वयुग्भगवान् विष्णुरप्रमेयपराक्रमः ॥ तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः। मैत्रेयाखिलभूतानि भक्षयत्यतिभीषणः" इति ॥ १९ ॥

तत्रैव रेवतं प्रति ब्रह्मा चैवमाह—"यस्य प्रसादादहमच्युतस्य भूतः प्रजासृष्टिकरोऽन्तकारी। क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः परस्तात् ॥ मद्रूपमास्थाय सृजत्यजो यः स्थितौ च योऽसौ पुरुषस्वरू-

---

जुषन्निति। अत्युग्रपुण्यवता जीवेन रजोगुणं जुषन् तमाविश्य। ब्रह्मा भूत्वेति। तथा तादृशेन तेन द्वारा तमोद्रेकी (?)रुद्रो रूपं यस्य स रुद्ररूपी। रुद्रतयाविश्येति च व्याख्येयम्। भक्षयति संहरतीत्यर्थः ॥१९॥

उक्तमर्थं ब्रह्मवाक्येन पुष्णाति तत्रैवेत्यादिना। यस्य सर्वेश्वरस्य विष्णोः। प्रकटार्थमन्यत्। साक्षाद्विष्णुरेव कदाचिद्ब्रह्मा रुद्रश्च भवति यदि योग्यो जीवो न लभ्यते। योग्यजीवलाभे तु तं तमाविश्य स च स च भवतीति विष्णुपुराणे सिद्धान्तः। तत्र प्रथमः पक्षो ब्रह्मा नारायणाख्योसावित्यादिना दर्शितः। द्वितीयस्तु जुषन् रजोगुणं तत्रेत्यादिना। एवमेव संक्षिप्तभागवतामृते श्रीरूपचरणैर्निर्णीतम्—युगकोटि-

289

Digitization by Arya Samaj Charitable Foundation, Chennai

षी। रुद्रस्त्वरूपेण च योऽत्ति विश्वं धत्ते तथानन्तवपुः समस्तम्" इत्यादिना । तदेवं समाभ्यधिकशून्यत्वात् पारमैश्वर्य्यं श्रीविष्णौ सिद्धम् । तत्साम्यदर्शिनस्तु दोषः स्मर्य्यते—"यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनाभिजानाति स पाषण्डी भवेद् ध्रुवम्" ॥ २० ॥

यत्तु भारतान्तर्गतौपमन्यवाख्याने श्रीकृष्णेन जाम्बवतीपुत्रार्थं तपसा रुद्रः समाराधितः, रुद्राङ्गेभ्यः सवि-

---

सहस्राणि विष्णुमाराध्येत्यादि । पद्मभवपक्षे दोषमाह यास्त्विति । पाषण्डी वेदबाह्यः । पुनस्त्रैलोक्यधातृत्वमाप्तवानिति शुश्रुमः—'मया सृष्टः पुरा ब्रह्मा मद्यज्ञमयजत् स्वयम् । ततस्तस्य वरान् प्रीतो ददावहमनुत्तमान् ॥ सत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव च । विश्वरूपो महादेवः सर्वमेधे महाक्रतौ । जुहाव सर्वभूतानि स्वयमात्मानमात्मना ॥ महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव । विश्वांल्लोकान् व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान् कृत्तिवासा' इत्येभिर्महाभारतवाक्यैः कर्मलब्धैश्वर्य्यकीर्त्तनाच्च तयोर्जीवत्वम् । एवं पाञ्चरात्रे च—'यो मोहाद्विष्णुमन्येन हीनदेवेन दुर्मतिः । साधारणं सकृद्ब्रूते सोऽन्त्यजो नान्त्यजोऽन्त्यज' इति । हीनेन विष्ण्वपेक्षया निकृष्टेन ॥ २० ॥

ननु रुद्रोऽपि विष्णुना नियम्य इति न संभवति, रुद्रपारमैश्वर्य्यसाधने कृष्णवक्तृकस्यौपमन्यवाख्यानस्य जाग-

Digitization by Arya Samaj Charitable Foundation, Chennai

ष्णूना देवानामुत्पत्तिरिति स्मरणात् पारमैश्वर्यं रुद्रस्य दुर्निवारमित्यज्ञाः कल्पयन्ति, तदतीव स्थूलम्। पूर्वोक्त-श्रुत्यादिभ्य एव रुद्रः खलु बाणयुद्धे भगवता पराभूत-स्तुष्टाव च मूलभूतं तं मोहितश्च मोहिनीवेषेण तेन मोचित-श्च वृकक्लेशादितो ब्रह्मवधपातकाच्चेति स्मरणाच्च ॥२१॥

तस्मात् स्वेतरेषु सर्वेषु सकामेषु रुद्रोपासना स्थे-

रूकत्वात् । श्रीहरिवंशेऽपि शक्रेण सह युद्धार्थी कृष्णो रुद्रमेवं तुष्टाव–'अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चाति-वीराः । त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्व-मीड्य' इति ॥ तस्मादुभयोरभेदेन तौल्येन वा भाव्यम् । रुद्रस्यैव पारमैश्वर्यं तु साम्प्रतमिति चेत्तत्राह यास्विति । निरस्यति तदतीव स्थूलमिति । तत्र हेतुः पूर्वोक्तेति । बाणेति ॥ बाणयु-द्धपराभवादिकं श्रीभागवतादौ ख्यातम् । वृकः शकुनेः पुत्रः । आदिपदात् त्रिपुरयुद्धे रुद्ररथस्य पतनं तस्य वृषभवपुषा भग-वता पुनरुत्थापनं रुद्रे बलार्पणं च कृतमिति हरिवंशे विहितम् । ब्रह्मवधेति । रुद्रो ब्रह्मणः पितुः शिरश्चिच्छेद । तत्कपालं रुद्र-स्य लस्य लग्नं बहुतीर्थस्नानेनाऽपि न पपात । विष्णुप्रसादात्तु स्फुटिततत्कपालः स विशुद्धिमवापेति मात्स्ये प्रसिद्धम् । कर्मा-धीनैश्वर्यं च भारतोक्तं तस्य जीवत्वे लिङ्गं पुरोक्तम् । वराप्तं भूतपतित्वमनपहतपाप्मत्वं च तत्त्वे लिङ्गं वक्ष्यामः ॥२१॥

ननु विष्णुरेव चेत् सर्वेश्वरस्तदोपमन्यूपाख्या कथं संगता य-

Digitization by Arya Samaj Charitable Foundation, Chennai

म्ने मे स्वकीयस्य तस्य तथाराधनं ख्यापयंस्तदन्तर्यामिणमात्मानमसौ सत्करोतीति मन्तव्यम् । "अहमात्मा हि लोकानां विश्वेषां पाण्डुनन्दन । तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम् ॥ मया कृतं प्रमाणं हि लोकः समनुवर्त्तते । प्रमाणानि हि पूज्यानि ततस्तं पूजयाम्यहम् ॥ न हि विष्णुः प्रणमति कस्मैचिद्विबुधाय च । अत आत्मानमेवेति ततो रुद्रं भजाम्यहम्" इति नारायणीये भगवद्वाक्यादेव ॥ २२ ॥

त्र विष्णो रुद्राराधकता समधिगता, तत्राह तस्मादिति । स्वकीयस्य स्वभक्तस्य । यथोग्रसेनादेः सत्कारस्तत्प्रतिष्ठायै तथैष द्रष्टव्यः । अहमित्यर्जुनं प्रति कृष्णवाक्यम् । आत्मा प्रवर्त्तकोऽन्तर्यामीत्यर्थः । आत्मानं रुद्रमिति रुद्रावेशिनं स्वामित्यर्थः । न त्वहमित्यादिपद्यत्रयान्तराले योऽसौ रुद्रः सोऽहमस्मीत्यादिना रुद्रस्य स्वाभेद उक्तः स कथं संगच्छेतेति चेत् । देवताबान्धवाः सन्तः सन्त आत्माहमेव चेत्यादिवत् प्रेमानिमित्तकः स इति गृहाण । साधुमात्रेषु चेत्तस्य तन्निमित्तकः सः किमुत साधुशिरोमणौ रुद्रे इति सन्तोष्टव्यम् । अन्यथैतौ तौ विबुधश्रेष्ठावित्यादिपूर्ववाक्ये तवान्तरात्मेत्याद्यन्तिमवाक्ये च तस्य तन्नियम्यत्वोक्तिर्व्याकुप्येत । मया कृतं प्रमाणं हीत्युत्तरत्र लिखिष्यामः । न हि विष्णुरिति । 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येक' इति श्रुतेः २२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र विश्वेषामन्तर्याम्यहमतस्तत्रायःपिण्डवदविविक्तं रुद्रावेशिनं मदंशमहं पूजयामि । रुद्रादयो देवाः पूज्या इति प्रमाणं मया कृतं तदन्यथा व्याकुप्येत, तदर्थमहं तान् पूजयामि । स्वोत्कृष्टस्याभावादेव तद्बुद्ध्याहं न कश्चिद्भजामि, किन्तु तादृशं मदंशमहं भजामीति विस्फुटम् । ब्रह्मरुद्रादिसर्वान्तर्यामी विष्णुरिति तत्रैव रुद्रं प्रत्युक्तं ब्रह्मणा—"तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्"इति ॥ २३ ॥

तस्मात् स्वभक्तस्य रुद्रस्य सकामेषूपासनाद्दृढता-

वाक्यार्थं संगमयति—अत्रेति । विष्णोरुद्राद्यन्तर्यामित्वं चरमवाक्येन प्रस्फुटयति तवान्तरात्मेति । एतेनैव—न ते गिरिशाखिललोकपाल विरिञ्चैवकुण्ठसुरेन्द्रगम्यम् । ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्रह्मनिरस्तभेदमित्यष्टमवाक्यं च व्याख्यातम् । त्वं हृदि परं ज्योतिर्ब्रह्म चिन्तितवानस्यतो विषापनयं शक्नोषि कर्त्तुमिति । अन्यथा वयं न तात प्रभवाम भूम्नीत्यादि नवमस्थगिरिशवाक्यविरोधः । तच्च ज्योतिर्वैकुण्ठस्याप्यगम्यमिति नायुक्तम् । द्युपतय एव ते न यमुरन्तमनन्ततया त्वमपीत्यादिस्मृतेः ॥ २३ ॥

उपसंहरति तस्मादिति । तत् सत्कृतिस्तदर्थितेति दिवैः स्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

यै तत्सत्कृतिस्तदर्थिता तेन कृतेति न तस्य पारमै-

पूजां याचितो विष्णुस्तान् पूज्यान् चकारेत्यादि वाराहे कथास्ति। वराह उवाच–एवं सृष्ट्वा जगत् सर्वं भगवान् भूतभावनः। विरराम ततः सृष्टिर्व्यवर्धत धरे तदा ॥ वृद्धायामथ सृष्टौ तु सर्वे देवाः सवासवाः ॥ सत्रैर्महद्भिः सर्वत्र यजन्तः श्रद्धयान्विताः। तोषयामासुरत्यर्थं स्वं पूज्यं कर्त्तुमीप्सवः ॥ एवं तोषयतां तेषां बहुवर्षसहस्रके। काले देवस्तदा तुष्टः प्रत्यक्षत्वं जगाम ह ॥ अनेकबाहूदरवक्त्रनेत्रो महागिरेः शृङ्गमिवोल्लिखंस्तदा। उवाच किं कार्य्यमथो सुरेशो ब्रूतां वरं देववरा वरं वः॥ देवा ऊचुः। जयस्व गोविन्द महानुभाव त्वया वरं नाथ वरेण देवाः। मनुष्यलोकेऽपि भवन्तमाद्यं विहाय तस्माद् भजतीह कश्चित् ॥ चन्द्रादित्यौ वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च। सर्वे भवन्तं शरणं गताः स्मः कुरुष्व पूज्यानिह विश्वमूर्त्ते ॥ एवमुक्तस्तदा तैस्तु महायोगेश्वरो हरिः। करोमि सर्वान् वः पूज्यानित्युक्त्वान्तरधीयत ॥ देवा अपि निजौकांसि गतवन्तः सनातनम्। स्तुवन्तः परमेशोपि त्रिविधं भावमास्थितः। एवं त्रिधा जगद्धाता भूत्वा देवान् महेश्वरः। आराध्य सात्त्विकं राजतामसत्वं त्रिधा स्थितः। सात्त्विकेन पठेद्वेदान् यजेद्यज्ञेन देवताः। आत्मनोवयवो भूत्वा राजसेनापि केशवः। स कालरूपिणं रौद्रं प्रकृत्या शूलपाणिनम्। आत्मनो राजसीं मूर्तिं पूजयामास भक्तितः ॥ तामसेनापि भावेन असुरेषु व्यवस्थितः। एवं त्रिधा जगद्धाता भूत्वा देवान्महेश्वरः। आराधयामास ततो लोकोऽपि त्रिविधोऽभवदिति ॥ तत्रैव प्रजाः सृजेति ब्रह्मणोक्तः सर्वेशं विष्णुं बहु स्तुत्वा रुद्र उवाच–ब्रह्मणाहं नियुक्तस्तु प्रजाः

Digitization by Arya Samaj Charitable Foundation, Chennai

श्वर्य्यम् ॥ २४ ॥

यत्र सामान्यविशेषाभ्यां प्रश्नोत्तरे भवेता तत्रैव तन्निश्चीयते । यत्र विशेषेणैव ते स्यातां तत्र तात्पर्यान्तरं कल्पनीयमिति । यथा भारते—"किमेकं दैवतं लोके किं वाप्येकं परायणम् । स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ को धर्मः सर्वधर्माणां भवतः परमो

सृज इति प्रभो । तत्र ज्ञानं प्रयच्छस्व त्रिविधं भूतभावन ॥ विष्णुरुवाच। सर्वज्ञस्त्वं न संदेहो ज्ञानराशिः सनातनः । देवानां च परं पूज्यः सर्वदा त्वं भविष्यसि ॥ एवमुक्तः पुनर्वाक्यमुवाचोमापतिर्मुदा । अन्यं देहि वरं देव प्रसिद्धं सर्वजन्तुषु । मूर्त्तो भूत्वा भवानेव मामाराधय केशव । मां वहस्व स्वदेहेन वरं मत्तो गृहाण च । येनाहं सर्वदेवानां पूज्यः पूज्यतरोभवे ॥ विष्णुरुवाच । देवकार्यावतारेषु मानुषत्वमुपागतः । त्वामेवाराधयिष्यामि त्वं च मे वरदो भव। यत्त्वयोक्तं वहस्वेति देवदेव उमापते । सोऽहं वहामि त्वां देव मेघो भूत्वा शतं समाः ॥ एवमुक्त्वा हरिर्मेघः स्वयं भूत्वा महेश्वरम् । उज्जहार जलात्तस्माद्वाक्यं चेदमुवाच हेत्यादि । एवमन्यच्चान्यत्र द्रष्टव्यम् ॥ २४ ॥

पारतम्यनिर्णये निर्णायकाः सामान्यविशेषरूपप्रश्नोत्तरमयीं युक्तिं स्वीकुर्वन्ति, तस्या विष्णुपक्ष एव दृष्टत्वात् तत्रैव पारतम्यमिति योजयति यत्रेति । तदिति पारमैश्वर्य्यम् । प्रकटार्थमन्यत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मतः । किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्" इति युधिष्ठिरेण सामान्यतः परमं तत्त्वं पृष्टो भीष्मो विशेषेणोत्तरयति—"जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् । स्तुवन्नामसहस्रेण पुरुषः स ततोत्थितः" इत्यादिभिः । इह हि विष्णुरेव परमं तत्त्वं तद्भक्त्या संसारविनिवृत्तिरिति विशिष्योत्तरितम् । एवं तत्रैवान्यत्र बहुत्र सामान्यविशेषरूपप्रश्नोत्तराभ्यां भगवतो विष्णोरेव परतमत्वं निर्णीतं दृश्यते शास्त्रविस्तरभयान्नाऽत्र तन्निर्दिष्टम् ॥ २५ ॥

औपमन्यवाख्याने तु विशेषेणैव प्रश्नोत्तरयोः सत्त्वात्तत्र तात्पर्यान्तरं कल्पनीयम् । तच्च दर्शितमेव ।

अन्यत्र नारायणीयादौ । एवमेव श्रीविष्णुपुराणे—यन्मयं च जगद्ब्रह्म यतश्चैतच्चराचरम् । लीनमासीद्यथा यत्र लयमेष्यति यत्र चेति मैत्रेयेण सामान्यतः परतत्त्वं पृष्टः पराशरो 'विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् । स्थिति संयमकर्त्तासौ जगतोस्य जगच्च य' इति विशेषेणोत्तरयति । एवमेव श्रीगोपालतापन्यां च द्रष्टम् ॥ २५ ॥

औपमन्यवेति । मोक्षधर्मे शिवमहिमानं ब्रूहीति युधिष्ठिरेण पृष्टो भीष्मस्तं पुण्डरीकाक्षः श्रीकृष्णो वक्ष्यतीत्यवोचत् । कृष्णस्तं सविस्तरं तमभाणीदिति विशेषेण ते द्वे स्थिते । इतरथेति । कृष्णेनार्चितस्य रुद्रस्य कृष्णादुत्कर्षे संमते समुद्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

इतरथा समुद्रस्यापीश्वरतापत्तिः श्रीरामेण तत्पूजाया विधानात् ॥ २६ ॥

एवं क्वचिद्भगवत्पार्षदानां देवतान्तराराधनमपि तदाराध्यताख्यापनार्थं लीलारूपमेव, न हि तत् सिद्धान्तकक्षामारोक्ष्यति ॥ २७ ॥

महेशादिसमाख्या तु महेन्द्रादिसमाख्यावद् विफलैव बोध्या । द्रोणपर्वान्ते रुद्रस्य यच्छतरुद्रीयार्थत्वमुक्तं तद्धि तदन्तर्यामिपरम् । अन्यथाऽसङ्गतेः । यश्चान्ते द्रौणिना युध्यमानस्य रुद्रस्य तेजोमरीचिभ्यः केशवाना बहूनां प्रादुर्भावः स्मर्यते, सोऽपि नायुक्तः, तदन्तः—

तस्यापीति । लङ्कामार्गार्थी श्रीरामः सिन्धुमानर्च, अदत्तमार्गं तं तिरश्चकारेति श्रीरामायणे कथास्ति ॥ २६ ॥

एवमिति । यथा भगवतस्तथेत्यर्थः । नन्दादिभिरम्बिकावने साम्बिकः शिवो न्यर्चितः । गोपकन्याभिः कात्यायनी । श्रीराधास्वामिन्या तु रविरिति तदन्तर्यामी कृष्ण एव तैस्ताभिश्चाभ्यर्च्यते । तन्मतमनुसृत्य तदीयत्वेन तदाराधनं वेति न तत्र तत्र पारम्यं श्रद्धातव्यम् ॥ २७ ॥

यत्तु महेशमहादेवसमाख्यया रुद्रस्य पारमैश्वर्यं शैवाः कल्पयन्ति तत् प्रत्याचष्टे महेशादिति । इन्द्रशब्दः खलु स्वार्थस्य पारमैश्वर्यं ब्रूते इति धात्वर्थानुमारादेवं स पुनर्महच्छब्देन विशेषितो नातिशयं तत्र प्रत्याययेत्तदभावादेव । शताश्वमेधया-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्थितस्य तस्य तत्साहाय्यातुरस्य तथाविर्भावात् । तस्माद् विष्णुरेव सर्वाराध्यो रुद्रस्तु तदाराधको जगदाराध्यश्चेति विष्णावेव तन्निश्चितम् ॥ २८ ॥

इह कश्चिदेवं मन्यते । ब्रह्मविष्णुरुद्रा यत्कार्याणि भवन्ति तत् सदाशिवाख्यं मूलं तत्त्वं भवेत् । कैवल्योपनिषदि—"अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भ-

---

जिनो जीवस्येन्द्रत्वं सर्वाभ्युपगतम् । तस्मान्महेन्द्रसमाख्या यथा व्यर्था तथा महेशसमाख्यापि । पूर्वोक्तैः श्रुत्यादिनित्यस्य श्रुत्यादिभिस्तस्य जीवत्वविनिश्चयान्न सा मुक्तप्रग्रहया वृत्त्या तस्य पारमैश्वर्यं शक्नुयादभिधातुं किन्त्वन्यदेवापेक्षया तदैश्वर्यं महत्त्वं ब्रूयादेवेति भावः । शतरुद्रीयार्थत्वमिति । जगज्जन्मादिहेतुर्ब्रह्मैव तदर्थत्वेनोक्तम् । तद्धेतुत्वे रुद्रस्यापि स्वीकृते ब्रह्मद्वयापत्तिलक्षणो विरोधः स्यात्तस्मात्तदन्तर्यामि परं तदिति सुष्ठु । यश्चान्त इति । तत्रैवमस्ति । 'तस्यास्य नासिकाभ्यां च श्रवणाभ्यां च सर्वशः । तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन् महार्चिषः ॥ तथा तेजोमरीचिभ्यः शङ्खचक्रगदाधराः । प्रादुरासन् हृषीकेशाः शतशोऽथ सहस्रशः ॥ तदत्यद्भुतमालोक्य भूतं लोकभयङ्करम् । द्रौणिरव्यथितो दिव्यैः शरवर्षैरवाकिर'दिति ॥ अत्र रुद्राङ्गाद्विष्णोः प्राकट्यं स्तम्भादिवन्नृसिंहस्य ब्रह्मनासातो वराहस्येवेति बोध्यम् । प्रकरणं योजयति तस्मादिति । विस्पष्टार्थम् ॥२८॥

अथ महाशैवं निराकर्तुं तन्मतमुपन्यस्यति—इदं कश्चिदित्यादिना । अत्याश्रमे प्रशस्ते संन्यासे स्थितो विरक्त इत्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

क्त्या स्वगुरुं प्रणम्य । हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ॥ अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् । तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः ॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् । ज्ञात्वा मृत्युमत्येति नान्यः पन्था विमुक्तये" इत्यादि श्रवणात् । उपरिष्टाच्च— "त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् । तेभ्यो

'अतिशब्दः प्रशंसायामि'ति विश्वः । हृत्पुण्डरीकं विशुद्धं विचिन्त्य विषयस्पृहामलापाकरणेन निर्मलं विधायेत्यर्थः । तन्मध्ये शिवं ध्यात्वेत्यन्वयः । कीदृशं विशदं शुचं मायापङ्कास्पृष्टम् । विकसितार्थमन्यत् । मायया तु स्वशक्त्या स एव सर्वात्मेत्याह स ब्रह्मेति । सर्वात्मकत्वेपि स्वावस्थातो न व्यवत इत्याह सोऽक्षर इति । सर्वं वर्त्तमानं ब्रह्मादि । भूतं पुरा यदभूत् । भव्यं यदागामिसृष्टौ भविष्यत् । तत् सर्वं मायया स एवेत्यर्थः । तं सनातनं ज्ञात्वेत्यन्वयः । उपरिष्टादित्याग्रिमग्रन्थ इत्यर्थः । धामसु लोकेषु । भोक्ता ब्रह्मादिप्राणिनिकरः । तेभ्यो भोग्यभोक्तृ-

Digitization by Arya Samaj Charitable Foundation, Chennai

नारायणोपनिषदि च "अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति नारायणाद्ब्रह्माऽजायत" इत्यादिना नारायणशब्दिताद्देवकीपुत्राद्विष्णोर्ब्रह्मरुद्रादिसृष्टिः श्रूयते। स च समस्तहेयराहित्यात् सुमङ्गलो भवति तदुपासनया विमुक्तिरित्यपि चोर्ध्वमुपदिश्यते। "अथ नित्यो निष्कलङ्को निराख्यातो निर्विकल्पो निरञ्जनः। शुद्धो देव एको नारायणो न द्वितीयोस्ति काश्चित्। य एवं वेद स विष्णुरेव भवती"त्यादीना। अन्यत्र च श्रूयते—"एको ह वै नारायण आसीन्न ब्रह्मा न ईशानः। एको वै नारायण आसीन्न ब्रह्मा न च शङ्करः॥ स मुनिर्भूत्वा समचिन्तयत्तत एते व्यजायन्त विश्वे हिरण्यगर्भाग्नियमवरुणरुद्रेन्द्रा" इत्यादि॥ ३२॥

निष्कलङ्को निर्दोषः। निराख्यातः सर्वदेवावाच्यः। निर्विकल्पो द्वैरूप्यशून्यः। गतिसामान्यादिति सूत्रात्। निरञ्जनः प्रकृतिलेपरहितः। अत एव शुद्धः। ईदृशो द्वितीयः कोपि नास्तीत्यद्वितीयः। न तत्समश्चेति श्रवणात्। यस्तमेवं वेत्ति जानात्युपास्ते च स विष्णुरेव भवति। निर्मायत्वेनांशेन विष्णुतुल्यो न भवति। 'एवौपम्येऽवधारणे' इति विश्वः। अन्यत्रेति। महोपनिषदादिष्विति ज्ञेयम्॥ ३२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तैत्तिरीयके च शिवशब्दो नारायणशब्दसामानाधिकरण्येनोपदिष्टः श्रूयते । "सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् ॥ विश्वतः परमं नित्यं विश्वं नारायणं हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥ नारायणः परं ज्योतिरात्मा नारायणः परः । नारायणः परं ब्रह्म तत्त्वं नारायणः परः ॥ नारायणः परो ध्याता ध्यानं नारायणः परम् । यच्च किञ्चिज्जगत्यस्मिन् दृश्यते

शिवनारायणशब्दयोः सामानाधिकरण्याच्च शिवो विष्णुरेवेति स्वीकार्य्यमित्याह--तैत्तिरीयके चेति । तद्वतायां बृहन्नारायणोपनिषदि चेत्यर्थः । विश्वमक्ष्णोति व्याप्नोतीति विश्वाक्षम् । विश्वस्य शं कल्याणं भावयत्युत्पादयतीति विश्वशम्भुवम् । स्वशक्त्या विश्वं जगदाकारम् । एवमग्रेपि पुनःपुनरुक्तिर्दृढतार्था । पुरुष एव विश्वमित्यन्वयः । विश्वं कर्तृ तत्पुरुषरूपवस्तूपजीवति समाश्रयति । यतो विश्वस्य पतिं पालकम् । आत्मनां ब्रह्मादिजीवानामीश्वरं नियामकम् । ज्ञेयेषु तत्त्वेषु मध्ये महानिति महाज्ञेयस्तं मुमुक्षुध्येयमित्यर्थः । ध्याता तदुपासकगणो ध्यानं च तदुभयं नारायण एव । अयमभेदव्यपदेशो व्याप्यव्यापकादनतिरिक्तमिति भावेनैव न तु स्वरूपेणेत्येतत् स्फुटयति यच्चेति । यत् किञ्चिज्जगति दृश्यते राजादि, श्रूयते चेन्द्रादि, तत्सर्वं व्याप्य नारायणः

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रूयतेपि वा ॥ अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इत्यादिना। अत एवमुक्तं नारायणीये—"तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखः। तत्त्वमेको महायोगी हरिर्नारायणः प्रभु"रिति ॥ ३३ ॥

नारायणशब्दः खलु लक्ष्मीपतेः संज्ञा, तस्यामेव णत्वविधानात्। यदाह भगवान् पाणिनिः—"पूर्वपदात्संज्ञायामगः" इति। पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने—इति तदर्थः। नारायणः। अगः किम्—रुगयनमिति। तस्माद्विष्णुरेव सदाशिवशब्दितः। इतरथा सर्वश्रुतिस्मृतिव्याकोपः। तत्रैव च ब्रह्मविद्यात्वव्यपदेशब्रह्मपरमा-

---

स्थितोऽस्तीति व्यापकाद्वैतभावनया ध्यातृध्यानयोर्ध्येयादभेद इत्यर्थः। भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिर्हि सामानाधिकरण्यम्। नारायणशब्दो विष्णावेवेति भारतवाक्येनाह—तत्त्वमिति। स्फुटार्थम् ॥ ३३ ॥

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं यस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः। तस्य तान्ययनं पूर्वं तेन नारायणः स्मृत" इति च स्मृतेः। पुरुषाज्जातानां कारणाम्भसां तत्त्वानां वा समाश्रयता लक्षणेन योगेन नारायणशब्दो विष्णोरेव समाख्येत्येतत्

Digitization by Arya Samaj Charitable Foundation, Chennai

त्मशब्दा विरुध्येरन् । तौ शब्दौ किल विष्णोरेवाभिधायकौ प्रसिद्धौ । शिवादिशब्दास्तत्रैव प्रवर्तन्त इति प्रागुक्तम् ॥ ३४ ॥

ननूमासहायत्रिलोचननीलकण्ठशब्दाः कथमत्र प्रवर्तेरन्निमित्तविरहादिति चेन्मन्दमेतत्, तेषामर्थान्तरसत्त्वात् । तथा हि—उमा कीर्तिः "उमाऽतसी हैमवती हरिद्राकीर्त्तिकान्तिष्वि"ति विश्वप्रकाशात् । सा सर्गादौ सहाया यस्य तम् । त्रिनेत्रं त्रीणि नेत्राणि भूतवर्तमानभविष्याद्विषयाणि ज्ञानानि यस्य तं त्रिकालज्ञमित्यर्थः । "वेदाहं समतीतानि वर्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन" इति स्मृतेः । नीलो मणिविशेषः स्ववर्णसादृश्यातिप्रियत्वात् कण्ठे यस्य त-

---

पाणिनिसूत्रादप्यवगतमित्याह—नारायण इत्यादिना । इतरथेति । विष्णोरपि कारणं सदाशिवोन्योस्तीति स्वीकारे इत्यर्थः । तत्रैवेति । कैवल्योपनिषदि । तावितिं ब्रह्मपरात्मशब्दौ । प्रसिद्धौ श्रीगीतादिषु ॥ ३४ ॥

नन्विति । अत्र विष्णुपक्षे । निमित्तेति । पार्वतीसाहित्यादिकं प्रवृत्तिनिमित्तं तदभावादित्यर्थः । सा कीर्त्तिः प्रवृत्तिहेतुतया यस्य सहाया भवतीत्यर्थः । निधिविशेषो वेति निध्यन्तराणामुपलक्षणम् । यदाशीर्वादात् सकामभक्तानां सर्वे निधयो

Digitization by Arya Samaj Charitable Foundation, Chennai

मिन्द्रनीलमणिहारिणमित्यर्थः। निधिविशेषो वा नीलः कण्ठे यस्य स तथा। परोक्षवादेन विद्योपदेशप्रवृत्तेरत्र न शब्दस्वारस्यभङ्गो दोषः॥ ३५॥

त्वदभिमते सदाशिवे त्वेते शब्दा न प्रवर्त्तेरन्। पार्वतीपतित्वादीनां निमित्तानां तत्राभावात्। कार्य्ये कपालिन्येव तेषा भावात॥ ३६॥

श्वेताश्वतरोपनिषदि च परब्रह्मभूतो विष्णुरेवोपदिष्टः, ब्रह्मवादिनो वदन्तीत्युपक्रान्तस्य ब्रह्मशब्दस्यापूर्वेरभ्यासात्। "सर्वव्यापी स भगवान्", "एवं स देवो भगवान् वरेण्य" इति भगवच्छब्दोऽप्यभ्यस्तः, स च विष्णौ मुख्यः। विष्णुप्रमेयं हि पुराणं भागवतमित्याख्यायते।

भवन्तीति भावः। ननु श्रुतिरेव कथमुपदिशतीत्यत्राह-परोक्षेति॥ ३५॥

स्वमतमुपपाद्य परमतेऽनुपपत्तिमाह त्वदिति। तत्रेति। चिदेकरसेऽद्वितीये सर्वकारणे सदाशिवे इत्यर्थः। कार्य्ये इति। ब्रह्मपुत्रे कपालिने रुद्रे इत्यर्थः॥ ३६॥

श्वेताश्वतरैश्च हरादिशब्दानुद्विरद्भिः स्वोपनिषदि सदाशिव एवासौ वर्णित इति चेत् प्रोक्तं तदप्यनुपपन्नमित्याह श्वेतेत्यादिना। तस्मिन्निति। तस्मिन् विष्णावेवामुं भगवच्छब्दं व्युत्पाद्य पराशरो महर्षिः। तस्मादिति। इयं श्वेताश्वतरैः पठिता षडध्यायी। यदीति। सदाशिवो यो मया निरूप्यते स एव

Digitization by Arya Samaj Charitable Foundation, Chennai

संभर्तेति तथा भर्तेत्यादिना तस्मिन्नेवामुं व्युत्पाद्य पुनर्निगमयति—"एवमेष महाशब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः" इति श्रीविष्णुपुराणे । तस्माद्विष्णुपरैवेयमुपनिषत् । यदि सदाशिवोऽपि ब्रह्मशब्दितत्वादिधर्मेति वाच्यं तर्हि संज्ञामात्रे एव विसंवादो न तु संज्ञिनीति यत्किञ्चिदेतत् ॥ ३७ ॥

ननु त्रिमूर्त्तिमध्यो विष्णुरुत्पत्तिमान् "ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे प्रसूयन्ते" इति श्रवणात् गर्भोदशायिनः पुरुषाद्ब्रह्मविष्णुरुद्रास्त्रयो गुणावतारा भवन्तीति भागवत-

---

परं ब्रह्म स एव भगवानिति चेन्महाशैवो ब्रूयात्तदा नाममात्रे भेदो नामी त्वेक एवावयोरित्यर्थः । अयं भावः । अन्तश्चिन्हं त्वयास्माकं धृतमेव चक्रोर्ध्वपुद्र(?)तुलस्यादिके वहिश्चिह्ने धृते तु न कोपि तल्लेशः। ननु सूतसंहितया निन्दितत्वात्तन्न ध्रियते भस्मतिर्यक्पुण्ड्रादिकं तु स्तुतत्वाद्ध्रियते इति चेत् ज्ञानाविजृम्भितया सूपया(?)तन्निन्दा केनाचित् कृतेत्यवगच्छ न खलु व्यासाश्रितः सूतस्तथा ब्रुवन पाण्यादौ शङ्खचक्रादिधारणं स्तुवता स्वप्रभुणा शक्नुयाद्विरोद्धुम् । न च तथा वदन् श्लाघ्यवाग् भवेदिति काशीखण्डयोगवाशिष्ठाष्टावक्रादिवत्कल्पितैव सा। एषु संमतांशोक्तिस्त्वन्याकर्षणार्थेति वदन्ति ॥ ३७ ॥

एवं महाशैवेऽपि निरस्ते कपाल्येकान्ती तज्जन्मादि श्रुत्वातिखिन्नः क्रोधताम्रनेत्रो वैतण्डिकतया सत्त्वाधिष्ठातुर्विष्णोर्जगत्पा-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रक्रियादर्शनाच्चेति चेत् । सत्यं, ब्रह्मरुद्रयोर्जीवत्वादेव कर्मवश्योत्पत्त्यादिप्रकीर्तनम् । विष्णो "स्त्वेकोऽपि सन् बहुधा योऽवभाति", "एकं सन्तं बहुधा दृश्यमानम्", "अजायमानो बहुधा विजायत" इत्यादिषु कर्मवश्योत्पत्त्यादिनिरासादप्रच्युतस्वरूपशक्तिस्वभावस्य तस्य स्वसृष्टिपालनाय त्रिमूर्त्तिमध्ये स्वेच्छावतारावि र्भावादिपर्यायाभिव्यक्तिरि-

---

लकस्यानित्यतां वक्तुं प्रतिवर्त्तते नत्विति । नैवात्र विप्रतिपत्तव्यं भवतामपि संमतिर्यदस्तीत्याह गर्भोदकेत्यादि । अयं खलु शूकरादियोनिजातत्वशस्त्रक्षतिश्यामत्वानि विष्णोरपकर्षे कारणानि । रुद्रस्य तस्मादुत्कर्षेऽजातत्वशस्त्राक्षतिशुक्लत्वानि कारणानि स्वगोष्ठ्यां जल्पति द्विजत्वाद्वेदमाश्रयन्नपि विष्णुविद्वेषादस्फुरिततदर्थः सन् । समाधत्ते सत्यमित्यादिना । कर्मवश्योत्पत्त्यादीति । आदिना मृत्युः । युगकोटीत्यादेर्विश्वरूप इत्यादेर्ब्रह्मा शम्भुरित्यादेश्च पूर्वोक्तस्मृतेर्बोध्यम् । एकं सन्तमिति । अजायमान इति पुरुषसूक्ते । कर्मवश्योत्पत्त्यादिनिरासादित्यत्रादिपदात्कर्मवश्यो नाशस्तस्य नास्ति किंत्विच्छया तिरोधिरेवेच्छन् मुहूर्त्तान्नश्येयमित्यादौ वर्ण्यते इत्यर्थः । अप्रच्युतेति । स्वभावः शीलम् । स्वभावः प्रकृतिः शीलमिति धनञ्जयकोषात् । स्वेच्छयेति आत्मेच्छया । निजलोकात्प्रपञ्चेऽवतरणं स्वेच्छावतारः । अत एवेति । श्रीवैष्णवेऽपि त्रीन् ब्रह्मादीन् परब्रह्मणः शक्तीरुक्त्वा तेषु विष्णोः साक्षाद्ब्रह्मत्वमुक्तवान् पराशरः । ब्रह्मविष्णुशिवा ब्रह्मशक्तयः । सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणः परम् । स परः सर्वशक्तीनां

Digitization by Arya Samaj Charitable Foundation, Chennai

ति। अत एव "सृजामि तन्नियुक्तोहमि"त्यादौ विश्वपुरुष-रूपेण परिपातीत्युक्तं न तु तद्वश्यता तस्योच्यते ॥३८॥

सुबालोपनिषदि च तमःशब्दितसूक्ष्मशक्तिकात्पुरुषाद्ब्रह्माण्डं जातम् । तस्मिन् सहस्रशीर्षाख्यपुरुषवपुषा स एवाविर्भूतस्तस्माद्ब्रह्मरुद्रादिसृष्टिरभूदिति श्रूयते । तदाहुः "किं तदासीत्तस्मै स होवाच न सन्नासदसदिति । तस्मात्तमः सञ्जायते तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी तदण्डं समभवत्। तत्संवत्सरमुषित्वा द्विधाऽकरोत्—अधस्ताद्भूमिरुपरिष्टादाकाशम् । मध्ये पुरुषो दिव्यः । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सहस्रबाहुरिति । सोऽग्रे भूतानां मृत्युमसृजत् त्र्यक्षं त्रिशिरस्कं त्रिपादं खण्ड-

---

ब्रह्मणः समनन्तरः । मूर्त्तं ब्रह्म महाभाग सर्वब्रह्ममयो हरिरिति। ब्रह्मणः शक्तीनां ब्रह्मादीनां मध्ये परं श्रेष्ठः यतः समनन्तरः प्रणष्टभेदः । यतो मूर्त्तं ब्रह्म सान्द्रज्ञानानन्दराशि नैवं ब्रह्माशिवश्च । सर्वब्रह्ममयश्च कृत्स्नब्रह्मस्वरूपस्तत्स्वांश इत्यर्थः ॥ तौ तु तद्विभिन्नांशौ जीवाविति भावः ॥ ३८ ॥

सत्त्वाधिष्ठातुर्विष्णोः परब्रह्मत्वादेवाविर्भावतिरोभावौ स्यातां न त्वितरयोरिव जनिविनाशौ । अतः श्रुतिशैल्यां ताभ्यां सह तस्योत्पत्तिर्नोदीर्यत इति भावेन तामुदाहर्त्तुमवतारयति सुबा-

Digitization by Arya Samaj Charitable Foundation, Chennai

परशुं तस्य ब्रह्माबिभेत् । सोयं ब्रह्माणमाविवेश । स मानसान् सहपुत्रानसृजत्ते ह विराजः सप्त मानसानसृजत् । ते ह प्रजापतयो ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत । चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च हृदयात् सर्वमिदं जायते । अपानान्निषादा यक्षराक्षसगन्धर्वा अस्थिभ्यः पर्वता लोमभ्य औषधिवनस्प-

---

लेत्यादिना । तदाहुरिति । तं गुरुं शिष्याः पृच्छन्तीत्यर्थः । प्रष्टव्यमाह किमिति । सृष्टेः पूर्वमविनाशि वस्तु किं तदासीदिति । एवं पृष्टः स गुरुस्तस्य शिष्यवृन्दाय होवाच सदित्यादि । सृष्टेः पूर्वं यद्वस्त्वासीत् । तन्न सत् । तेजोबन्नरूपं स्थूलं नेत्यर्थः । नाप्यसत् । प्रधानमहदादिरूपं सूक्ष्मं नेत्यर्थः । न च सदसत् । वियद्वायुरूपं स्थूलं सूक्ष्मं च नासीदित्यर्थः । तर्हि किमासीदिति चेत्तत्तद्विलक्षणं तमःशक्तिकं ब्रह्मैवासीदित्युक्तं बोध्यम् । तस्मात् स्वविलीनक्षेत्रज्ञगणबुभुक्षाभ्युदितानुकम्पादीक्षिततमसो ब्रह्मणस्तमः सञ्जायते प्रधानशरीरकाक्षरव्यञ्जनाभिमुखमभवत् । तमसोऽक्षरशब्दितोऽव्यक्तशरीरकः क्षेत्रज्ञः । तस्मादभिव्यक्तत्रिगुणमव्यक्तम । ततस्त्रिविधो महान् । ततस्तादृशोहङ्कारः । तस्मात् सात्त्विकादिन्द्रियदेवता मनश्च । राजसादिन्द्रियाणि दश । तामसात्तु भूतादिसञ्ज्ञात्तन्मात्रद्वारा खादीनि पञ्चेत्यग्रिमप्रलयश्रुत्यनुसारेणेदं व्याख्यातं बोध्यम् । स सूक्ष्मे भाष्ये निरूपितं द्रष्टव्यम् । सोग्रे इति । अग्रे प्रथमं स सहस्रशीर्षा विष्णुर्भू-

Digitization by Arya Samaj Charitable Foundation, Chennai

तयो ललाटात् क्रोधजो रुद्रोऽजायत। तस्यैतस्यैतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद" इत्यादिना ॥३९॥

शतपथे च श्रूयते "भूतानां पतिः संवत्सरे उषसि रेतोऽसिञ्चत्। तत् संवत्सरं कुमारोऽजायत सोऽरोदीत्तं प्रजापतिरब्रवीत्। कुमार किं रोदिषि यत श्रमात्तपसोऽधिजातोऽसीति। सोऽब्रवीदनपहतपाप्मा वा अहमस्मि नाम मे धेहि पाप्मनोऽपहत्या इति। तं प्रजापति-

---

तानां प्राणिनां मृत्युं संहारकं रुद्रमसृजदिति विष्णुपुत्रो रुद्रः। तस्येति। तस्माद् रुद्रात्। सोयं रुद्रो ब्रह्माणमाविवेशेति पुनर्ब्रह्मणश्च तदुत्पत्तिः। स विष्णुनाधिष्ठितो ब्रह्मा सह युगपदेव मानसान् सनकादींश्चतुरः पुत्रानसृजत्। ते ह विराजो विशिष्टदीप्तयो बभूवुः। सप्त मरीच्यादीन् मानसान् स ब्रह्माऽसृजत्। एवमुक्तं श्रीवैष्णवे। वैवस्वते च महति वारुणे विततेक्रतौ। जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते॥ पूर्वं यत्र तु सप्तर्षीनुत्पन्नान् सप्त प्रजापतयो बभूवुः। ब्राह्मणोऽस्येति। अस्य हिरण्यगर्भशरीरकस्य विष्णोः। ललाटादिति। यो ब्रह्माणमाविवेश स रुद्रस्तस्य ललाटादुदभूदित्यर्थः॥ ३९॥

शतपथे चेति। यजुर्वेदे शतपथे षष्ठे काण्डे तृतीये ब्राह्मणे विच्छिद्य विच्छिद्येदं वाक्यं स्थितं बोध्यम्। भूतानामिति। सर्वेश्वराद्विष्णोरुत्पन्नो रुद्रो ब्राह्मणमाविश्य स्थितः। अथ भूतानां पतिर्ब्रह्मा रुद्रात्मकं रेत उषसि योनावसिञ्चत्। अनपहतपाप्मा निष्पापो नाहं नामकरणाद्विनास्मि। अतो मे नाम धेहि। नामा-

Digitization by Arya Samaj Charitable Foundation, Chennai

रब्रवीत् रुद्रोऽसीति तस्य तन्नामाकरोदग्निस्तद्रूपमभवत्। अग्नि वै रुद्रो यदरोदीत्तस्माद्रुद्रः। सोऽब्रवीत् ज्यायान् वा अहमस्मि देह्येवं नामेति। तं प्रजापतिरब्रवीत् भवोऽसीति शर्वोऽसीति ईशानोऽसीति पशुपतिरसीति भीमोऽसीति महादेवोऽसीति। प्रजापतिर्देवानसृजत्। ते पाप्मना संवीता अजायन्त विरूपाक्षाय ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठायामोघाय कर्माधिपतये। सोऽब्रवीत् वरं वृणीष्व। अहमेव पशूनामधिपति"रिति ॥ ४० ॥

इह हि परस्य भगवतः परमकारणत्वं तस्माद्रु-

न्तराण्याकाङ्क्षन्नाह-"ज्यायानिति"। ते ज्येष्ठपुत्रोऽहमस्मि। एवं नाम मे देहि येन मे ज्येष्ठत्वं ख्यातं स्यादित्यर्थः। एवं रुद्रप्रमुखनामानि च तस्य कृत्वा सोऽन्यान् पुत्रानसृजदित्याह—"प्रजापतिरिति"। ते देवा अकृतनामानः पाप्मना संवीता व्याप्ता एव सन्तोऽजायन्त जाताः। अथ कृतनामानस्ते निष्पाप्मानो ज्येष्ठस्य रुद्रस्यानुयायिनो बभूवुरित्याह-विरूपाक्षायेत्यादि। क्रियार्थोपपदस्येत्यादिसूत्राच्चतुर्थी। तमनुकूलयितुमित्यर्थः। ज्येष्ठायातिश्लाघ्याय। अमोघाय सफलाय फलदात्रे चेत्यर्थः। कर्माधिपतये वैदेककर्मप्रवर्तकाय। स ब्रह्मा रुद्रमब्रवीत् वरं वृणीष्वेति। स रुद्रो वरं वव्रे। अहमेवेति। पशूनां जीवानाम् ॥४०॥

एवं श्रुतिशैलीमुदाहृत्य तदर्थं योजयति इहेति। सुबालो-

Digitization by Arya Samaj Charitable Foundation, Chennai

ह्मरुद्रयोरुत्पत्तिः रुद्राद्ब्रह्मणो भीतिः । रुद्रस्यानपहत-पाप्मत्वं चावगम्यते । न चैवं विष्णोः श्रूयते । तस्मात् सर्वेश्वरो विष्णुश्चौरेषु मिलितो राजेव जगत्कार्य्याय देवेषु प्रविष्टस्तस्य स्वेच्छाभिव्यक्तिर्जन्मेत्यभिधीयते । यच्च दिव्यमिति ज्ञानान्नृणां जन्मानिवृत्तिरिति श्रीभगवता-भिहितम् । जन्मकर्म च मे दिव्यमित्यादि । तस्मा-न्त्रिमूर्त्तिमध्येऽवतीर्णो विष्णुः साक्षात् सर्वेश्वर इति सिद्धं

पनिषदि शतपथब्राह्मणे चेत्यर्थः । तस्माद् ब्रह्मरुद्रयोरुत्पत्तिरि-ति ।तस्माद्विष्णोरुत्पत्तिर्नोक्ता । यदसौ स्वयमेव विष्णुरिति भावः । तयोरुत्पत्तिभयानामत्वहेतुकसपापत्वानि जीवत्वे लि-ङ्गानि । न चैवं विष्णोरिति । नित्यविग्रहत्वात् सर्वेशत्वादावि-द्याविध्वंसिस्वात्मकनामत्वाच्च स्वप्नेपि नामूनि सम्भवन्ति । अविकाराय नित्याय परमात्मने सदैकरूप्याय विष्णवे सर्व-जिष्णवे । पापे गुरुणि गुरूणि स्वल्पे स्वल्पानि तद्विदः । प्रायश्चित्तानि मैत्रेय जगुः स्वायम्भुवादयः । प्रायश्चित्तान्यशे-षाणि तपःकर्मात्मिकानि वै । यानि तेषामशेषाणां कृष्णा-नुस्मरणं परम् । कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते । प्रायश्चित्तं तदेवास्य हरिसंस्मरणं परमित्यादि श्रीवैष्णवात् । यद्येवं तर्हि ब्रह्माविष्णुरुद्रेन्द्रास्ते सर्वे प्रसूयन्ते इति श्रुतिः कथं सङ्गता तत्राह—तस्मादिति । न हि नगरवार्ताविजिज्ञासु-र्नृपतिश्चौरवेशेन चौरेषु मिलितश्चौरः शक्यते वक्तुमपि तु तेषां

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य देवताविशेषत्वम् ॥ ४१ ॥

इति सिद्धान्तरत्नाख्ये भाष्यपीठके विष्णुपारम्य-
निर्णयस्तृतीयः पादः ॥ ३ ॥

नियन्तैव स वाच्य इत्यर्थः । स्फुटार्थमन्यत् ॥ ४१ ॥

इति श्रीगोविन्दभाष्यपीठकाटिप्पण्यां तृतीयः सुदर्शनपादो
व्याख्यातः ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

चतुर्थः पादः ।

अत्राहुः—द्विविधानि वाक्यानि श्रूयन्ते—सगुण-विषयाणि निर्गुणविषयाणि च । "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः" "एष आत्मापहतपाप्मा विजरो विमृत्यु" रित्यादीनि सगुणब्रह्मपराणि । "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधि-

---

तृतीयेन पादेन देवतैक्यादिवादिनः शैवांश्च निरस्य प्रथमादिपादाभ्यां सिद्धे दिव्यगुणकर्मणि विज्ञानानन्दविग्रहे सर्वेशे परब्रह्मणि स्थिरीकृते तमसहमानाः साङ्ख्यसौगतच्छायाव-लम्बिनः केवलात्मैक्यवादिनः प्रत्यवतिष्ठन्ते द्विविधानीत्यादि-ना । तार्क्ष्यपादोऽयं तत्पूर्वपक्षदन्दशूकानां भक्षकत्वादिति । वद-न्ति य इति । सर्वविन्नित्योपलब्धसर्वसम्पत् । तप आलोचनम् । एक इति काठके । एको द्वितीयभेदासहः । देवो द्योतमानश्चिदेक-धातुः । सर्वेषु भूतेषु खादिषु गूढः । "चतुर्विधेषु जीवेषु पृथि-व्यादिषु पञ्चसु अतीते देवयोनौ च भूतशब्दं प्रयुञ्जते" इति हलायुधः । सर्वाणि तानि बहिरन्तश्च व्याप्नुवन् सर्वव्यापी सर्वेषां भूतानां वह्निविस्फुलिङ्गन्यायेन स्वस्मान्मायाया विच्छिन्नानां चित्प-रमाणूनां चतुर्विधानां जीवानामन्तर्नियमयन् सर्वभूतान्तरात्मा व्यवहर्तॄणां तेषां कर्मफलान्यर्पयन् कर्माध्यक्षः तेष्वन्तःस्थितः

Digitization by Arya Samaj Charitable Foundation, Chennai

वासः साक्षी चेताः केवलो निर्गुणश्च" "सत्यं ज्ञानमनन्तं ब्रह्मे" त्यादीनि तु निर्गुणब्रह्मपराणि ॥ १ ॥

तत्र सगुणवाक्यानां न गुणविधाने तात्पर्यम् । तदनुवादमात्रेणैव चारितार्थ्यात् । निर्गुणवाक्याविरोधाय तदेकार्थताया युक्तेश्च । तस्मात् सर्वैर्वेदैः निर्गुणमेव लक्ष्यं न तु सर्वेश्वरो विष्णुरेव तेषामर्थ इति ॥ २ ॥

सर्वभूताधिवासः तेषां शुभाशुभयोः साक्षाद्द्रष्टृत्वात् साक्षी । तेषु ज्ञानान्यर्पयंश्चेताश्चेतयिता । वस्तुतस्तु केवलो विशुद्धः । यतो निर्गुण इति पूर्वपक्षार्थः । सिद्धान्तार्थेऽप्येवं बोध्यः । एकः मुख्यः । "एके मुख्यान्यकेवला" इत्यमरः । देवः सर्वाराध्यः । सर्वेषु भूतेषु जीवेषु गूढस्तेषां हृद्वर्ती । प्राप्तं परिच्छेदं निरस्यति सर्वव्यापीति । वियद्वत्तात्कूटस्थ्यं निरस्यति सर्वभूतान्तरात्मेति । दयालुतामाह—कर्म्माध्यक्षः इति । तेभ्यः कर्मफलानां दातेत्यर्थः । सर्वेषां तेषां भूतानामधिवासः परमाश्रयः । एवमपि निर्लेप इत्याह—साक्षीति । औदासीन्येन तत्र तत्र स्थित इत्यर्थः । चेत्यश्चित्स्वभावः । यतो निर्गुणो माययाऽनाघ्रात इति ॥ १ ॥

यद्येवं तर्हि द्विरूपं ब्रह्माऽस्तु । नेत्याह—तत्र सगुणेति । गुणविधाने तात्पर्येण गुणावेदने । तदनुवादेति । देवेषु महर्षिषु पार्थिवेषु चोग्रपुण्येषु दृष्टा येऽपहतपाप्मत्वादयो गुणास्तान् ब्रह्मणि निर्गुणेऽपि हृत्प्रवेशाय वेदो निगदतीत्येतावतैव तस्योपक्षीणत्वात् । तदेकेति । निर्गुणवाक्याविरुद्धताया इत्यर्थः । कथं सेति चेत्तत्राह तस्मादिति । सर्वैर्गुणावेदिभिर्वेदवाक्यैरित्यर्थः । निर्गुणं चिन्मात्रमेकमिति बोध्यम् । तेषामिति । द्विविधानां वाक्यानामित्यर्थः ॥२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

मन्दमिदम् । गुणानामनन्तराप्राप्त्यानुवादसम्भवात् । तत्प्राप्तस्य हि कीर्त्तनमनुवादः । न च ते गुणाः प्रत्यक्षादिप्राप्ताः किन्त्वौपनिषदा एव । पारमार्थिकाश्च ते "परास्य शक्ति"रित्यादौ स्वाभाविकीतिश्रवणात् "इमे चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचिदि"ति नित्यत्वस्मरणाच्च । अत एवेदं हरवाक्ये तस्मिन् यदन्तस्तदन्वेष्टव्यमिति मुमुक्षुमृग्यत्वं तेषामुक्तम् ॥ ३ ॥

यत्त्वाहुर्वाचं धेनुमुपासीतेत्यादिवत् सगुणवाक्यान्युपासनार्थानि । उपासनया विमृष्टा हृद्वृत्तिर्निर्गुणं सूक्ष्मं प्रवेक्ष्यतीति । इतरथोपासनायाः कार्यत्वे

प्रत्याचष्टे मन्दमिदमिति । तत्प्राप्तस्य मानान्तरलब्धस्य । ननु देवेषु महर्षिष्वित्यादियुक्त्या गुणानां प्रत्यक्षादिप्राप्तिर्वक्तव्येति चेत्तत्राह न च ते इति । ननूपनिषदा कल्पितान् गुणान् ब्रूते तत्राह-पारमार्थिकाश्चेति । इमे चेति प्रथमस्कन्धे धर्मदेवतां प्रति पृथिवीदेव्या वचनम् । भगवन् हे धर्म ! यत्र कृष्णे इमे सत्यादयः कथिताः । अन्ये चाऽकथिता नित्या महागुणाः कर्हिचिदपि न वियन्ति च्यवन्ते । यत्ते नित्याः । तस्मिन्निति । दहरे ब्रह्मणि यद्गुणाष्टकमन्तःस्वरूपभूतमस्ति तदन्वेष्टव्यं मृग्यमित्यर्थः । कल्पितत्वे मोक्षार्थिभिर्मृग्यं तन्न स्यादिति भावः ॥३॥

युक्त्यन्तराणि निराकरोति यत्त्वित्यादिना । अधेनौ

Digitization by Arya Samaj Charitable Foundation, Chennai

गुणेषु तात्पर्ये च वाक्यभेदापत्तिरिति। तदिदमविचारिताभिधानं तेषु वाक्येषूपासनापदाऽदर्शनात्। तत्पदविरहिणामपि तेषां तदर्थत्वकल्पनायामात्मेत्येवोपासीतेत्यादीनामपि तदर्थत्वापत्तेः। किञ्च—आनन्दादयः प्रधानस्य व्यतिहारो विशिंषन्ति हीतरवदित्यत्रानन्दादेर्जीवेशाभेदस्य वोपास्यत्वेपि तात्त्विकत्वं परैरुक्तम्। तद्वत् सार्वज्ञ्यादेरपि तत्किं न स्यात् ॥ ४ ॥

वाचि यथा धेनुत्वं तथा निर्गुणे ब्रह्मणि सगुणत्वमुपासनार्थं कल्पनीयमित्यर्थः। प्रवेक्ष्यन्ते शाखाचन्द्रन्यायेन। इतरथोपासनार्थत्वाभावे। तेषु यः सर्वज्ञः इत्यादिवाक्येषु। तत्पदविरहिणामुपासनापदशून्यानाम्। तदर्थत्वापत्तेरुपासनार्थत्वप्रसङ्गात्। आत्मत्वादिधर्माणामुपासनार्थत्वेन कल्पितत्वात् ब्रह्मणो नात्मत्वापत्तिरिति भावः। यदुपास्यं तत्कल्पितमिति भवतापि न शक्यं वक्तुं स्वोक्तिव्याघातादित्याह—किं चेत्यादि। आनन्दादय इत्यादिकं ब्रह्मसूत्रद्वयम्। तत्र प्रधानस्य ब्रह्म आनन्दरूपत्वादयो धर्मा उपास्या इति पूर्वसूत्रार्थः। "त्वं वा अहमस्मि भगवो देव ते अहं वै त्वमसि तत्त्वमसि तत्त्वमसी"त्यादीनि वाक्यानि जीवभावेन ब्रह्म विशिंषन्ति ब्रह्मभावेन जीवञ्चेति व्यतिहारस्तयोः परस्परभेदः सिद्धः इति परसूत्रस्यार्थः शङ्करेण भाषितः। अत्राऽऽनन्दादेर्जीवब्रह्माभेदस्य चोपास्यत्वेऽपि तात्त्विकत्वं यथा केवलाद्वैतवादे स्वीक्रियते तथा सार्वज्ञ्यादेरपि तत्तत्स्वीकार्यमिति कुतस्त्रपसे इति भावः ॥ ४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

न चोभयविधवाक्यावलोकाद्विकल्पः कदाचित् सगुणं ब्रह्म कदाचित्तु निर्गुणमिति वाच्यं, सिद्धे वस्तुनि विकल्पाभावात् । न हि वन्हिरुष्णः कदाचित्तु शीत इति शक्यमभिधातुम् । अनुष्ठाने तु साध्ये स स्यात् । षोडशिग्रहणाग्रहणाभ्यामतिरात्रवत्, उदितानुदितहोमवच्च ॥ ५ ॥

यत्तु सगुणवाक्यानां व्यावहारिकगुणविधायित्वं निर्गुणवाक्यानान्तु पारमार्थिकगुणाभावबोधकत्वमित्याहुस्तदतीव मन्दम्, व्यावहारिकत्ववाचिपदाभावाद्गुणानां मृषात्वेन तद्विधायिनां तेषामप्रामाण्यापत्तेः ।

अथ ब्रह्मणो द्वैरूप्यं निरस्यति न चेत्यादिना । सिद्धे निष्पन्ने ब्रह्मणि । अनुष्ठाने यागहोमादौ कर्मणि । साध्ये कृतिनिष्पाद्ये इत्यर्थः । स विकल्पस्तमुदाहरति षोडशीति । षोडशी यज्ञियपात्रविशेषः । अतिरात्रं कर्मविशेषः । 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाती'ति श्रवणात् । षोडशियोगायोगाभ्यामतिरात्रं द्विरूपम् । अनुदितहोमनिन्दयोदितहोम उदितहोमनिन्दयानुदितहोमश्च श्रुत्या विहित इत्युदितानुदितकालयोगेन द्विरूपो होमः ॥ ५ ॥

यत्त्विति प्रस्फुटार्थम् । गुणानामिति । त्वन्मते गुणाः सर्वे कल्पितत्वान्मृषाभूता एव ततस्तद्वाचिनां वेदवचसां 'एष वन्ध्यासुतो भाती'त्यादिवदप्रामाण्यापत्तेस्तव नास्तिकतापत्तिः

Digitization by Arya Samaj Charitable Foundation, Chennai

षोडशिग्रहणाग्रहणयोस्तत्तदापत्त्या पूर्वतन्त्रविरोधापत्तेश्च । सदेव सौम्येति श्रुतसत्त्वस्य मृषात्वेन ब्रह्मणः शून्यभावापत्तेश्च । "असन्नेव स भवति असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु"-रित्यत्रासद्वादिनं निन्दित्वा सद्वादी स्तूयते तच्च पीड्येत ॥ ६ ॥

तस्मात् सगुणवाक्यानि मानान्तराप्राप्तानलौकिकान् गुणान् विदध्युरेव । निर्गुणवाक्यानि तु प्राकृतांस्तान्निषेधेयुरिति व्यवस्था । "मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः ॥ सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदत्वि"ति

स्यादिति षष्ठे पादेऽस्य विस्तरः स्यात् । तत्तदापत्त्येति । षोडशियोगो व्यावहारिकस्तदयोगस्तु पारमार्थिक इति प्रसक्त्या पूर्वमीमांसाविरोधप्रसङ्गादित्यर्थः । न हि जैमिनिनैवमङ्गीकृतमिति भावः । श्रुतसत्त्वस्येति । श्रुत्युक्तस्य सत्तालक्षणस्य ब्रह्मधर्मस्येत्यर्थः । स्फुटमन्यत् । गुणमिथ्यात्ववादिनि दोषद्वयमेतद्दुष्परिहरम् ॥ ६ ॥

उक्तमर्थं योजयति तस्मादिति । विदध्युस्तात्पर्येण प्रतिपादयेयुः । मामित्येकादशे । अगुणाः सत्त्वादिगुणविकारा न भवन्त्यपि तु स्वरूपानुबन्धिन एव ते इत्यर्थः । सत्त्वादय इति

Digitization by Arya Samaj Charitable Foundation, Chennai

स्मरणात्। "स सर्वभूतप्रकृतिर्विकारगुणांश्च दोषांश्च मुने व्यतीत" इति विकारात्मकान् गुणान्निषेधता पुन"रनन्तकल्याणगुणात्मकोऽसा"विति स्वरूपानुबन्धिनः कल्याणगुणान् स्वीकुर्वता श्रीपराशरेण स्फुटीकृतासौ ॥७॥

निर्गुणवाक्येऽपि साक्षित्वादयो धर्मा निर्दिष्टाः। इतरथा निमित्तमन्तरा साक्ष्यादिशब्दास्तस्मिन्न प्रवर्तेरन् समन्वयाध्यायश्च पीड्येत। तत्र खलु गुणान् प्रवृत्तिनिमित्तानि स्वीचकार भगवान् सूत्रकारः—अन्तस्तद्-

---

श्रीवैष्णवे। प्राकृता न सन्तीत्युक्तेरप्राकृताः सन्तीत्यागतम्। ते च शुद्धत्वादयो बोध्याः। उक्तां व्यवस्थां प्रस्फुटयति-स सर्वेति। असौ व्यवस्था ॥ ७ ॥

ननु नैर्गुण्यबोधकानामपि वचसां जागरूकत्वाद्ब्रह्मणो द्वैरूप्यं दुष्परिहरमिति चेत्तत्राह-निर्गुणेति। इतरथा धर्माभावे। निमित्तमन्तरा धर्मं विना। तस्मिन् ब्रह्मणि। अन्तरित्यस्यार्थः। 'य एषोऽन्त'रित्यादि छान्दोग्यवाक्ये। आदित्यान्तःस्थो हरिरेव बोध्यः। कुतः—हिरण्यत्वपुण्डरीकाक्षत्वापहतपाप्मत्वादितद्धर्मोक्तेरिति अन्तर्यामीत्यस्यार्थः। यः पृथिव्यां तिष्ठन्नित्यादिबृहदारण्यकवाक्ये ऽधिदैवादिपदोपेतेषु वाक्येषु श्रुतोऽन्तर्यामी हरिर्बोध्यः। कुतः पृथिव्यादिसर्वविकारनियमनामृतत्वादितद्धर्मोक्तेरिति अदृश्येत्यस्यार्थः। अथ पुरा यया तदक्षरमधिगम्यते यत्तददृश्यमग्राह्यम्। दिव्यो ह्यमूर्तः

Digitization by Arya Samaj Charitable Foundation, Chennai

धर्मोपदेशात्, अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्, अदृश्यत्वादिगुणको धर्मोक्तेः, सर्वधर्मोपपत्तेश्च ॥ ८ ॥

सर्वशब्दावाच्ये लक्षणा तु न समस्तीत्युदितं प्राक्। चिन्मात्रादिशब्दस्य पुनर्लक्षणायां लक्ष्यस्याचैतन्यत्वम्। भागत्यागलक्षणा त्वत्र न सम्भवेद्विरुद्धभागाभावादिति तुच्छमेतत्। इत्थं च निर्गुण इत्यनेन गुणनिषेधाय साक्षित्वादिधर्मानुक्तिरिति बालजल्पितमपि दूरापास्तम्। श्रुतिप्राप्तस्य साक्षित्वादेः श्रुत्यानुवादो न सम्भवतीत्युक्तं प्राक्। तस्मादप्राकृतानन्तगुणरत्नाकरो हरिः सर्ववेदवाच्यः ॥ ९ ॥

पुरुष इति मुण्डकवाक्ये ऽदृश्यत्वादिधर्मा हरिर्बोध्यः। कुतः—यः सर्वज्ञः इत्यादितद्धर्मकथनादिति ॥ ८ ॥

ननु साक्षित्वादिगुणत्यागेन चिन्मात्रं लक्ष्यमिति चेत्तत्राह—सर्वेति। सोऽयं देवदत्त इत्यत्र लक्ष्यं पिण्डमात्रशब्देन वाच्यं दृष्टं—तद्वत्तवापि साक्ष्यादिशब्दलक्ष्यं चिन्मात्रशब्देन वाच्यमेव स्यात्। त्वया खलु सर्वशब्दावाच्यं शुद्धं स्वीक्रियते। कथमधुना तादृशे लक्षणामाश्रयसीति भावः। ननु चिन्मात्रशब्दस्य चेत् पिण्डमात्रशब्दवच्छक्तिं ब्रूषे तस्यापि मया लक्षणा कार्येति चेत्तत्रानिष्टं दर्शयति—चिन्मात्रादीति। चिन्मात्रे सा लक्षणैव न सम्भवतीत्याह—भागेति। श्रुतीति। एकेनोक्तस्यार्थस्य ततोऽन्येन कीर्तनमनुवादः। तस्मादिति। गुणवान् हरिर्वेदवाच्य इत्यर्थः ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्गुणचिन्मात्रं त्वलीकमेव । "न तत्समश्चाभ्यधिकश्च दृश्यते", "मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जये" त्यादिश्रुतिस्मृतिभ्यः। गुणवानेवाऽनुरागविषयो न त्वगुणस्तौच्छ्यात । मोक्षश्च सगुणज्ञानादेव । "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" "भोक्तारं यज्ञतपसां सर्वभूतमहेश्वरम् । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छती" त्यादिस्मृतिभ्यः ॥ १० ॥

ननु विष्णोरेव वेदवाच्यत्वे "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह", "यद्वाचा ऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।

अथ शब्दशक्तेरचिन्त्यत्वादेव प्रवृत्तिनिमित्तानिमित्तानि लक्षणां च विना साक्ष्यादिशब्दाश्चिन्मात्रं प्रकाशयेयुरिति चेत्तत्राह निर्गुणेति । अलीकं मृषा । न तदित्यादिवाक्यैः सगुणादन्यस्य चिन्मात्रस्योत्कृष्टस्य प्रतिषेधात् । तया कुसृष्ट्या स्वगोष्ठ्यां साधितोऽपि निर्गुणो न पुमर्थ इत्याह- गुणवानिति। दुःखहरः सुखार्पकश्चानुरागयोग्यो, न तु तद्विलक्षणः । ततोऽपार्थस्ते श्रम इति भावः । सगुणस्य पुरुषार्थत्वं दर्शयति मोक्षश्चेति । यदेति मुण्डके । भोक्तारमिति श्रीगीतासु ॥ १० ॥

विष्णोः सर्ववेदवाच्यत्वमाक्षिपति-नन्विति । यत इति तै-

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इत्यादिश्रुतेः, "यतोऽप्राप्य निवर्तन्ते वाचश्च मनसा सह । अहं वान्य इमे देवास्तस्मै भगवते नम" इत्यादिस्मृतेश्च का गतिरिति चेन्न । साकल्यावाच्यतायास्तद्गतेर्दर्शयिष्यमाणत्वात् । सार्वइयादयः शब्दाः सार्वइयादिना निमित्तेन भगवति प्रवर्तन्ते । निर्गुणादयस्तु नैर्गुण्यादिनेति कृत्स्नवेदस्य भगवत्परत्वम् । इत्थं च सर्वे वेदा यत्पदमामनन्ति इत्यादिश्रुतिस्मृत्यबाधः ॥ ११ ॥

तदिदं शुद्धस्य पूर्णस्य विष्णोर्वेदवाच्यत्वं भगवता सूत्रकारेणोक्तम्—ईक्षतेर्नाशब्दम-इत्यस्मिन्नधिकरणे वेदेषु वाच्यत्वदर्शनादशब्दं ब्रह्म न भवति किन्तु शब्दवाच्यमेव भवतीति भाषितं च । यत्त्वशब्दमिति प्रधानं व्याचष्टे

त्तिरीयके । यतो ब्रह्मणो वाङ्मनश्च निवर्तत इत्यर्थः । यदिति । केनोपनिषदि । यद्ब्रह्म वाचाऽनभ्युदितं प्रोक्तं नेत्यर्थः । अभ्युद्यते प्रकाश्यते । नेदमिति । इदं मनः प्रभृति ब्रह्म नेत्यर्थः । यदिति न शृणोति न श्रूयते । यत इति तृतीये मैत्रेयवचनात् । का गतिरिति । एषु वाच्यत्वप्रतिषेधाल्लक्ष्यता तु भवेदिति भावः । ततश्च सर्ववेदवाच्यत्वक्षतिरिति स्फुटार्थमन्यत् ॥ ११ ॥

उक्तेऽर्थे व्याससंमतिमाह—तदिदमिति । व्याख्यान्तरं निराकरोति यत्त्विति । व्याचष्टे केवलाद्वैती । तस्यापि प्रधानस्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्र तस्याप्यजामेकामित्यादिशब्दवाच्यत्वात् ॥ १२ ॥

किञ्च विज्ञानकाण्डं साक्षादेव ब्रह्म प्राह—"तं त्वौपनिषदं पुरुषं पृच्छामी"ति श्रुतेः। कर्मकाण्डन्तु ज्ञानाङ्गकर्मप्रतिपादनात् परम्परयेति "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने"-ति श्रुतेः "यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवा" इति स्मृतेश्च ॥ १३ ॥

ननु वृष्टिपुत्रस्वर्गादिफलकानि कर्माणि विदधानोऽसौ प्रतीयते। मैवम्, तथा तद्विधानस्य प्ररोचनाजनकत्वात्। कारीर्यादिफलस्य वृष्ट्यादेर्दृष्टत्वेन वेदे

पीत्यर्थः। अजामेकामित्यादिमन्त्रेऽजाशब्देन प्रधानमुच्यते॥१२॥

ननु ज्ञानकाण्डे विष्णोर्वाच्यता शक्या वक्तुं, कर्मकाण्डे तु न शक्यते वक्तुम्। तत्र हि साङ्गमेतिकर्तव्यताकं कर्मैव प्रतिपाद्यमिति चेत्तत्राह—किञ्च ज्ञानेति। तं त्विति बृहदारण्यके। उपनिषदा प्रतिपाद्यते औपनिषदः। शैषिकोऽण्। तमेतमिति तत्रैव। तं परमात्मानम्। अत्र वेदानुवचनादीनां कर्मणां विविदिषाङ्गत्वं विस्फुटम्। यत इति श्रीगीतासु। सिद्धिं स्वपरात्मज्ञानलक्षणाम् ॥ १३ ॥

अत्राशङ्कते—नन्विति। 'कारीर्यां यजेत वृष्टिकाम' इत्यादिको वेदो वृष्ट्यादिफलकानि कर्माणि विधत्ते न तु विष्णुफलकं

Digitization by Arya Samaj Charitable Foundation, Chennai

सश्रद्धस्य तदभिरुच्या तदर्थं सम्यग्विचारयतो "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात् प्रैति स कृपण इत्यब्रह्मज्ञस्य दैन्यं तमेतं वेदानुवचनेने"त्यादिना कर्मणां तज्ज्ञानाङ्गताञ्च विजानतो निष्कामानि तान्यनुतिष्ठतो ब्रह्मधिषणामसौ जनयतीति सिद्धं तस्य सर्वस्य तत्परत्वम् ॥ १४ ॥

यदुक्तम्—"परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यं लभते सिद्धिं रोचनार्था फलश्रुति"रिति कामितस्यैव स्व-

---

ज्ञानमित्यर्थः । ज्ञानकाण्डमपि क्रत्वर्थकर्तृदेवताप्रतिपादनात् कर्मपरमेवेति भावः । निरस्यति मैवमिति । तथेति । वृष्ट्यादिफलकतयेत्यर्थः । प्ररोचना रुचिः । तज्जनकतामकारमाह—कारीर्यादीनि । यो वा इति बृहदारण्यके । अक्षरं ब्रह्म । प्रैति परलोकं याति म्रियत इत्यर्थः । तानि कर्माणि । अनुतिष्ठतः कुर्वतः । असौ वेदः ॥ १४ ॥

उक्तां व्यवस्थां प्रमाणयति—यदुक्तमित्यादिना । परोक्षेत्येकादशे । वेदः कर्ममोक्षाय कर्माणि विधत्ते न तु वृष्टिपुत्राद्यर्थम् । यदयं परोक्षवाद आकृत्यार्थवक्ता बालानामनुशासने यथा भवति तथा । तत्र दृष्टान्तोऽगदं यथेति । कटुकमौषधं पाययन् पिता यथा फाणितेन प्रलोभयन् पाययति दत्ते च तत् , न चौ-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्गादेः फलत्वेन प्रतीतेरकामितोऽसौ न भवेत् । किन्तु चित्तशुद्धिरेव ज्ञानोदयार्था भवेदिति ॥१५॥

एतेनेदं च निरस्तम् । तथा हि—नवीनाः कल्पयन्ति । आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वादिति विधिकाण्डे कृत्स्नस्य वेदस्य क्रियापरत्वनिरूपणान्न तस्य विष्णुपरत्वम् । तत्र कर्मकाण्डं साक्षादेव क्रियां निरूपयति । ज्ञानकाण्डन्तु तदङ्गभूतकर्तृदेवताप्रकाशनद्वारैवेति ॥ १६ ॥

षधपानस्य फाणितलाभः फलं किन्त्वारोग्यमेव; तथा वृष्ट्यादिफलैः प्रलोभयन् वेदः कर्ममोक्षाय कर्माणि विधत्ते । तस्माद्वेदोक्तमेव कुर्वाणो न तु तन्निषिद्धम् । ननु कर्मणि कर्तुः प्रीतिस्तत्फलं च स्यादेव न तु नैष्कर्म्यसिद्धिरिति चेत्तत्राह—निःसङ्गोऽभिनिवेशशून्यः । ईश्वरेऽर्पितं न तु फलोद्देशेन । ननु श्रुतत्वात् फलं स्यादेवेति चेत्तत्राह—रोचनार्थेति । औषधपाने फाणितदर्शनवदित्यर्थः ॥ १५ ॥

एतेनेति । सर्वस्य वेदस्य विष्णुपरत्वनिरूपणेन । इदं वक्ष्यमाणं सर्वस्य वेदस्य क्रियापरत्वम् । नवीनाः प्रभाकरादयः । विधिकाण्डे कर्ममीमांसायाम् । क्रियामग्निहोत्रादिकाम् । ज्ञानकाण्डं त्विति । तत्र यज्जीवप्रतिपादनं तत्कर्मकर्तुर्यजमानस्य यच्च विष्णोस्तत्कर्मेज्याया देवताया इति कर्मगयोरुभयोः प्रतिपादनमित्यर्थः ॥ १६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्तु प्रकरणभेदा "तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत" इत्यादिना क्रियाफलविगानाच्च न ज्ञानकाण्डं क्रियापरं किन्तु ब्रह्मपरमेवेति वदन्ति, तत्र भूतार्थविषयत्वे नैरर्थक्यप्राप्तेः "स्वर्गकामो यजेत" "तस्माद् ब्राह्मणः सुरां न पिबेदि"त्यादीनि प्रवृत्तिनिवृत्तिबोधकान्येव वाक्यान्यर्थवन्ति वीक्ष्यन्ते, न तु सप्तद्वीपा वसुन्धरेत्यादीनि भूतवस्तुपराणि । तस्मात् कृत्स्नस्य क्रियापरत्वमिति ॥१७॥

तदिदं करकृतद्युमणिपिधानवदुपहासास्पन्दं कुबुद्धिविजृम्भितं "सर्वे वेदा यत्पदमामनन्ती"त्यादिश्रुतिस्मृतिभ्यः, ईदृशजैमिन्युक्त्यदर्शनाच्च । आम्नायस्ये-

---

सिद्धान्तयुक्तिं श्लथयति—यत्त्विति । प्रकारेणेति । कर्मकाण्डाज्ज्ञानकाण्डस्य भिन्नत्वाद् भिन्नविषयत्वाच्चेत्यर्थः । ननु कर्माङ्गकर्तृदेवताप्रतिपादकत्वाज्ज्ञानकाण्डस्य कर्मकाण्डानुगतिर्भविष्यतीति चेज्ज्ञानकाण्डे कर्मफलनिन्दनान्न भविष्यतीत्याह—तद्यथेति छान्दोग्ये । कर्मजितो दुर्गादिः पुण्यजितो स्वर्गादिः । भूतार्थेति । ज्ञानकाण्डस्यानादिसिद्धजीवेशप्रतिपादकत्वे निष्फलत्वप्रसङ्गादित्यर्थः । क्रियापरस्य ग्रन्थस्य सफलत्वं सिद्धवस्तुपरस्य तु निष्फलत्वं दर्शयति स्वर्गेत्यादिना । प्रकटार्थम् ॥१७॥

प्रत्याचष्टे तदिदमित्यादिना । सर्वे वेदा इति । आदिशब्दाद्वेदैश्च सर्वैरहमेव वेद्य इत्यादि ग्राह्यम् । ईदृशेति । एतदर्थकजैमिनि-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्यनेन कृत्स्नस्य कर्मकाण्डस्य क्रियापरत्वे संश्रिते तदन्तर्गतानां सोऽरोदीदित्यादीनां केषाञ्चिद्वाक्यानां तदेकवाक्यत्वाय तद्भूतानामिति समर्थनम् ॥ १८ ॥

तथा हि—आम्नायस्येति पूर्वपक्षसूत्रम् । तस्यार्थः—चोदनालक्षणो धर्म इत्युपक्रमात् तस्य ज्ञानमुपदेश इति मध्ये परामर्शात्तद्भूतानामित्युपसंहाराच्चाम्नायः क्रियार्थ इत्यवगम्यते । ततश्चाम्नायस्य वेदस्य क्रियार्थत्वाद्यज्ञादिक्रियापरत्वादतदर्थानां पुरुषानधीनार्थत्वेन विधौ पर्यवसायितुमशक्यानां सोऽरोदीत्तद्रोदीत्तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदत् । देवा वै देवयजनमध्यवसाय दिशो न प्रजानन्नित्येवमादीनां च वेदवाक्यानामानर्थक्यं धर्मप्रमितिरूपार्थप्रतिपादकत्वविरहः । तस्मादेवंजातीयकं वाक्यजातमनित्यमुच्यते । अनित्यमिव न त्व-

---

वाक्यालाभाच्चेत्यर्थः । ननु तद्भूतानामिति जैमिनिवाक्यं दृश्यते इति चेत्तत्राह—आम्नायस्येत्यादि ॥ १८ ॥

तथा हीति । कर्मकाण्डस्यैव जैमिनिमते क्रियापरत्वं न तु ज्ञानकाण्डस्यापीति पूर्वोक्तमर्थं दर्शयतीत्यर्थः । चोदनेत्यादीनि जैमिनिसूत्राणि बोध्यानि । अतदर्थानां अक्रियार्थानां वाक्यानामित्यन्वयः । नित्यत्वेति । औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति

Digitization by Arya Samaj Charitable Foundation, Chennai

नित्यमेव । अपौरूषेयत्वान्नित्यत्वाभ्युपगतिविरोधाच्च । रोदनवयोत्खातदिगज्ञानादिरूपसिद्धार्थबोधकत्वात्तस्या-क्रियार्थत्वम् ॥ १९ ॥

जैमिनिना वेदस्य तदर्थस्य तयोः सम्बन्धस्य च नित्यत्वं स्वीकृतम् । तस्य स्वीकारस्य विरोधापत्तेश्चेत्यर्थः ॥ १९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्भूतानामिति सिद्धान्तसूत्रम्, तस्यायमर्थः । तेषु पदार्थेषु रोदनादिषु भूतानां वर्तमानानां पदानां सोऽरोदीदित्यादीनां क्रियार्थेन पदेन यजेतेत्यादिना समाम्नायः समुच्चारणं सम्बन्ध इति यावत् । कुतः ? अर्थस्य तन्निमित्तत्वात् । अर्थः पदार्थस्तस्य तन्निमित्तत्वाद्वाक्यार्थप्रत्ययनिमित्तत्वात् । पदानि तावत् स्वार्थानभिदधति । पश्चात्ते पदार्था आकाङ्क्षायोग्यतासन्निधिसाचिव्याद् वाक्यार्थमवबोधयन्तीति । तस्मादाकाङ्क्षादिमहिम्ना सोऽरोदीदित्यादिवाक्यानां कथञ्चिद् विध्येकवाक्यता कल्प्येति ते क्रियायां तथा तथाविष्टा बभूवुस्तस्मादन्यैरप्यावेशेन सा कार्येति । न च जैमिनिना तेषां वाक्यार्थानां स्वार्थे प्रामाण्यं त्यक्तम् । औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति शब्दार्थसम्बन्धनित्यत्वस्वीकारविरोधात् सर्वेषां प्रमाणानां स्वविषयावगतिपर्य्यवसायित्वाच्च ॥ २० ॥

तद्भूतानामित्यादिकं प्रायः प्रकटार्थम् । औत्पत्तिकस्त्विति जैमिनिसूत्रखण्डः । वेदशब्दस्य तदर्थस्यौत्पत्तिकः स्वाभाविकः सम्बन्ध इत्यर्थः । सर्वेषामिति । प्रत्यक्षादीनि प्रमाणानि स्वविषयाणां घटादीनामवगतिषु ज्ञानेषु पर्य्यवस्यन्त्यन्यथा तेषां प्रमाणत्वं हीयेत । प्रमाजनकं खलु प्रमाणमुच्यते ॥ २० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

न च ज्ञानकाण्डस्यापि कर्मकाण्डैकवाक्यता शक्या वक्तुं प्रकरणभेदात् श्रुतहान्यश्रुतकल्पनप्रसङ्गात्। प्रत्युत कर्मतत्फलयोस्तुच्छतया प्रतिपादनाच्च ॥ २१ ॥

न च प्रवृत्तिनिवृत्तिपरताविरहिणो भूतात्मवस्तुविषयस्य ज्ञानकाण्डस्य 'ससद्वीपा वसुन्धरे'त्यादिवाक्यवदानर्थक्यम् । तस्य ब्रह्मास्तित्वबोधनेनैवार्थवत्त्वात् निधिसत्त्वावबोधिवाक्यवत् । यथा त्वद्गृहे निधिरस्तीत्याप्तवाक्यात् पुंसो हर्षरूपोऽर्थो भवेत्तथा परमानन्दरूपं मदंशि ब्रह्मास्तीति तत्सत्त्वावगमात् स इति नाऽनर्थक्यप्राप्तिस्ततस्तदर्थाप्रवृत्तिश्च । पुत्रस्ते जातो नाऽयं सर्प इति स्वरूपपरेष्वपि वाक्येषु हर्षभयनिवृत्तिरूपोऽर्थो

यच्चूक्तं ज्ञानकाण्डमपि कर्माङ्गकर्त्रादिप्रतिपादनेन कर्मकाण्डानुगामीति तदिदानीं निराकरोति—न च ज्ञानेति । श्रुतेति । ज्ञानकाण्डस्यात्मपरत्वं श्रुतं हीयेत । अश्रुतं कर्मपरत्वं कल्प्यं स्यादित्यर्थः । प्रत्युतेति । प्लवा ह्येते अदृढा यज्ञरूपा इति कर्म। तद्यथेहेति। कर्मफलं स्वश्च ज्ञानकाण्डेन निन्द्यते । तस्य कथं कर्मकाण्डानुसारित्वमित्यर्थः ॥ २१ ॥

यच्चोक्तं—प्रवृत्तिनिवृत्तिक्रियाबोधकानि वाक्यानि फलवन्ति न तु सिद्धवस्तुबोधकानि तथेति तन्निरस्यति—न च प्रवृत्तीति । भूतात्मेति । पूर्वसिद्धजीवब्रह्मप्रतिपादकस्येत्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

दृष्टः । तस्मादानर्थक्यवादः पुमर्थानुपयोग्युपाख्यानादि-भूतार्थविषयो बोध्यः । इतरथा प्रतिषेधकानामपि तत्प्राप्तिरक्रियार्थत्वात् । 'न सुरां पिबे'दिति हि निवृत्ति-रुपदिष्टा' न तु सा क्रिया, किन्तु प्रसक्तक्रियानिवृत्त्यौ-दासीन्यमेवेति ॥ २२ ॥

किञ्च द्विरूपं ब्रह्मेति जैमिनेरभिमतम्—अनुष्ठेयं क्रियारूपं प्राप्यं चित्सुखरूपं चेति । 'यज्ञो वै विष्णु'रिति 'ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्मे'ति चैवमादिश्रुतेः । तत्र पूर्वानुष्ठानमन्तरा परप्राप्तिर्न स्यादिति तत्रैव तद्भरः । ब्रह्मनिष्ठा तु तस्य

आनर्थक्यं फलसत्त्वावगमाद् ब्रह्मास्तित्वज्ञानात् परमानन्दरूपो-ऽर्थः । तदर्थाप्रवृत्तिस्तत्प्रापिका श्रवणमननादिः । लौकिकार्थं दृ-ष्टान्तयति पुत्रस्ते इति । ननु तर्ह्याम्नायस्येति सूत्रोक्त आनर्थ-क्यवादः क नेयस्तत्राह तस्मादिति । इतरथेति । क्रियार्थभिन्नानां सर्वेषां वाक्यानामानर्थक्येऽङ्गीकृते सतीत्यर्थः । प्रतिषेधकानां 'न सुरा'मित्यादीनाम् ॥ २२ ॥

जैमिनेर्हरिभक्तत्वं प्रतिपादयति किञ्च द्वीति । अनुष्ठेयमिति । ब्रह्मणः क्रियारूपत्वं वेदराशित्ववद् वाचनिकं बोध्यम् । तदेषे-ति । तद् ब्रह्माऽभिमुखीकृत्यैषा ऋक् प्रवृत्तेत्यर्थः । पूर्वेति । य-ज्ञादिकरणं विनेत्यर्थः । परप्राप्तिश्चित्सुखब्रह्मलाभः । तत्रैवेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

बादरायणभगवच्छिष्यत्वात्, तेन तन्मतोपन्यासाच्च । तस्माद् ब्रह्मैव वेदवाच्यमिति निर्णीतम् ॥ २३ ॥

ननु 'सर्वे वेदा यत्पदमामनन्ति' 'यद् वाचाऽनभ्युदित'मित्यादिषु वाच्यत्वावाच्यत्वयोः श्रवणादेवं प्रतीयते । मायोपाधिरीश्वरो वेदवाच्यो निर्विशेषः । शुद्धस्तु तल्लक्ष्य एव भवेत् । न च शुद्धे शब्दप्रवृत्तिनिमित्तं नामजात्यादि किञ्चिदस्ति अनामरूपत्वस्मरणादिति । मैवम् । वेदवाच्यस्यैवेश्वरस्य शुद्धत्वात् । 'सत्त्वादयो न सन्तीशे' इत्यादिस्मृतिभ्यः । तस्य निर्विशेषत्वं तु न पूर्वत्र स्वरूपानुबन्धिगुणस्मरणात् डित्थादिवत् । कल्पितं नामादि तस्य तस्य नास्ति स्वरूपानुबन्धि, दिव्यन्तु तदस्तीति पुरतः स्फुटीभविष्यतीति ॥ २४ ॥

यज्ञाद्यनुष्ठाने । तद्धरो जैमिनेरभिनिवेश इत्यर्थः । ब्रह्मनिष्ठेति । तस्य जैमिनेः । तेन बादरायणेन तस्य जैमिनिमतस्य स्वसूत्रेषूपन्यासात् ॥ २३ ॥

एवं कर्मठेष्वनीश्वरेषु प्रभाकरादिषु निरस्तेषु पुरा निरस्तोऽपि निर्विशेषाविदैक्यवादी निस्त्रपः पुनः शङ्कते—नन्विति । न चेति । नाम संज्ञा । तस्येति । वेदवाच्यस्य शुद्धस्य । पूर्वत्र ग्रन्थे । तदिति नामादीत्यर्थः ॥ २४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मादेवमत्र बोध्यम्। स भगवान् स्वयमेव वेदरूपः स्वरूपानुबन्धिभिस्तत्सिद्धैर्नामभिर्गोचरीभवतीति। 'नमो वेदादिरूपाय ॐकाराय नमो नमः' 'तस्य वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद' इत्यादिश्रवणात्। 'वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुम'—इत्यादिस्मृतेश्च। अत औपनिषद इति परात्मनः समाख्या ॥ २५ ॥

वेदस्य नित्यत्वञ्च भगवता सूत्रकारेणाऽभिहितम्—'अत एव च नित्यत्वमि'ति। न च वर्णमात्रस्य तस्य सा स्तुतिरिति वाच्यम्। आविर्भावान्तरवद्वर्णात्मकोऽयं

शुद्धस्य वेदवाच्यत्वं वक्तुं प्रवर्तते तस्मादेवमिति। अत्र वेदान्तशास्त्रे। त्वयाप्येवं मन्तव्यम्। कथमिति चेत्तत्राह—स भगवानित्यादि। तत्सिद्धैर्वेदात्मकैर्नामभिर्गोचरीभवतीति वाच्योऽस्ति। नम इति श्रीरामोपनिषदि। तस्येति बृहदारण्यके। इह भगवत्प्राणत्वं वेदस्योक्तम्। वेद इति षष्ठे। अतः स्वात्मकवेदवाच्यत्वात्। समाख्या यौगिकः शब्दः ॥ २५ ॥

ननु वेदस्य शब्दराशित्वेन तृतीयक्षणध्वंसप्रतियोगित्वादनित्यत्वमिति चेत्तत्राह—वेदस्येति। अत इति ब्रह्मसूत्रम्। नित्येन्द्राद्याकृतिवाचित्वात् कर्तुरस्मरणाच्च वेदस्य नित्यत्वमित्यर्थः। तस्याविर्भावतिरोभावौ स्तः। तावज्ञैरुत्पत्तिविनाशौ कथ्येते इति भावः।

Digitization by Arya Samaj Charitable Foundation, Chennai

परस्याविर्भाव इति तेनैव श्रुत्यादिबलेन गृहीते तदभेदे तत्तत्सम्भवात् ॥ २६ ॥

अत एव तद्भूतानां नाम्नां चिद्रूपतामोचकता कार्त्स्न्यागोचरता च स्वरूपवदेव निरूपिता दृश्यते। 'तमु स्तोतारःपूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्त्तन। आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे' 'ॐ तत्स'दिति ऋक्श्रुतौ। 'सकृदुच्चारितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं

तस्य वेदस्य सा भगवदात्मकता नित्यता च स्तुतिः प्रशंसेत्यर्थः। आविरिति। यथा देवाकारस्य हरेर्हंसमत्स्यादिर्विजातीयाकार आविर्भावस्तथा वर्णराशिर्वेदोऽपि तस्याविर्भाव इति। नमो वेदादिरूपायेत्यादिबलेनैव लब्धे तदभेद भगवदैक्ये वर्णराशेर्वेदस्यापि नित्यत्वचिद्रूपत्वादिसंभवादित्यर्थः ॥ २६ ॥

आर्थिकं चिद्रूपत्वादि वाचनिकं कर्तुं प्रयतते—अत इति। भगवद्रूपत्वादेवेत्यर्थः। तद्भूतानां वेदात्मकानाम्। तमिति। उ संबोधने हे विष्णो! यथाविदो यथार्थज्ञा वयं पूर्व्वमनादिं ऋतस्य सत्यस्य परव्योम्नो गर्भं गर्भवत्तस्मिन्निहितं तं त्वां स्तोतारः स्तुतवन्तः। जनुषा जन्मचरितेन पिपर्त्तन पूरयतः अस्य ते नाम आ ईषज्जानन्तः विवक्तन केवलं तद्ब्रुवाणाः सुमतिं त्वद्विषयां विद्यां भजामहे। कीदृशं नाम चिद्विज्ञानस्वरूपम्, अतो महः स्वप्रकाशम्। तन्नाम किञ्चिन्निर्दिशति ॐमिति। एवमुक्तं श्रीगीतासु—ॐतत्स-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रती'त्यादौ'नामकर्मस्वरूपाणि न परिच्छेदगोचरे(?)। यस्या-ऽखिलप्रमाणानां स विष्णुर्गर्भगस्तत्रे'त्यादौ च स्मृतौ॥ २७॥

एवं सति यदनात्मत्वं क्वचिदुच्यते तत्तु 'अप्रसिद्धे-स्तद्गुणानामनामासौ प्रकीर्तितः। अनामा सोऽप्रसिद्ध-त्वादरूपो भूतवर्जना'दित्यादि स्मृत्या समाधेयम् ।

दिति निर्देशो ब्रह्मणास्त्रिविधः स्मृत' इति। 'ॐमित्येतत् ब्रह्मणो ने-दिष्ठं नामे'ति'तत्त्वमसी'ति 'स सदेव सौम्ये'ति च श्रुतेरोङ्कारादीनि त्रीणि परमात्मनो नामानि भवन्ति। कृष्णादिनाम्नामुपलक्षणमे-तत्। मोचकतामुदाहरति सकृदिति। भारतेऽनुस्मृतौ दृष्टम्। कार्त्स्न्येनाऽगोचरतामुदाहरति—नामकर्मेति श्रीवैष्णवे। अत्र स्व-रूपस्येव नामकर्मणोश्च कार्त्स्न्येन प्रमाणविषयतोक्ता॥ २७॥

न तु—'अनामरूप एवायं भगवान् हरिरीश्वरः। अकर्तेति च यो वेदैः स्मृतिभिश्चाभिधीयते' ॥ इत्यादीनि ब्राह्मादिवाक्यानि कथं सङ्गतिमन्तीति तत्राह—एवं सतीति। स्वरूपानुबन्धिनामरूपत्वे निर्णीते सतीत्यर्थः। अप्रसिद्धेरिति। वासुदेवाध्यातये एतदर्थकान-न्तरम्-'अप्राकृतत्वाद्रूपस्याप्यरूपोऽसावुदीर्य्यते। सम्बन्धेन प्रधा-नस्य हरेर्नास्त्येव कर्तृता। अकर्तारमतः प्राहुः पुराणं तं पुरा-विदः'॥ इति सार्द्धकम्बोध्यम। अनामासौ इति ब्राह्मे। प्राकृतेति। देवमानवादिसाम्येन ग्रहणादित्यर्थः। 'न नामरूपे गुणजन्मकर्मभि-र्निरूपितव्ये तव तस्य साक्षिणः। मनोवचोभ्यामनुमेयवर्त्मनो देवक्रियायां प्रति यं तथापि ही'ति श्रीदशमवाक्ये तु हे देव! साक्षिणस्तव गुणादिभिर्ये नामरूपे ते ह्यप्रसिद्धेर्निरूपितव्ये विः

Digitization by Arya Samaj Charitable Foundation, Chennai

अप्रसिद्धिश्च प्राकृतवैलक्षण्येनाऽग्रहात्कार्त्स्न्येनाऽविदिततया वा ॥ २८ ॥

तथा—'न यत्र नाथ विद्यन्ते नामजात्यादिकल्पनाः। तद् ब्रह्म परमं नित्यमविकारि भवानज ॥ न कल्पनामृतेऽर्थस्य सर्वस्याधिगमो यतः। अतः कृष्णाऽच्युता-

---

दुषामपि याथात्म्येनाऽनुभवितुं शक्ये न भवतस्तथापि क्रियायां शुद्धभक्तौ सत्यां भक्तास्ते प्रतियान्ति याथात्म्येनाऽनुभवन्त्येव। तेषामनुभवस्त्वनुमानेन ज्ञायत इत्याह—मन इति। निवृत्तिमता मनसा कीर्तनवता वचसा च लिङ्गेनाऽनुमेयं वर्त्म प्रेमपद्धतिर्यस्य तवेति व्याख्येयम्। सर्वथा नामरूपाभावे तु तन्निरूपकानि वचांसि व्याकुप्येयुः। 'न विद्यते यस्य च जन्मकर्म वा न नामरूपे गुणदोष एव वा। तथापि लोकाप्ययसम्भवाय यः स्वमायया तान्यनुकालमृच्छती'त्यष्टमवाक्ये तु यस्य प्राकृतानि जन्मादीनि न सन्ति तथापि यो लोकाप्ययसम्भवाय जगत्संहारसर्गार्थमनुकालं तत्तदवसरे स्वमायया कपर्दिपद्मभूरूपधरः संस्तानृच्छति प्राप्नोतीति व्याख्यानान्न कोऽपि सन्देहगन्धः। अत्र लोकस्थितये विष्णुरूपधरः सन् जन्मादीनृच्छतीति नोक्तम्। तज्जन्मादीनाममायिकत्वादिति ज्ञेयम् ॥ २८ ॥

तथेति। अप्रसिद्धेस्तद्गुणानामित्यादिस्मृतिदृष्ट्या यथाऽनामरूप एव यमित्यादिवाक्यानां प्रातीतिकोऽर्थो निरस्तस्तथाऽनुपपत्तिदर्शनेन यत्र नाथेत्यादिवैष्णववाक्ययोः प्रातीतिकोऽर्थो

Digitization by Arya Samaj Charitable Foundation, Chennai

ऽनन्त विष्णुनामभिरीड्यसे' ॥ इत्यक्रूरोक्तौ स्फुटार्थोऽपि निरस्तः ॥ २९ ॥

तत्र कल्पनाशब्दो व्यर्थः, नामजात्यादयो नेत्यनेनैवेष्टसिद्धेः । स्वयमेव तत्रैव तद् ब्रह्म परमं नित्यमिति परत्र च रूपं परं सदिति वाचकमक्षरं यदिति ब्रह्माजसच्छब्दानां पारमार्थिकनामतया स्वीकाराच्च । 'अजामेका'मित्यादिष्वजत्वलक्षणा जातिश्च प्रतीता । तथा नामादिकल्पनां निषिध्य पुनः कृष्णादिनामकल्पनोक्तिर्विरुद्धा । न च कल्पनया तस्येड्यभावः, नापि कृष्णादिनामनियमस्तस्यामनियमात्मकत्वात् ॥ ३० ॥

तस्मादयमेव तदर्थः—यत्र कृष्णादिशब्दानां जा-

निरसनीय इत्यर्थः ॥ २९ ॥

मुख्यार्थानुपपत्तिं तावदाहुः—तत्रेत्यादिना । इष्टसिद्धेरनात्वनिष्पत्तेः । स्वयमक्रूरेणैव । अजामिति । प्रकृतिजीवेश्वरा अजास्तेष्वजत्वं जातिर्नित्यत्वे सत्यनेकसमवेतत्वात् । न चेति । तस्य सर्वेशस्य कृष्णस्य । ईड्यभावः स्तुत्यता । तस्यां कल्पनायां अनियमात्मकत्वादिति कल्पनायां नियमो नास्ति मनुष्यपश्वादिषु देवदत्तादिडित्थादिनाम्नां यथेच्छं कल्पनीयत्वदर्शनात् । न चैवं प्रकृते शक्यते वक्तुं तत्र नामसहस्रस्य नियमेनोक्तम् ॥ ३० ॥

पूर्वपक्षव्याख्यां दूषयित्वा सिद्धान्तव्याख्यामाह—तस्मा-

Digitization by Arya Samaj Charitable Foundation, Chennai

तीनां देवत्वमनुष्यत्वादीनामादिपदात् कर्मणां च कल्पना न, किन्तु—'विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवाञ्छितम्। स्वतेजसा नित्यनिरस्तमायागुणप्रवाहं भगवन्तमीमही'त्युक्तदिशा स्वरूपशक्तिविलासात्मकान्येव तानि सन्ति तद् ब्रह्म भवानित्यन्वयः। प्रपञ्चवैलक्षण्यात्तथेत्याह नेति। सर्वस्यार्थस्य मनुष्यपश्वादिदृष्टवस्तुनः कल्पनां नामादिघटनां विना नाधिगमो व्यवहारेषु बोधो न स्यात्। कल्पितैरेव नामादिभिस्तस्याऽसौ भवेदित्यर्थः। अतस्तद्विलक्षणस्त्वं तद्विलक्षणैरेव विष्णुनामभिर्विष्ण्वात्मकैर्नामभिर्व्यापकनामाभिर्भैरिति यावत्। ईड्यसे स्तूयसे व्यक्तमाहात्म्यीक्रियसे इत्यर्थः। तादृशैरेव तैस्तव महिमा व्यक्तीभवतीत्यर्थः। नाम्नां तादृक्त्वन्तु—'नामचिन्तामणिः कृष्णश्चैतन्यरसविग्रहः। पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामि-

---

दिति। पूर्वपक्षिव्याख्याया निरस्तत्वादित्यर्थः। कल्पना आरोपः। विशुद्धविज्ञानेति श्रीदशमे नारदवाक्यम्। स्वसंस्थया स्वानुबन्धिन्या पराख्यया शक्त्या सम्यगाप्ताः सर्वे नामगुणविभूतिरूपा अर्था येन तम्। नामादीनां मायिकत्वं निराकुर्वन् विशिनष्टि स्वचेतसीति। परात्मकेन प्रभावेणेत्यर्थः। तस्येति। मनु-

Digitization by Arya Samaj Charitable Foundation, Chennai

नो'रिति स्मृतेः । कृष्णादिकं सम्बुध्यन्तम् ॥ ३१ ॥

तस्मात् पूर्णः शुद्धो हरिरेव वेदवाच्यः । स च वेदः कृष्णादिशब्दैराश्रयभूतं शुद्धं विभुचैतन्यं प्रतिपादयति । जीवप्रकृतिकालादिशब्दैस्तु चिज्जडात्मकमाश्रितमिति सिद्धं सर्ववेदवेद्यत्वम् । इत्थाञ्चानामादिशब्दाः सर्वत्र व्याख्याताः । यस्तु तेषां स्फुटार्थं जल्पति स एवं प्रष्टव्यः—तैर्ब्रह्मणो बोधः स्यान्न वेति । आद्ये तेपि तस्याख्याः । अन्त्ये तदारम्भवैय्यर्थ्यापत्तिः । सर्वशब्दावाच्ये लक्षणा तु न सम्भवति ॥ ३२ ॥

'यतो वाचो निवर्तन्ते' 'यद्वाचाऽनभ्युदित'मित्यादिषु

ष्यपश्वादेर्दृष्टवस्तुनः । असावधिगमः तद्विलक्षणः प्रपञ्चाविजातीयः । तादृक्त्वं विष्ण्वात्मकत्वम् । नामेति पादूमे । कृष्णादीति । हे कृष्ण हे अच्युत हे अनन्तेति सम्बोधनविभक्त्यन्तमित्यर्थः ॥३१॥

प्रकरणार्थं सङ्गमयति तस्मादिति । विकसितार्थम् । इत्थमिति । अप्रसिद्धगुणतयाऽनामशब्दः अभौतिकमूर्तितयाऽरूपशब्दश्च व्याकृत इत्यर्थः । तेषामित्यनामादिशब्दानां स्फुटार्थं नामरूपशून्यतारूपम् । तैरित्यनामादिशब्दैः । आद्ये बोधः स्यादिति पक्षे । अन्त्ये बोधो न स्यादिति पक्षे । यद्यनामादिशब्देष्वपि लक्षणाऽऽश्रीयते तर्हि सापि त्वन्मते न सम्भवतीत्याह सर्वेति । पूर्वमभाणीत्येतत् ॥ ३२ ॥

अनामादित्वेऽरूपादित्वे च यां दुर्धियः श्रुतिमुदाहरन्ति न तया

Digitization by Arya Samaj Charitable Foundation, Chennai

साकल्येन वाच्यत्वं तस्य निषिध्यते। न तु सर्वथैवा-ऽवाच्यत्वमुच्यते, 'सर्वे वेदा यत्पदमामनन्ती'त्यादिश्रुति-स्मृतिनिर्विषयतापत्तेर्यत इत्यपादाननिर्देशानुपपत्तेश्च। अतस्तत्र तत्रैव—'आनन्दं ब्रह्मणो विद्वा'निति। 'तदेव ब्रह्मत्वं विद्धी'ति च पुनस्तस्य गोचरत्वमुक्तम्॥ ३३॥

एवमेव केनोपनिषदि ज्ञातत्वाज्ञातत्वे दृश्येते। 'यदि मन्यसे सुवेदेति दहरमेवापि नूनम्। त्वं वेत्थ ब्रह्म-णो रूपं यदस्य त्वं यदस्य दैवेष्वथ मीमांस्यमेव ते मन्ये विदितम्। नाहं मन्ये सुवेदेति नो न वेदेति वेद च। यो नस्तद्वेद तद्वेद नो न वेदेति वेद च। यस्यामतं तस्य मतं

तत्त्वं लब्धुं शक्यमित्याह यत इत्यादिना। यत इत्यपादानेति। गङ्गातो निवृत्तो विप्र इत्यत्र गङ्गादर्शनं किञ्चिदायात्येवेति भावात्तत्र तत्रैव तद्वाक्यान्त एवेत्यर्थः। तस्य ब्रह्मणो गोचरत्वं वाग्विषयत्वमुक्तम्॥ ३३॥

स्वशक्त्यनुसारेण ब्रह्मणः प्रतिपादनं न तु सामस्त्येनेत्युक्तां व्यवस्थां द्रढयत्येवमिति। अस्मदुक्तप्रकारेणेत्यर्थः। शिष्ये ज्ञानाभिमानमालक्ष्य गुरुराह यदीति। हे शिष्य अहं ब्रह्म सुवेद सुष्ठु वेद्मीति यदि मन्यसे तर्हि तव तज्ज्ञानं नूनं दहर-मल्पमेव। तदेवाक्षिपन् गुरुराह। हे शिष्य अस्य ब्रह्मणो यद्रूपं तत्त्वं वेत्थ जानासि यदस्य देवेषु नियन्तृतया स्थितं रूपं तत्त्वं वे-

Digitization by Arya Samaj Charitable Foundation, Chennai

मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानतामि'ति। इह हि कार्त्स्न्येन ज्ञातत्वमविज्ञातत्वञ्च नास्ति किञ्चिज्ज्ञातत्वमस्त्येवेति निर्णीयते। एवं हि स्मरन्ति 'कार्त्स्न्येन नाऽज्ञोप्यभिधातुमीश' इति। 'अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तितः। अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृत'मिति। अप्रसिद्धिः कार्त्स्न्येनाऽवाच्यतादिः ॥ ३४ ॥

ननु कार्त्स्न्येनाऽवाच्यत्वादिकं कुत इति चेदान-

त्थेति। न वेद्मेति चेत्तत्राह। तद्रूपं ते मीमांस्यमेव सतीर्थ्यैः सह विचार्य्यमेवेत्यर्थः। गुरोराशयमालक्ष्य शिष्य आह मन्ये इति। हे गुरो तद् ब्रह्माहमधुना विदितं ज्ञातं मन्ये कथमित्यत्राह तद्ब्रह्माऽहं सुवेद सम्यग् वेद्मीति न मन्ये। न वेद न वेद्मीति च नो मन्ये किन्तु कथञ्चित्तद्वेद च। चेवेत्यर्थः। एवं स्वज्ञाने दर्शितां विधामन्येषामाह य इति। नोऽस्माकं सतीर्थ्यानां मध्ये यस्तद्ब्रह्म वेद स एवं वेद। तां विधां दर्शयति नो नेति। न वेदेति च। नो नास्ति किन्तु कथञ्चिद्वेदेत्यर्थः। एतदेव पुनर्द्रढयति यस्येति। विजानतां विज्ञानाभिमानिनां, अविजानतां विज्ञानाभिमानशून्यानाम्। उक्तमर्थं स्मृत्या स्फुटयति एवं हीति। कार्त्स्न्येनेति श्रीदशमे। अजो ब्रह्मापीत्यर्थः। अप्रसिद्धेरिति। काण्डेषु त्रिष्वेतत्पदं योज्यम्। परं ब्रह्मतत्त्वम्। ३४॥

कार्त्स्न्येनाऽवाच्यत्वे हेतुं पृच्छति नन्विति। जन्मेति श्रीद-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्यादिति गृहाण। यदुक्तम्—'जन्मकर्माभिधानानि सन्ति मेऽङ्ग ! सहस्रशः । न शक्यन्तेऽनुसङ्ख्यातुमनन्तत्वान्मयापि हीं'ति । 'द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणाः। ख इव रजांसि वान्ति वयसा सह यच्छ्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधना' इति च। यस्य कार्त्स्न्ये-

---

शमे मुचुकुन्दं प्रति भगवद्वाक्यम् । द्युपतय एवेति। तत्रैव भगवन्तं प्रति श्रुतिवाक्यम् । ननु हे भगवन् सर्वेश्वर द्युपतयो ब्रह्मादयोपि तवान्तं पारं न ययुः । त्वमपि तवान्तं न यासि । कुत इत्याहुरनन्ततयेति। स्वरूपगुणविभूतीनामन्ताभावेनेत्यर्थः । न चैवं तव सार्वज्ञ्यहानिर्न खलु खपुष्पाद्यज्ञानेन पण्डितस्याज्ञत्वमिति भावः । अनन्तमाहुः—यस्य तवान्तरा मध्ये सावरणा अण्डनिचया वान्ति परिभ्रमन्ति वयसा कालचक्रेण। तत्र दृष्टान्तः खे वियति रजांसीवेति । सह युगपन्न तु क्रमादित्यर्थः । यद्यत एवं तस्मात्त्वयि श्रुतयः फलन्ति स्वशक्त्यनुसारेण त्वां विषयं विधाय सफला भवन्तीत्यर्थः । न तु कार्त्स्न्येन त्वां निरूपयितुं प्रभवन्तीत्याह अतदिति। समासेन त्वां धर्मिणं निरूपयितुं प्रवृत्ता अतन्निरसनेन भवन्निधना यद्भवन्तीति मणिक्षेत्रात् मृत्पाषाणादीनामपसारणेन यथा मणिलाभस्तथा प्रकृत्यादीनामतद्वस्तूनां निरसनेन ब्रह्मलाभः इत्यनन्तानि तान्यब्रह्मत्वेन निरस्यन्तीनां नः समागतेन प्रलयेन भवति त्वयि निधनं विलयो भवती-

Digitization by Arya Samaj Charitable Foundation, Chennai

नाधिगमो न स्यात्तदज्ञातमिति व्यवह्रियते। 'न तदीदृगिति ज्ञेयं न वाच्यं न च तर्क्यते। पश्यन्तोऽपि न पश्यन्ति मेरो रूपं विपश्चित' इति। तस्माद् वेदवाच्यमेव परं ब्रह्म। तदेव जीवजडात्मकात् प्रपञ्चाद् विभिन्नम्। ज्ञातं ध्यातञ्च सदा विद्यां निवारयति च परमानन्दं स्वपदमिति सर्वेषां तत्त्वविदां सिद्धान्तः॥ ३५॥

एवमेव श्रीगीतासु भगवता पङ्कजाक्षेण निगदितं, 'वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाऽहम्'।

ति कथं त्वत्पारलाभ इत्यर्थः। न तदिति। तद् ब्रह्म। ईदृगिति। परिमितस्वरूपगुणविभूतीति न ज्ञेयम्। किन्त्वपरिमितस्वरूपादिकं तमित्यर्थः। तथा च ज्ञातब्रह्मापि विद्वानब्रह्मोच्यते। दृष्टमेरुरपि पुमान् कार्त्स्न्येनाऽदर्शनाददृष्टमेरुर्यथा। एवमुक्तं श्रीभागवते-'नभः पतन्त्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः'। ज्ञात मिति। सर्वेषां पराशरादीनाम्॥ ३५॥

पराशरादयश्च ते सर्वे भगवन्मतं विज्ञायैव तथा तथा निर्णिन्युरिति तन्मतमाह-वेदैश्चेति। वेदान्तकृद्बादरायणवपुषा चतुर्लक्षण्या वेदार्थनिर्णयकर्ताऽहमेवेत्यर्थः। वेदविदेव स्वरतो वर्णतश्चाहमेव वेदज्ञ इत्यर्थः। कोऽसौ वेदार्थस्तत्राह-द्वाविति। लोके वेदे लोक्यते तत्त्वमनेनेति निरुक्तेः।द्वाविमौ पुरुषौ तौ कावित्याह क्षरश्चेति। देहक्षरणात् क्षरोऽनेकावस्थो बद्धजीववर्गः। अचित्संसर्गैकधर्मसम्बन्धादेकत्वेन निर्दिष्टः अक्षरस्तत्सम्ब-

Digitization by Arya Samaj Charitable Foundation, Chennai

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ यस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ यो मामेवमसंमूढो

न्धाभावादेकावस्थो मुक्तजीववर्गः । अचिद्वियोगैकधर्माभिसम्बन्धादेकत्वेन चिदेकत्वेन निर्दिष्टः। तौ विशदयति क्षर इति । ब्रह्मादिस्तम्बान्तानि सर्वाणि भूतानि क्षरः कूटस्थः सर्वदैकावस्थो मुक्तस्त्वक्षरः। पूर्वोक्तैर्युक्तेरेकत्वनिर्देशो बोध्यः । यदर्थं द्वौ निरूपितौ तमाहोत्तम इति । अन्यः क्षराक्षराभ्यां भिन्नो न तु तयोरेवैकः स कल्पनीय इति भावः । उत्तमताप्रयोजकं तस्य धर्ममाह-य इति । न च जगदधिधारणपालनलक्षणं कर्म बद्धजीवस्याऽसम्भवात् । न च मुक्तजीवस्य जगद्व्यापारवर्जमिति प्रतिषेधात् । जगद्बिभरणादित्यन्वयः । कथं तमहं परिचिनुयामिति चेन्मामेव तं विद्धीत्याह यस्मादिति । लोके स्मृतिशास्त्रे लोक्यते वेदार्थोऽनेनेति निरुक्तेः । प्रथितः प्रख्यातः । 'जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् । स्तुवन्नामसहस्रेण पुरुषः सततोत्थित' इत्यादिस्मृतौ । एष सम्प्रसादोस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते स उत्तमः पुरुषः इत्यादिश्रुतौ चाऽहमेव पुरुषोत्तमत्वेन प्रसिद्ध इत्यर्थः । तात्पर्यद्योतनाय पुरुषोत्तम-

Digitization by Arya Samaj Charitable Foundation, Chennai

जानाति पुरुषोत्तमम् । स सर्वविद् भजति मां सर्वभावेन भारत! ॥ इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ । एतद् बुध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते'ति । एवमन्यत्राऽपि दृश्यते ॥ ३६ ॥

इति सिद्धान्तरत्नाख्ये भाष्यपीठके विष्णोः सर्ववेदवेद्यत्वनिर्णयश्चतुर्थः पादः ॥ ४ ॥

त्ववेत्तुः फलमाह यो मामिति । एवं मत्कृतनिरुक्त्या न तु महावृक्षादिवत् संज्ञामात्रत्वेनेत्यर्थः । असंमूढो मम पुरुषोत्तमत्वे निःसन्देहः सन् स सर्ववित् सर्वस्य वेदस्य त्रिश्लोक्यर्थे तात्पर्यात् । स एव मां सर्वभावेन भजत्याराधयति । तत्त्वे सन्दिहानस्तु सर्ववेदज्ञोऽप्यज्ञः षोडशोपचारां पूजां मे कुर्वाणोऽप्यभक्तभावः । न चैतदपात्रेषु प्रकाश्यमिति भावेनाह–इतीति । बुद्धिमान् परोक्षज्ञानी । कृतकृत्योऽपरोक्षज्ञानी च ॥ ३६ ॥

इति श्रीगोविन्दभाष्यपीठकटिप्पण्यां चतुर्थस्तार्क्ष्यपादो व्याख्यातः ॥ ४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

पञ्चमः पादः ।

अत्राहुः—स्वतः परब्रह्मभूतस्यैव जीवस्याऽज्ञानहेतुकः प्रपञ्चः । स पुनरद्वैतज्ञानमात्रनिवर्तनीय इत्यतोऽस्याऽनर्थबीजस्य विनाशाय परापरात्मनोरद्वैतमेवेह विजिज्ञास्यं तत्रैव शास्त्रतात्पर्य्यमिति ॥ १ ॥

अर्थान् स्वाभीष्टान्निरूपयताचार्य्येणाऽन्तरा पतितः केवलचिदद्वैती निरस्तः । मधुररसान् भुञ्जानेनागतः श्वेव लोष्टानि निक्षिपता । अथ कृत्स्नबलभृत् प्रतिप्रवृत्तस्तद्वादी विभग्नमुखतया निरस्यः । तदर्थं वामनत्रिविक्रमाख्यौ पञ्चमषष्ठौ पादौ प्रवर्त्येते । युक्तिच्छलप्राचुर्य्यादाद्यो वामनः । श्रुतियुक्तिभिरतिदीर्घत्वात्परस्त्रिविक्रमः । अत्राहुरिति । अत्र विज्ञानानन्दात्ममूर्तिर्नित्यधामादिकः सर्वावतारी मायादिस्वेतरनियन्ता पुरुषोत्तमो ज्ञातो ध्यातश्च सन् सर्वदुःखहरः स्वपर्य्यन्तसर्वार्थप्रदश्चेति सन्निरूपितेऽर्थे केवलाद्वैतिनस्तमसहमानाः स्वसिद्धान्तं दर्शयन्तीत्यर्थः । अज्ञानेति । रज्ज्वज्ञानेन यथा सर्पादिसर्ग इत्यर्थः । स पुनरद्वैतेति । रज्जुमात्रज्ञानेन यथा सर्पादिसर्गविनाश इत्यर्थः । अस्येति । अनर्थबीजस्य ब्रह्मभूतस्वाज्ञानस्येत्यर्थः । परापरात्मनोरद्वैतमिति । विजिज्ञास्यं तत्त्वमस्यादिवाक्यैर्ज्ञातुमेष्टव्यम् । ननु द्वा सुपर्णेत्यादिवचसां का गतिस्तत्राह—तत्रैवेति ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इदमसत्, अद्वैतासिद्धेः । तथा हि—तदद्वैतं ब्रह्मातिरिक्तं ब्रह्मात्मकं वा । नाद्यः, अद्वैतहानात् । तदतिरिक्तस्य मिथ्यात्वेन शास्त्रस्यातत्त्वावेदकत्वापाताच्च । सत्यता च भेदस्य । मिथो विरुद्धयोरन्यतरनिषेधस्याऽन्यतरविधिव्याप्तत्वात् । नाऽप्यन्त्यः, आत्मनः स्वप्रकाशत्वेन नित्यसिद्धत्वाच्छास्त्रस्य सिद्धसाधनतापत्तेः ॥२॥

ननु तत्त्वेन तस्य नित्यसिद्धत्वेऽप्यद्वैतादिविशेषाकारेणाऽनधिगतेर्न तस्य दूषणम् । यथा तव गुणगुणिनोरद्वैतेपि गुणिनः स्पर्शेनोपलम्भेपि गुणस्याऽनधिगतिरेव-

---

निरस्यति—इदमसदिति । तदतिरिक्तस्येति । ब्रह्माभिन्नार्थमात्रस्य मिथ्यात्वेन तदतिरिक्तस्यापि मिथ्यात्वम् । ततस्तत्त्वमस्यादिशास्त्रं मिथ्यार्थावेदकं स्यादित्यर्थः । सत्यता च भेदस्येति । भावाभावरूपत्वात्तेजस्तमोवन्मिथो विरुद्धे द्वैताद्वैते । ब्रह्मातिरिक्तेऽद्वैते मृषाभूते सति तद्बाधितद्वैतमुज्जीवेदित्यर्थः । नाप्यन्त्य इति । ब्रह्मात्मकं चेदद्वैतं तर्हि स्वप्रकाशतया नित्यसिद्धं ब्रह्म साधयच्छास्त्रं सिद्धसाधनं निरर्थकं स्यादिति भावः ॥२॥

चिदद्वैती पुनः प्रत्यवतिष्ठते ननिवति । तत्त्वेन स्वप्रकाशत्वेन । तस्यात्मनो ब्रह्मणः । तस्येति शास्त्रस्य । तत् सिद्धसाधनत्वं दूषणं नेत्यर्थः । यथेति । तव द्वैतिनः । गुणगुणिनो रूपघटयोः । यथा त्वन्मते त्वगिन्द्रियेण घटे साक्षात्कृतेऽपि तदभिन्नरूपसाक्षात्काराय प्रवृत्तं त्वगिन्द्रियं न व्यर्थं तथा

Digitization by Arya Samaj Charitable Foundation, Chennai

मिति चेत्, मन्दमेतत्। आत्मनो निर्विशेषत्वादनधि-
+(?)शेषाभावात्। अत एव गुणिदृष्टान्तोऽपि निरस्तः। य-
तो रूपं घटाभिन्नमपि तद्विशेषतया मतं न तु तन्मात्रम्॥३॥

ननु स्यादिदं दूषणं शास्त्रं चेत् सदद्वैतमाहेति
ब्रूमः। किन्तर्हि? आवरणरूपमज्ञानं निवर्तयतीति नि-
वृत्ते त्वावरणेऽद्वैतं स्वत एव सिद्धमिति चेत्, नैत-
च्चतुरस्रम्। न ह्यज्ञानं कस्यचिदावश्यकं स्वप्रकाशत्वेन
नित्यसिद्धत्वात् स्वरूपस्य विशेषाभावाच्च॥ ४॥

स्वप्रकाशतया नित्यसिद्धेपि ब्रह्मात्मन्यद्वैतनित्यशुद्धबुद्धमुक्तत्व-
रूपं विशेषं बोधयच्छास्त्रं न व्यर्थमित्यर्थः। परिहरति मन्द-
मिति। भ्रान्तमित्यर्थः। अत एवेति। दार्ष्टान्तिकस्यात्मनो नि-
र्विशेषत्वादेवेत्यर्थः। गुणी खलु दृष्टान्तः, स तु विशेष एवेति॥३॥

विषमदृष्टान्ततया दूषितश्चिदद्वैती पुनर्विधान्तरेण प्रत्यव-
तिष्ठते नन्विति। इदं सिद्धसाधनत्वरूपम्। किन्तर्हीति। मायावि-
द्यादिपर्यायं यदनिर्वचनीयं तम आत्मन्यद्वैतादिकमावृत्य तत्रे-
श्वरत्वं जीवत्वादिप्रपञ्चमुद्भासयति तदज्ञानरूपमावरणं निवर्त-
यति शास्त्रम्, आवरणनिवृत्तेः पूर्वमसत्त्वान्न सिद्धसाधनं त-
दित्यर्थः। एवं तर्ह्यद्वैतं कुतो लभ्यम्? तत्राह—निवृत्ते त्विति।
परिहरति नैतदिति। चतुरस्रं चतुःकोणम्। 'अस्रः स्यात्
कोणकेशयो'रिति श्रीधरः। नैतत् पूर्णं समाधानम्। कस्य चि-
दिति। स्वरूपस्य वेत्यर्थः। स्वरूपस्येत्युभयत्राऽन्वेति॥ ४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा हि—आवरणं ह्याव्रियमाणेन व्याप्तम्। न चाज्ञानस्य तदस्ति। तद्धि किमावृणोति स्वरूपं तद्विशेषं वा। नाद्यः, तस्य नित्यसिद्धप्रकाशत्वात्। न चेतरः, अस्वीकारात्। तथा च व्यापकाभावाद्व्याप्यमावरणमप्यसम्भवीति, न तन्निवर्तकतया शास्त्रमदोषम् ॥५॥

एवञ्च सति सिद्धसाधनत्वेऽनुपादेयताऽप्रामाण्यञ्च।

तथा हीति। उक्तमर्थं विशद्य दर्शयतीत्यर्थः। आवरणं हीति। यत्रान्धकारादिरूपमावरणं तत्रास्त्येव भूम्यादिरूपमाव्रियमाणमिति तेन तद्व्याप्तं नियतसाहचर्य्यमित्यर्थः। न चेति। तदित्याव्रियमाणम्। अस्तीति ब्रुवन्तं पृच्छति तद्धीति। तदज्ञानरूपमावरणम्। नाद्य इति। ब्रह्मस्वरूपमावृणोतीति पक्षो न सम्भवतीत्यर्थः। तस्येति। ब्रह्मस्वरूपस्य। न चेतर इति। ब्रह्मनिष्ठं विशेषं गुणविभूत्यादिकमावृणोतीति पक्षोपि नेत्यर्थः। कुत इत्यत्राहाऽस्वीकारादिति। केवलाद्वैतवादे विशेषानङ्गीकारादित्यर्थः। साधितमर्थं दर्शयति तथा चेति। वन्हिवदधिकदेशत्वादाव्रियमाणं ब्रह्म स्वं रूपं तद्विशेषो वा व्यापकम्। धूमवदल्पदेशत्वादावरणमज्ञानं व्याप्यमुच्यते। अत्र व्यापकस्य स्वरूपतद्विशेषान्यतरस्य पक्षद्वयनिराकृतत्वेनाव्रियमाणतयाऽसद्रूपत्वादज्ञानं पुनः कस्यावरणं भवत्स्वीकार्य्यं, यन्निवर्तकतया शास्त्रमसिद्धसाधनं वदसीत्यर्थः ॥ ५ ॥

एवञ्चेति। उक्तरीत्याऽज्ञानस्याऽऽवरणत्वनिराकरणेन त-

Digitization by Arya Samaj Charitable Foundation, Chennai

शास्त्रं खलु परार्थम् । तस्य च परसिद्धबोधनेऽनुपादेयता, अनधिगतार्थगन्तृप्रमाणमिति हि लक्षणं तदभावादप्रामाण्यञ्चेति ॥ ६ ॥

एवमज्ञानासम्भवाद्विषयाद्यपि न सम्भवति । अज्ञातो हि विषयः । अन्यथाऽतिप्रसङ्गात् । प्रयोजनं च मोक्षः, स चाऽज्ञाननिवृत्तिरूपः । यदुक्तम्—'अविद्यास्त-

---

त्वेनाऽसद्रूपत्वे सत्त्वावरणनिवर्तकत्वेनासिद्धसाधनतयोक्तस्य शास्त्रस्य पुनः सिद्धसाधनत्वे स्थिते सति तस्याऽनुपादेयत्वं स्यादप्रामाण्यं चाधिकमागतमित्यर्थः । अनुपादयेतां ग्राहयति शास्त्रमिति । परार्थं परस्यात्मजिज्ञासोरज्ञानात्मस्वरूपज्ञानार्थम् । तस्येति शास्त्रस्य । परसिद्धेति । परस्यात्मजिज्ञासोर्नित्यस्वप्रकाशतया सिद्धो यो ब्रह्मभूत आत्मा तद्बोधनेऽनुपादेयताऽग्राह्यतेत्यर्थः । अप्रामाण्यं कथं तत्राह—अनधीती । अनधिगतमर्थं यद् गमयति तत् प्रमाणम् । आत्मा हि नित्यमधिगतः । 'यत् साक्षादपरोक्षाद् ब्रह्म'ति श्रुतेः । ततश्चाधिगतात्मगन्तृत्वाच्छास्त्रं न प्रमाणमिति । यत्तु हतहननवन्निवृत्तमेव निवर्त्यते विस्मृतकण्ठमणिवत् प्राप्तमेव प्राप्यते इति न सिद्धसाधनतेत्याह तद्रभसादेव । तथाप्रवृत्तावुन्मत्ततापत्तेः तथाप्राप्तावद्वैतभङ्गाच्चेति यत् किञ्चिदेतत् ॥ ६ ॥

अज्ञानस्यावरणत्वं निरस्य तन्निमित्तकं विषयत्वं प्रयोजनत्वञ्च निरस्यति—एवमिति । उक्तयुक्त्यावरणत्वेनाऽज्ञानस्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

मयो मोक्षः सा संसार उद्धाहृत' इति । न चाऽज्ञानासंभवे तन्निवृत्तिरुपपद्यते । यच्चाऽज्ञानहानेरात्मरूपत्वमिष्टं तदसत्, आत्मनः पूर्वसिद्धत्वेन तद्धानेरसाध्यत्वापत्तेः । न चाऽज्ञात आत्मैवाऽज्ञानहानिर्नात्ममात्रमिति वाच्यं ज्ञानकर्मताऽनङ्गीकारात् ॥ ७ ॥

या च सत्त्वादिपक्षत्रये दोषमाशङ्क्य चतुर्थप्रकारतामज्ञानस्य प्रकल्प्य तत्राप्यस्य पुनः पञ्चमप्रकारता स्वीकृता, साऽप्यज्ञानासम्भवेनैव निरस्ता ॥ ८ ॥

ऽसम्भवात् शास्त्रस्य विषयः प्रयोजनञ्च न सम्भवतीत्यर्थः । कथं तदसम्भवस्तत्राह—अज्ञातो हीति । अन्यथा ज्ञानस्यापि शास्त्रविषयत्वे चाक्षुषेऽपि घटे शास्त्रमपेक्ष्येतेति भावः । न चाज्ञानेति । आवरणत्वेनाऽऽज्ञानस्यासम्भवे सति न तस्याज्ञानावरणस्य निवृत्तिः शक्याऽभिधातुं, न ह्यसति परिच्छेद तदपसारणं स्यादित्यर्थः । नन्वज्ञाननिवृत्तिरात्मैव तस्य सत्त्वात् प्रयोजनासिद्धिरिति चेत्तत्राह यच्चेति । विकसितार्थम् । ज्ञानकर्मेति । 'यतो वाचो निवर्तन्त' इत्यादिश्रुतिप्रामाण्यादिति भावः ॥ ७ ॥

अज्ञाननिवृत्तिर्मोक्ष इत्यादयस्त्रयः पक्षा दूषिताः । अथ विधान्तरेणाऽज्ञाननिवृत्तेर्मोक्षत्वं कैवलाद्वैतिना साधितं दूषयति या चेति । तन्नाशस्याऽज्ञानप्रध्वंसस्य । अज्ञानेति । आवरणतया सत्त्वाभावेनेत्यर्थः ॥ ८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं हि परैरङ्गीकृतम्—अज्ञानस्य न सत्त्वं, अद्वैतहानात् । नाऽप्यसत्त्वं, प्रतीतिवैपरीत्यात् । न च सदसत्त्वं, विरोधात् । अतश्चतुर्थः प्रकारोऽनिर्वचनीयत्वं स्वीकार्यम् । न च तन्नाशोऽपि तादृक्, प्रतियोगितन्निवृत्त्योर्वैलक्षण्यस्याऽऽवश्यकत्वादिति पञ्चमप्रकारताऽङ्गीकार्य्या । यदाह—'न सन्नासन्न सदसन्नाऽनिर्वाच्यश्च तत्क्षयः । यक्षानुरूपो बलिरित्याचार्याः प्रत्यपीपद'न्निति ।

उक्तमर्थमुद्घाटयति—एवं हीति । परैः केवलाद्वैतिभिः । नाऽप्यसत्त्वमिति । अज्ञानाभावे ह्यहमज इति प्रत्ययो न स्यादित्यर्थः । न च सदसत्त्वमिति । शैत्यौष्ण्यवदेकत्र सत्त्वासत्त्वयोर्विरोधादित्यर्थः । अतोऽज्ञानस्य सदसद्विलक्षणत्वं चतुर्थः प्रकारः स्वीकार्य्यमित्यर्थः । न चेति । तन्नाशोऽज्ञाननाशोऽपि तादृक् चतुर्थप्रकारो न भवतीत्यर्थः । कुत इत्याह—प्रतियोगीति । अज्ञाननिवृत्तेः प्रतियोगी ह्यज्ञानम् । तयोर्वैलक्षण्यमावश्यकम् । यथा घटतद्ध्वंसयोः । तस्मादज्ञाननिवृत्तिः पञ्चमः प्रकार इत्यर्थः । अत्राचार्यसंमतिमाह न सन्निति । स तत्क्षयोऽज्ञाननाशः सन्न भवति, उपलक्षणत्वस्वीकारात् । विशेषणत्वे निर्विशेषत्वक्षतिरिति भावः । नाऽप्यसन्, शुद्धबुद्धमुक्तस्वरूपोऽहमस्मीत्यनुभवविरोधापत्तेः । न च सदसन्, विरोधात् । नाऽप्यनिर्वाच्यः, अज्ञानस्य तथात्वेन तत्क्षये ततो वैलक्षण्यस्यावश्यकत्वात् । तस्मात् सदसद्विलक्षणविलक्षणस्तत्क्षय इति । परिहरति—इदमपी-

Digitization by Arya Samaj Charitable Foundation, Chennai

इदमप्यपेशलं, उक्तरीत्या ज्ञानासम्भवात्तेन कल्प्यमानायास्तस्याः खपुष्पतौल्यात् ॥ ९ ॥

अथ पञ्चमप्रकाराऽज्ञाननिवृत्तिरात्मेतराऽऽत्मस्वरूपा वा। आद्येऽप्यज्ञानकार्य्यं न वा? न तावदाद्यः। तदाप्यज्ञानावस्थितेः संभवात्। न ह्युपादानेन विनोपादेयस्य स्थितिरस्ति। न चान्त्यः। आत्मेतरस्याज्ञानतत्कार्य्यान्यतरत्वावश्यम्भावाभ्युपगमात्। नापि द्वितीयः।

ति। असुन्दरमित्यर्थः। 'पेशलो रुचिरे दक्षे' इति विश्वः। उक्तरीत्या व्यापकाभावाद् व्याप्यमावरणं न संभवेदित्येवंरूपया। तेनेत्यज्ञानेन। तस्याः पञ्चमप्रकारतायाः ॥ ९ ॥

प्रकारान्तरेण तां दूषयति अथेति। आद्येप्यात्मेतरे पक्षेऽज्ञाननिवृत्तिरज्ञानकार्यं न वेत्यर्थः। न तावदाद्य इति। आत्मेतराऽज्ञाननिवृत्तिरज्ञानकार्यमिति। प्रथमः पक्षो न सम्भवतीत्यर्थः। तदाऽप्यज्ञाननिवृत्तिकालेपीत्यर्थः। विशदयति-न ह्युपादानेनेति। ब्रह्माकारया चित्तवृत्त्याऽज्ञाननिवृत्तिर्जन्यते। सा चित्तवृत्तिस्तन्निवृत्तेरुपादानं स्वोपादेयतन्निवृत्तावंशेनाऽनुवर्तैतैव। ततश्चाऽज्ञानांशसत्त्वान्न स्यान्मोक्षत्वमित्यर्थः। न चान्त्य इति। आत्मेतराऽज्ञाननिवृत्तिरज्ञानकार्य्यं नेति द्वितीयः पक्षोऽपि नाख्यातुं शक्य इत्यर्थः। कुत इत्याह—आत्मेतरस्येति। यत् खल्वात्मनो भिन्नं तदज्ञानं स्यादज्ञानकार्यं वा स्यादिति त्वया स्वीकृतत्वादेवेत्यर्थः। तथा चाऽज्ञाननिवृत्तेर्मोक्षत्वं नेत्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

दर्शितदोषापत्तेः । एवमज्ञाननिवृत्तेरुभयथाऽप्यसम्भवेन स्वरूपाभावात् । सा पुनः सुदूरापास्तेति ॥ १० ॥

किञ्च घटादीनां सत्त्वं शशशृङ्गादीनामसत्त्वं घटादीनामेव देशकालव्यवस्थया सदसत्त्वमिति प्रकारत्रयस्यैवाऽनुभवाच्चतुर्थः प्रकार एव नास्ति, तदभावात् पञ्चमप्रकारताप्यष्टमरसवदशक्यसम्भावनेति ॥ ११ ॥

एवञ्च विषयप्रयोजनयोरभावादधिकारात्तदभावात् सन्बन्धश्च निरस्तः । सतामेव हि सम्बन्धः, स चा-

---

नाऽपि द्वितीय इति । पञ्चमप्रकाराऽज्ञाननिवृत्तिरात्मस्वरूपैवेति प्रथमविकल्पस्य द्वितीयः पक्षोऽपि न शक्यो भणितुमित्यर्थः । कुत इत्याह--दर्शितेनेति । आत्मनः पूर्वसिद्धत्वेन तद्रूपाज्ञाननिवृत्तेरसाध्यतापत्तेरित्यर्थः । एवमिति । उभयथापीति । आत्मेतरत्वेनात्मस्वरूपत्वेन चाऽज्ञाननिवृत्तेर्निरूपणासम्भवात्तस्याः पञ्चमप्रकारताऽतिदूरे निक्षिप्तेत्यर्थः ॥ १० ॥

सदसद्विलक्षणवस्तुनोऽप्रसिद्धेश्चाऽज्ञानस्य तथात्वं न शक्यं वक्तुमित्याह किञ्चेत्यादिना । चतुर्थप्रकारोऽज्ञानस्य सदसद्विलक्षणत्वं पञ्चमप्रकारताऽज्ञाननिवृत्तेः सदसद्विलक्षणविलक्षणत्वम् । तत्र दृष्टान्तोऽष्टमेति । षडेव रसास्तेषु सप्तमस्यैवाभावादष्टमो यथा दूरापास्तस्तद्वदित्यर्थः ॥ ११ ॥

शास्त्रादज्ञातमर्थं ज्ञातुमज्ञाननिवृत्तिरूपं प्रयोजनञ्च लब्धम् । तत्र शमाद्युपेतोऽधिकारी प्रवर्तते । तत्रोक्तरीत्याऽज्ञानासम्भवा-

Digitization by Arya Samaj Charitable Foundation, Chennai

ऽज्ञानासम्भवेन विषयादेरभावान्नेति । विचारारम्भवैयर्थ्यञ्च तस्मादेव । तथाऽऽवरणरूपमज्ञानं निवर्तयच्छास्त्रमदोषमिति रिक्तं वचः ॥ १२ ॥

इति सिद्धान्तरत्नाख्ये भाष्यपीठके केवलाद्वैतनिरासः पञ्चमः पादः ॥५॥

दधिकारी च त्वन्मते न सम्भवेदित्याहैवं चेति । तदभावाद् विषयादीनामभावात् । सम्बन्धाभावं दर्शयति सतामिति । शास्त्रस्यात्मना सह बोध्यबोधकभावः सम्बन्धः । अधिकारिणा सहाऽध्येयाऽध्येतृभावः । आत्मना मोक्षेण च सह ग्राह्यग्राहकभावः । स चैष विस्तारोऽज्ञानहेतुक एव, अज्ञानाभावे तु नैते सम्भवन्तीति कस्य केन सम्बन्ध इत्यर्थः । विचारेति । सन्दिग्धे वस्तुनि तत्त्वनिर्णयो हि विचारः । सन्देहस्त्वज्ञानकृत एव, तदभावान्न विचारारम्भ इत्यर्थः ॥ १२ ॥

इति श्रीगोविन्दभाष्यपीठकाटिप्पण्यां पञ्चमो वामनपादो व्याख्यातः ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

षष्ठः पादः ।

अत्राहुः—फलवत्यज्ञातेऽर्थे श्रुतेस्तात्पर्य्यादभेदः परमार्थः। अनन्तानन्दब्रह्मभावो हि फलम्। शास्त्रैकगम्यो ब्रह्माभेदः । तस्मिन्नद्वितीये ब्रह्मणि नानाविधज्ञातृज्ञेय-ज्ञानभेदादि सर्वं परिकल्पितमतो मिथ्यैवेति । एवमेवाह श्रुतिः—'ब्रह्मविद् ब्रह्मैव भवति' 'ब्रह्मैव सन् ब्रह्माप्येति' 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' 'नेह नानास्ति किञ्चन' 'यत्र हि द्वैतमिव भवति तदितर इतरं

अथ विधान्तरैः प्रतिप्रवृत्तः केवलाद्वैती प्रत्याख्यातव्यस्तदर्थं त्रिविक्रमाख्यः षष्ठः पादोऽयं प्रवर्त्यते । तत्र तावत्तन्मतमुपन्यस्यति—अत्राहुरित्यादिना । फलवतीति । तादृशब्रह्मतापत्तिर्जीवस्य मुमुक्षोः फलम् । शास्त्रैकेति । ननु प्रत्यक्षादिगम्यः स इत्यर्थः । परिकल्पितमिति । तादृशब्रह्माज्ञानादिति भावः । उक्तेऽर्थे क्रमात् प्रमाणान्याह—ब्रह्मविदित्यादिना । सदिति । अग्रे सृष्टेः प्राक् । सदेव सत्तामात्रं ब्रह्मैवासीदित्यर्थः । अस्तीत्येवोपलब्धव्य इति श्रुतेः । 'अपक्षयविनाशाभ्यां परिणामाधिजन्मभिः । वर्जितः शक्यते वक्तुं यः सदास्तीति केवल'मिति स्मृतेश्च । तदज्ञानादिदं जगत्तत्र कल्पितं

Digitization by Arya Samaj Charitable Foundation, Chennai

पश्यति' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्र केन कं पश्येत् केन कं विजानीयात्' 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' 'इतोऽन्यदार्तम्' 'रामं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा' इत्यादिका ॥ १ ॥

एवमेवाहैकादशे श्रीभगवान्—'गुणाः सृजन्ति कर्माणि गुणो नु सृजते गुणान् । जीवस्तु गुणसंयुक्तो

तज्ज्ञानेन तु विनङ्क्ष्यति, तस्मादेकमेवेति । सजातीयविजातीयस्वगतभेदशून्यं तदित्यर्थः । नेहेति । इह ब्रह्मणि । ज्ञातृनाना ज्ञेयादिकल्पना नास्तीत्यर्थः । यत्र हीति । व्यवहारकाले । यत्र त्विति । मोक्षकाले । अस्य जीवस्यात्मा ब्रह्मैव सर्वमभूत् । अयं ब्रह्मैवाभूदित्यर्थः । वाचेति । घटादिकं विकार इति नामधेयं वाचारम्भणं वाङ्मात्रेणारब्धमतो मृषाभूतं तत् मृत्तिकेत्येव सत्यम् । तथा च जगद् वाचारब्धत्वान्मृषाभूतं ब्रह्मैव सत्यमित्यर्थः । इत इति । ब्रह्मतोऽन्यज्जगदार्तं मृषेत्यर्थः । एतमिति । अनृतेनाऽविद्यया प्रत्यूढास्ताः प्रजा एनं ब्रह्मभूतं लोकं न विदन्तीत्यविद्ययैव तत्र जगद्भानमित्यर्थः ॥ १ ॥

एवं श्रुतितो निश्चित्य स्मृतितश्च निश्चिनोति—एवमेवाहेत्यादिना । गुणा इति । गुणा इन्द्रियाणि कर्माणि सृजन्ति कुर्वन्ति न त्वात्मा । 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागे शौर्यादिसन्ध्यादिसत्त्वाव्यावृत्तरज्जुषि'ति मेदिनीकारः । नन्वात्मैवेन्द्रियैः कर्माणि कुर्यादिति चेत्तत्राह—गुणोऽविद्यैवात्मच्छायया

Digitization by Arya Samaj Charitable Foundation, Chennai

भुङ्क्ते कर्मफलान्यसौ ॥ यावत् स्याद् गुणवैषम्यं तावन्नानात्वमात्मनः। नानात्वमात्मनो यावत् पारतन्त्र्यं तदैव हि॥ यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भय'मिति ॥ २ ॥

इदमत्र रहस्यम्—कर्तृत्वभोक्तृत्वादिधर्मशून्याश्चिन्मात्रोऽद्वितीयो ह्यात्मा । स चात्मन्यविद्यया गुणमयीं मायां तद्वैषम्यजां कार्यसंहतिं च कल्पयन्नस्मदर्थमेकं युष्मदर्थांश्च बहून् कल्पयति । तत्रास्मदर्थः स्वस्वरूपः

चेतनेव गुणानिन्द्रियाणि सृजते प्रवर्तयतीति नात्मनः कर्तृत्वम् । अथ भोक्तृत्वमप्यात्मन आविद्यकमेव, न तु वास्तवमित्याह जीवस्त्विति । गुणसंयुक्त आविद्यकेन्द्रियवर्गोपेतो जीवः कर्मफलानि सुखदुःखानि भुङ्क्ते न तु शुद्ध इति गुणानामेव भोक्तृत्वम् । यच्चात्मनो नानात्वं तदप्याविद्यकमित्याह यावदिति । यावदविद्याकल्पिताया मायाया गुणानां सत्त्वादीनां वैषम्यमहङ्कारेन्द्रियान्तःकरणरूपं स्यात्तावदेव घटैराकाशस्येवाहङ्कारादिभिरवच्छिन्नस्यात्मनो नानात्वम् । आत्मयाथात्म्यज्ञानेन निवृत्तेऽप्यवच्छेदकेष्वेकत्वं सिद्धमेवेति भावः । नन्वात्मन एकत्वे कथं पारतन्त्र्यं कथं वा लोकपालानां तत्तो भयमुक्तं, तत्राह नानात्वमिति । प्रकटार्थः ॥ २ ॥

गुणाः सृजन्तीत्यादिवाक्यार्थं साभिप्रायं 'विवृणोति-इदमत्रेति। अविद्ययात्माज्ञानेन। जीवेशाविति । आविद्या कर्त्री आभासेन जीवेशौ करोति रचयति । अन्तःकरणे ब्रह्मणः प्रतिबिम्बे-

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरुषः । युष्मदर्थास्त्रिविधाः—पुरुषान्तराणि जडानि सर्वेश्वराख्यः पुरुषविशेषश्चेति । 'जीवेशावाभासेन करोति माया चाऽविद्या च स्वयमेव भवती'ति श्रुतिश्च कर्तृत्वं भोक्तृत्वं च गुणसम्बन्धादात्मन्यस्मदर्थेऽभ्यस्यते । अथ तस्यामविद्यायां प्रणष्टायां तत्कार्यरूपा माया विनश्यति । तन्नाशात् नानात्वञ्च । तदभावादीश्वरतत्पारतन्त्र्यतद्भयादीनि सुदूरोत्सारितानीति चिन्मात्राद्वितीयमात्मवास्त्विति ॥ ३ ॥

तथोत्तरत्र च—'किं भद्रं किमभद्रं वा द्वैतस्याऽवस्तुनः कियत् । वाचोदितं तदनृतं मनसा ध्यातमेव

न जीवं करोति मायायां प्रतिबिम्बेन त्वीशम् । ननु-'विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । बन्धमोक्षकरा आद्ये मायया मे विनिर्मिते' ॥ इति भगवता मायावृत्तिरविद्या पठिता । कथमविद्या मायां कल्पयतीत्युच्यते । तत्राह माया च स्वयमेव भवतीति । तथा च भेदकल्पनं तत्र भाक्तमिति भावः । अथेति । आत्मयाथात्म्यावबोधनेन तस्यामविद्यायां प्रणष्टायां निवृत्तायामित्यर्थः । तन्नाशादिति । नानात्वं वात्मनो नश्यतीत्यर्थः । तदभावादात्मनो नानात्वविनाश्यात् । अत्र दशमो नाहमस्मीतिवदात्मन्यविद्योत्पद्यते । दशमोहमस्मीतिवत् तस्मिन् विद्येति बोध्यम् ॥ ३ ॥

तथेति । उत्तरत्राऽष्टाविंशेऽध्याये । किमिति । द्वैतस्य प्रपञ्च-

Digitization by Arya Samaj Charitable Foundation, Chennai

च ॥ छायाप्रत्याह्वयाभासा ह्यसन्तोप्यर्थकारिणः । एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम् ॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः । त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ तस्मान्न ह्यात्मनोऽन्यः स्यादन्यो

स्य मध्ये किं कियद् भद्रं कियदभद्रं खपुष्पवृन्दस्येवेत्यर्थः । यतोऽवस्तुनो रज्जुसर्पवन्मृषाभूतस्य । अवस्तुतामाह वाचेति । बाह्येन्द्रियाणामुपलक्षणम् । यद्वागादिभिर्गृहीतं यच्च मनसा ध्यातं तदनृतं मृषैव, परत्र तथैवास्थितेः । ननु देहादीनामनृतत्वात् कथं भयहेतुत्वमिति चेत्तत्र सदृष्टान्तमाह—छायेति । छाया प्रतिबिम्बः । प्रत्याह्वयः प्रतिध्वनिः । आभासः शुक्तिरजतादिः । यथैतेऽसन्तोऽप्यर्थकारिण एव देहादयो भावा आमृत्युतो भयं यच्छन्ति । मृत्युर्लयः । यावत्तत्त्वज्ञानेनैते न लीयन्ते तावद् भयं संसारं जनयन्त्येवेत्यर्थः । ननु 'यतो वा इमानि भूतानि जायन्त' इत्यादिश्रुतिसिद्धत्वात् कथं द्वैतमनृतं तत्राह—आत्मैवेति द्वाभ्याम् । आत्मैव विश्वमित्यन्वयः । श्रुतिरेव यथा रजतम् । सृष्टित्राणसंहाराणां कर्मभूतः कर्तृभूतश्चात्मैव स्वाज्ञानोपहितः सन्नित्यर्थः । ननु कर्तुरेव कर्मत्वं विरुद्धं तत्राह—तस्मादिति । आत्मनोऽन्यो भावोऽर्थो यस्मान्न हि तत्त्वविद्भिर्निरूपितः किं त्वात्मैव विश्वकर्ता कर्मभूतं विश्वमिति निरूप्यते । 'तदात्मानं स्वयमकुरुते'ति श्रुत्येत्यर्थः । तर्हि विकारापत्तिर्नेत्याह—अन्यस्मादिति । विकारास्पृष्टादित्यर्थः । तर्हि कर्मत्वं कथमुच्यते तत्राह—निरूपितेति । त्रिविधा सात्त्विकादिरूपा भ्रान्तिः प्रतीतिर्निर्मूला ।

Digitization by Arya Samaj Charitable Foundation, Chennai

भावो निरूपितः । निरूपितेयं त्रिविधा निर्मूला भाति-रात्मनि ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतम्'॥४॥

'एतद्विद्वान् मदुदितं ज्ञानविज्ञाननैपुणः । न निन्दति न च स्तौति लोके चरति सूर्यवत् ॥ प्रत्यक्षेणाऽनुमानेन निगमेनाऽऽत्मसंविदा। आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिहे'ति ॥ ५ ॥

तथा श्रीविष्णुपुराणे सनन्दनादयः—'परमार्थस्त्वमेवैको नान्योस्ति जगतः पते । तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥ यदेतद् दृश्यते मूर्तमेतज्ज्ञानात्मन-

---

न हि रजतभ्रमे शुक्त्यज्ञानादन्यन्मूलमस्ति । एतदेवाहेदमिति । अविद्यारचितया मायया कृतमिति । न चाज्ञानमूलत्वान्निर्मूलेति विरुद्धं, ज्ञाने सति तस्य विनाशात् ॥ ४ ॥

एतस्याऽनर्थजालस्य निवृत्तावुपायमाहैतदिति । मदुदितं मदुक्तप्रकारं नैपुणं निष्ठं साधनान्तरमाह—न निन्दतीति । सूर्यवत् समोऽभवत् । ज्ञानविज्ञाननैपुणं लाभोपायमाह—प्रत्यक्षेणेति । घटपटादिकमाद्यन्तवत् प्रत्यक्षेण ज्ञात्वा, अनुमानेनाद्यन्तवद्, दृश्यं पृथिव्यादि निगमेन वेदेनाद्यन्तवद् । दृश्यं खादि । आत्मसंविदा स्वानुभवेन । चिद्भिन्नं सर्वं दृश्यमाद्यन्तवदतोऽसन्मृषेति ज्ञात्वा निःसङ्गो विरक्तः सन् विचरेत्॥ ५ ॥

तथेति । यथैकादशेऽभिहितं भगवता, तथा सनन्दनादिभिश्च श्रीवैष्णवेऽपि प्रथमेंऽशे इति प्रतिपादितोऽर्थः स्थिर इत्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्तव। भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः॥ ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः। अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे॥ ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत्। ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वरे'ति॥ ६॥

तथा श्रीगीतासु भगवान्—'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत। न तदस्ति विना यत् स्यान्मायाभूतं चराचर'मिति॥ ७॥

मिथ्यात्वं त्वधिष्ठानभूतब्रह्मज्ञानबाध्यत्वमेव। शुक्त्याद्यधिष्ठाने दोषवशादेव परिकल्पितं रजतादि विज्ञाते हि तस्मिन् बाध्यते। दोषश्च स्वरूपावृत्तिविविध-

---

र्थः। त्वमेव परमार्थः सत्यस्त्वदन्यत् सर्वं मृषेत्यर्थः। त्वत्स्वरूपाज्ञानेनेदं जगत्त्वयि कल्पितमित्याह भ्रान्तीति। अयोगिनः। अद्वितीयब्रह्मणस्तव ज्ञानयोगेन रहिताः। स्फुटार्थमन्यत्॥ ६॥

क्षेत्रज्ञमिति। अन्तःकरणेनावच्छिन्नस्तस्मिन् प्रतिबिम्बितो वाऽहमेव जीवः। मत्स्वरूपविज्ञानेनान्तःकरणे जागरे + +स्वप्ने विलीने सति स मत्तो नान्य इत्यर्थः। न तदिति। यच्चराचरं जगत् मया विनाभूतं तन्नास्ति। मदज्ञानेन मयि तदज्ञैः कल्पितं, शुक्त्यज्ञानेन यथा शुक्तौ रजतमिति॥ ७॥

द्वैतमनृतमित्युक्तं पुरा। अथ तस्यानृतत्वस्य लक्षणमुच्यते मिथ्यात्वमितीति। ध्वंसप्रतियोगित्वं तत्त्वं बोध्यम्। दोषवशा-

Digitization by Arya Samaj Charitable Foundation, Chennai

विक्षेपकरी सदसद्विलक्षणत्वादनिर्वचनीयाऽनादिरविद्यैव । तमोऽज्ञानमायादिशब्दैरपि सैवाऽभिधीयते—'न सदासीन्नासदासीत्तदानीं 'तम आसीत्तमसा गूढमग्रे प्रकेतम्' 'इन्द्रो मायाभिः पुरुरूप ईयते' 'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वर'मित्यादौ ॥ ८ ॥

इयं पुनर्ब्रह्मात्मैक्यविज्ञानान्निवर्तते 'न पुनर्मृत्यवे तदेकं पश्यति' 'न पश्यो मृत्युं पश्यति' 'तमेव विदित्वा ऽतिमृत्युमेति' 'तत्र को मोहः कः शोक एकत्वमनुपश्यत' इत्यादिश्रवणात् । अत्र मृत्युशब्दो ह्यविद्याभिधायी । 'प्रमादं व मृत्युमहं ब्रवीमि' 'सदाऽप्र-

---

दिति । चाकचिक्यादिसहकृतात्तदज्ञानादेव हेतोरित्यर्थः । तस्मिन् शुक्त्याद्यधिष्ठाने । प्रकृते को दोषस्तत्राह दोषश्चेति । आवरणविक्षेपशक्तियुक्ताऽविद्यैव दोष इत्यर्थः । सैवाऽविद्यैव । तस्याः सदसद्विलक्षणत्वं प्रमाणयति न सदिति । तदानीं प्रलये । प्रकेतं सर्वनिवासभूतं ब्रह्म तमसा गूढं समाश्रितमासीत् । इन्द्र इति बृहदारण्यके । इन्द्रः परमात्मा मायाभिरविद्यावृत्तिभिरन्तःकरणगुणैः पुरुरूपोऽसङ्ख्येयजीवरूपः । ईयते भासते । मायामिति श्वेताश्वतरश्रुतिः ॥ ८ ॥

इयमित्यविद्योच्यते । न पुनरिति । यस्तदेकं ब्रह्म पश्यति स पुनर्मृत्यवेऽविद्यायै न भवति । पुनस्तां न विन्दतीत्यर्थः । पश्य एकत्वदर्शी विद्वान् । अतिमृत्युमविद्यातिक्रमं मुक्तिमित्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मादादमृतत्वं ब्रवीमी'ति स्मृतौ तस्यां तस्य प्रयोगात् ॥ ९॥

निर्विशेषं चिन्मात्रं खलु ब्रह्मणः स्वरूपम् , 'सत्यं ज्ञानमनन्तम्,' 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' । 'नेह नानास्ति किञ्चन' । 'अथात आदेशो नेति नेति' 'न ह्येतस्मादिति नेत्यन्यत् परमस्ती'त्यादिभिः श्रुतिभिः । 'प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ शश्वत् प्र-

---

प्रमादमिति भारते सनत्सुजातवाक्यम् । प्रमादमविद्याम् । अप्रमादादेकत्वविज्ञानात् । तस्यां तस्येति । अविद्यायां मृत्युशब्दस्येत्यर्थः ॥ ९ ॥

ब्रह्मस्वरूपं कीदृशमित्यपेक्षायामाह–निर्विशेषेति । सत्यमिति सत्यादिस्वरूपमित्यर्थः । नेहेति । इह ब्रह्मणि । नानाविधं ज्ञातृज्ञेयज्ञानरूपं किञ्चन नास्तीत्यर्थः । अथेति बृहदारण्यके । अथ मूर्तामूर्तादिरूपनिरूपणानन्तरम् । यस्मात्तज्ज्ञानात् परं श्रेयो न भवत्यतो नेति नेत्यादेशः । नेति नेत्युपदिश्यमानं ब्रह्मैव ज्ञेयमित्यर्थः । जडचेतनयोर्ब्रह्मान्योर्निषेधाय वीप्सा । श्रुतिरेवादेश्चार्थं ब्रवीति । एतस्माद् ब्रह्मणोऽन्यन्न ह्यस्तीति नेत्युच्यते । तदन्यौ जडचेतनौ न स्त इति प्रथमेन नेतिनोक्तम् । द्वितीयेन दृढीक्रियते । ननु प्रपञ्चब्रह्मापि न भवेदिति चेन्नेत्याह–अन्यदिति । दृश्यात् प्रपञ्चाद् भिन्नं परं सर्वभ्रमावधिभूतं सन्मात्रं ब्रह्मास्तीति । प्रत्यस्तेति वैष्णववाक्यं प्रकटार्थम् । शश्वदिति

Digitization by Arya Samaj Charitable Foundation, Chennai

शान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्व'मित्यादिभिः स्मृतिभिश्च समस्तविशेषप्रतिषेधात् । १०॥

तदस्य प्रतिपत्तुरुपासकस्यात्मैवेति मन्तव्यम्, 'आत्मेत्येवोपासीते'त्यादिश्रवणात्, 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति शास्त्रकृताऽपि स्वीकृतत्वाच्च ॥ ११ ॥

न च सत्यादिभिः पदैर्निर्विशेषस्यैवावगतौ तेषां पर्यायतापत्तिः । पर्यायभूतानां युगपद्वचने पौनरुक्त्यञ्च ।

श्रीभागवते । शश्वत् नित्यम् । प्रतिबोधमात्रं निर्विशेषविज्ञानवपुरित्यर्थः ॥ १० ॥

तदिति । तन्निर्विशेषचिद्रूपं ब्रह्म । आत्मेति बृहदारण्यके । सोऽहमिति भावेनेत्यर्थः । आत्मेति त्विति ब्रह्मसूत्रम् । तद् ब्रह्म ममात्मेति तत्त्वज्ञा उपगच्छन्ति विदन्ति तथा ग्राहयन्ति च शिष्यानित्यर्थः ॥ ११ ॥

सत्यमित्यादि श्रुतिं विशिष्टब्रह्मपरां द्वैतिनो व्याचक्षते तान्निराकरोति न चेति । तेषां सत्यादिपदानाम् । एकार्थाभिधायकत्वं पर्यायत्वम् । पौनरुक्त्यञ्चेति । घटकलशकुम्भानानयेतिवत् पुनरुक्तिः स्यादित्यर्थः । इति न च वाच्यमित्यन्वयः । कुत इत्याह-निर्गुणश्रुतीति । सत्यत्वादिगुणविशिष्टस्वीकारे साक्षी चेताः केवलो निर्गुणश्चेति वाक्यं विरुद्धं स्यादित्यर्थः । एतदुक्तं भवति-यथा भरतादिभिराचार्यैर्वाचकलाक्षणिकव्यञ्जकास्त्रिविधाः शब्दास्तेषामभिधालक्षणाव्यञ्जनास्तिस्रो वृत्तय-

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मात् सत्यत्वादिगुणविशिष्टाभिधायीनि तानीति वाच्यं, निर्गुणश्रुतिविरोधापत्तेः ॥ १२ ॥

ततश्चासत्याज्जडात्परिच्छिन्नाच्च व्यावृत्तिं क्रमादिमा निगमयन्ति। व्यावृत्तिस्तु न भावरूपो नाप्यभावरूपो धर्मः, किन्तु सर्वेतरव्यावृत्तब्रह्मात्मिकैव। यथा शौक्ल्यादेर्नैल्यादिव्यावृत्तिः शौक्ल्यादिरूपैव न धर्मान्तरम्। एवञ्च सति तेषामैकार्थ्यपर्यायता चेति न कापि क्षतिरस्ति ॥ १३ ॥

यस्तु 'द्वा सुपर्णा सयुजा सखाये'त्यादिषु भेदवादोऽवगम्यते स खलु न शास्त्रतात्पर्यगोचरः प्रसिद्धेः

स्ताभिर्बोध्या वाच्यलक्ष्यव्यङ्ग्यास्त्रयोऽर्थाः, व्यञ्जनाया व्यङ्ग्यानाञ्चाऽसङ्ख्याता भेदाः प्रतीतिवशात् स्वीकृताः प्रतीताश्च सर्वैस्तथाऽस्माभिरपि कल्प्यते। जात्यादीनि प्रवृत्तिनिमित्तानि विना, विना च लक्षणया सत्यादयः शब्दा निर्विशेषां चितं बोधयन्तीति निर्गुणश्रुतिजातया प्रतीत्या स्वीकार्यमिति ॥१२॥

पूर्वोक्ते पक्षे पुनरुक्तिं वीक्ष्य निर्विशेषाञ्चितं स्थापयितुं तद्वादी नास्तिकाभ्युपगतेनाऽपोहवादेन प्रवर्तते। ततश्चेति। तं पूर्वोक्तं पक्षं विहायेत्यर्थः। ल्यब्लोपे कर्मणि पञ्चमी। गोत्वमगोभिन्नत्वमितिवत् सत्यत्वमसत्यभिन्नत्वमित्यादिव्यावृत्तेः स्वरूपम्। एवमिति। तेषां सत्यादिपदानाम् ॥ १३ ॥

ननु जीवेशभेदोऽपि शास्त्रेणोच्यते तस्य का गतिरिति चे-

Digitization by Arya Samaj Charitable Foundation, Chennai

फलाभावाच्च, किन्तु व्यवहारगोचर एव मृषाभूतः। जडजीवात्मकः प्रपञ्चः खलु शुक्तौ रूप्यमिव ब्रह्मण्यध्यस्तो मिथ्याभूतस्तेन तद्भेदोऽपि तथा ॥ १४ ॥

एवं हि श्रीविष्णुपुराणे पराशरो निश्चिनोति—'ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्त्रिदिशो दिशश्च। सरित् समुद्राश्च स एव सर्वं यदस्ति चैवं प्रवर्य्य ॥ ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः। ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि ॥ यदा तु शुद्धं निजरूपि सर्वं

चत्राह—यस्तु द्वेति। प्रसिद्धेरिति। हालिकैरपि स्वेतरेभ्यः स्वभेदो ज्ञायते एव न तत्र शास्त्रापेक्षाऽस्ति। फलाभावाच्चेति। भेदिनामीशोपासनया वैकुण्ठं गतानामपि तत्रेशमुपासीनानां न पारतन्त्र्यनिवृत्तिर्नृपसेविनामिव सम्पन्नानामपीति न तत्र फलित्वमस्तीति भावः। नन्वयमपुमर्थो भेदः कुतो जातस्तत्राह—जीवजडेति। यथा शुक्तेरज्ञानादेव तत्र रजतं भासते तथा ब्रह्मणोऽज्ञानादेव तस्मिन् प्रपञ्च इति रजतवत् प्रपञ्चो मृषैव। ततश्च प्रपञ्चभेदोऽपि मृषैव ॥ १४ ॥

पराशरोऽपि महर्षिरेतमर्थमवादीदित्याहैवमिति। ज्योतींषि विष्णुरित्यादौ स्थाणुः पुरुष इत्यादिवद्बाधायां सामानाधिकरण्यं बोध्यम्। ज्ञानेति। यतो भवान् ज्ञानस्वरूपोऽतस्तस्याशेषमूर्तित्वं शैलाब्धिधरादिरूपत्वं देवमानवाद्याकारत्वञ्च मृषेत्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

कर्मक्षये ज्ञानमपास्तदोषम् । तदा हि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः ॥ वस्त्वस्ति किं कुत्र चिदादिमध्यपर्यन्तहीनं सततैकरूपम् । यच्चाऽन्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्त्वम् ॥ मही घटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततो-

---

ततो ज्ञानस्वरूपस्य भगवतोऽशेषमूर्तिताया मृषात्वादेव हेतोः । शैलादिभेदान् ज्ञानस्वरूपे तस्मिन् शुक्त्यादौ रजतादीनिव तदज्ञानेन विरुद्धेन भ्रमरूपेण ज्ञानेन विजृम्भितान् कल्पितान् जानीहि । क्लीबत्वमार्षम् । नन्वस्य भ्रमस्य निवृत्तिः कदा तत्राह—यदा त्विति । यदा ज्ञानं निजरूपि सत् शुद्धं भवति । तथा त्वं कदेति चेत्तत्राह—यदा सद्गुरूपदेशोपलब्धत्व इत्यनेन सर्वकर्मक्षये सति तदपास्तदोषं विनिवृत्तभेदमलं भवति । तदा सङ्कल्पतरुफलानि वस्तुषु वस्तुभेदा न भवन्ति । शुक्त्यादिज्ञानेन रजतादय इव शैलादिभेदा विनङ्क्ष्यन्तीत्यर्थः । असत्त्वादेव शैलादयो वस्तुभेदा न भवन्तीत्याह वस्त्वस्तीति । आदिमध्यान्तहीनं सततैकरूपं वस्तु किं कुत्रचिदस्ति? नास्त्येवेत्यर्थः । हे द्विज मैत्रेय । यच्च शैलादिकमन्यथात्वं परिणामं भूयः पुनः पुनर्याति तत्तथोक्तलक्षणं न भवति । 'भूयस्तु स्यात् पुनः पुन'रिति श्रीधरः । तत्र तत्त्वं वस्तुत्वं कुतः, नास्त्येवेत्यर्थः । अन्यथात्वमभिनयेनाह—महीति । मही मृत्तिका कुलालेन व्यापारिता घटत्वं याति । स्फुटिताद् घटतः कपालिका भवति । सा चूर्णीभावं गता रजो भवति । रजसस्त्वणुः । पुनः पुनरेवमिति शैला-

Digitization by Arya Samaj Charitable Foundation, Chennai

ऽणुः । जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु' ॥ १५ ॥

'तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचिद्विज वस्तुजातम् । विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥ ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् । एवं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति' ॥ १६ ॥

दीनां परिणामित्वम् । जनैरिति । स्वकर्मस्तब्धात्मज्ञानैर्जनैरत्र जगति मुहुः परिणामिशैलधरादिमये किं वस्तु ब्रह्मतत्त्वमालक्ष्यते त्वं ब्रूहीति नैवाऽलक्ष्यत इत्यर्थः ॥ १५ ॥

विज्ञानात्मकं ब्रह्मैव वस्तु तदज्ञानात्तत्र कल्पितमन्यत् सर्वमवस्त्वेवेत्युक्तमपि दृढतार्थं पुनरप्याह–तस्मादित्यादि द्वाभ्याम् । विज्ञानमात्मतत्त्वं विनाऽन्यद् वस्तुजातं शैलादि नास्ति । ननु प्रतीयमानं कथमपलपनीयं तत्राह–विज्ञानमिति । एकमद्वितीयमित्यर्थः । यथा रज्जुरेव तत्स्वरूपानभिज्ञैर्भुजङ्गाद्यभावेनाऽभ्युपेयते तथात्मवस्त्वेव तत्स्वरूपानभिज्ञैः शैलादिभावेनेति भुजङ्गादिवत्तन्मृषैवेत्यर्थः । आत्मवस्तु परिशोधयति ज्ञानमिति । विशुद्धं निर्विशेषम् । विमलमिति देहयोगेन, विशोकमित्यन्तर्बहिःकरणयोगेन च वर्जितम् । अतोऽशेषेति । एवं यदुक्तविधया ज्ञानमात्मतत्त्वं सदैकमेकरसम् । विद्योपहितः स एव वासुदेवः परमः श्रीमान् । यत आत्मतत्त्वादन्यन्नास्ति । तदन्यत् सर्वं मृषेति ॥ १६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

'सद्भाव एव भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्। एतत्तु यत् संव्यवहारभूतं तत्राऽपि चोक्तं भुवनाश्रितं ते॥ यज्ञः पशुर्वन्हिरशेष ऋत्विक् सोमः सुराः स्वर्गमयश्च कामः। इत्यादिकर्माश्रितमार्गदृष्टं भूरादिभोगाश्च फलानि तेषाम्॥ यच्चैतद् भुवनगतं मया तत्रोक्तं सर्वत्र व्रजति हि कर्मवश्य एकः। ज्ञात्वैतद् ध्रुवमचलं सदैकरूपं तत् कुर्याद्विशति हि येन वासुदेव'मिति॥ १७॥

अत एव भेदग्राहिणं श्रुतिर्निन्दति, भयञ्च तस्याभिधत्ते 'अथ योऽन्यां देवतामुपास्ते' 'अन्योसावन्योह-

---

सदिति। एवं मदुक्तप्रकारकः सद्भावः समीचीनः श्रुतेराभिप्रायो भवतस्तव मयोक्तः। स कीदृगित्याह—ज्ञानमात्मतत्त्वम्। अन्यच्छैलाब्धिधरादि। एतदिति। तत्रापि सत्यासत्यार्थोपाख्याने भुवनाश्रितं यन्मया तत्रोक्तं तदेतत्तु संव्यवहारभूतं स्वाग्निकार्योच्चयवन्न तु पारमार्थिकमित्यर्थः। दर्शयति यज्ञ इति। तेषां कर्मणाम्। कर्मफलान्यनित्यानीत्याह—यच्चेति। एतद् भोग्यभोगस्थानजातम्। कर्मवश्यत्वादेक एव तत्र सर्वत्र पर्यायेण व्रजति। एतत् कर्मफलजातमनित्यं ज्ञात्वा जनस्तत्साधनं कुर्यात्। येन वासुदेवं विशति तत्र लीयते। ध्रुवं नित्यम्। अचलं पूर्णम्॥ १७॥

अत एवेति। भेदस्य मृषात्वादेवेत्यर्थः। अथेति बृहदा-

Digitization by Arya Samaj Charitable Foundation, Chennai

मस्मीति वसवेद यथा पशुरेवं स देवानामिति', 'यदेवेह तदमुत्र यदमुत्र तदन्विह । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' ॥, 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवती'त्यादिका । तस्मात् परापरात्मनोरभेद एव पारमार्थिकः, भेदस्तु व्यावहारिक इति सिद्धम् ॥ १८ ॥

'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते', 'तद्योहं सोऽसौ योऽसौ सोहमि'ति 'तत्त्वमसी'ति चैवमादिष्वपि भागलक्षणया विरुद्धान् गुणांशान् विहाय संविदनुभूतिपर्यायं चैतन्यमात्रमेकं तयोः

ण्यके । परमात्मदेवता स्वस्मादन्यतयोपासीनः पशुवदज्ञ इत्यर्थः । यदेवेति काठके । इह जीवस्वरूपे । अमुत्रेश्वरस्वरूपे च । चैतन्यमात्रमेकं वेद्यं तत्र नानात्वदर्शी जन्ममरणप्रवाहं विन्दतीत्यर्थः । यदा ह्येवेति तैत्तिरीयके । एतस्मिन्नानन्दमये ब्रह्मणि । उदरमल्पमन्तरं विशेषं यदैष कुरुते भावयति तदाऽस्य संसारभयमुत्पद्यते इत्यर्थः । 'अवकाशे बहिर्योगे विशेषेऽवसरेऽन्तर'मिति हलायुधः । भेदस्तु व्यावहारिक इति । एतत्तु यत्संव्यवहारभूतमिति स्मृतेः ॥ १८ ॥

स्वतः प्रतीतिपक्षेऽपोहपक्षे च स्थूलधियां यद्यसन्तोषस्तदा लक्षणयैवाऽद्वैतं साधयामीति भावेनाह त्वं वा इति जाबालाः । तद्योऽहमित्यैतरेयिणः । भागलक्षणया जहदजहत्स्वार्थया । विरु-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वरूपमवगमनीयं निर्गुणवाक्यानुरोधादेव। बलवच्च निर्गुणवाक्यं स्वरूपपरत्वात् ॥ १९ ॥

यत्त्वस्य क्वचिद्रूपं वर्णयन्ति तत् किल कल्पितमेव 'चिन्मयस्याऽद्वितीयस्य निष्कलस्याऽशरीरिणः। उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पने'त्यादिश्रवणात्। कार्यञ्च तेषामरुन्धतीदर्शनन्यायेन क्रमेण प्रत्यक्प्रवणचित्ततैव ॥ २० ॥

एवञ्चाऽसत्यैरेव शास्त्रादिभिः सत्यभूता ब्रह्मतावासिरसत्यैरेव स्वाग्निकस्त्रीसङ्गशिरश्छेदादिभिः सत्यभूत-

---

द्धान् विभुत्वाणुत्वनियन्तृत्वनियम्यत्वादीन् गुणांशान् विहाय त्यक्त्वा। बलवच्चेति। सगुणवाक्यं तु गुणपरत्वाद् दुर्बलमित्यर्थः ॥ १९ ॥

ननु सत्पुण्डरीकनयनं मेघाभवैद्युताम्बरमित्यादौ ब्रह्मणो रूपित्वश्रवणान्निर्गुणत्वं कथं ब्रवीषीति चेत्तत्राह यत्त्वस्येति। क्वचित् श्रुतिप्रदेशे स्मृतिषु चेत्यर्थः। चिन्मयस्येति श्रीरामोपनिषदि दृष्टम्। चिन्मयस्य विज्ञानमात्रस्य। अद्वितीयस्य द्वितीयभेदासहस्य। निष्कलस्य निरंशस्य। अशरीरिणो देहेन्द्रियप्राणसम्बन्धशून्यस्येत्यर्थः। प्रत्यगिति। विज्ञानमात्रब्रह्मनिरतमनस्तेत्यर्थः ॥ २० ॥

नन्वद्वितीयचिद्वादे तदन्येषां सर्वेषामर्थानां कल्पितत्वेन मृषात्वात् कथं मृषाभूतानां शास्त्राचार्यतदुपदिष्टसाधनानां ब्रह्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

सुखदुःखादेरुपलम्भात् । अत उक्तम्—'छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिण'इति । तस्मान्निर्विशेषचिन्मात्राद्वैतं ब्रह्मैव सत्यं, तदन्यत् सर्वं तत्र परिकल्पितं मिथ्याभूतमिति ॥ २१ ॥

अत्राऽऽचक्ष्महे—न ह्यभेदे फलमस्ति। अज्ञाननिवृत्तिरानन्दावाप्तिश्च फलम् । तत्र नाद्यः, प्राक् प्रत्याख्यानात् । नान्त्यः निर्विशेषत्वक्षतेः । न चावाप्तिः स्वरूपमेव न धर्म इति वाच्यं, तथा सति साधनवैयर्थ्याद्यापत्तेः । नाऽपि ब्रह्मतापत्तौ सा श्रुतिः प्रमाणाभावमावहति एवशब्दस्य तत्र सादृश्यार्थकत्वात् । 'व वा यथा तथैवैवं साम्ये' इति ह्यनुशासनम् ।

तापत्तिलक्षणमोक्षहेतुत्वं स्यात्तत्राहैवञ्चाऽसत्यैरेवेति । शुक्तिरजतादिवन्मृषाभूतैरेव शास्त्रादिभिः सत्या मुक्तिर्भवतीत्यत्रास्ति दृष्टान्तः । मृषाभूता अपि स्वाप्निका योषिदाश्लेषादयः सुखादीनि सत्यानि जनयन्तः प्रतीयन्ते तद्वत् । एवमुक्तं भगवतापीत्याह छायेति । व्याख्यातं प्राक् । पूर्वपक्षं सङ्कलयति तस्मादिति ॥ २१ ॥

अत्रेति । महति पूर्वपक्षे परिहारसमाधाने ब्रूमहे इत्यर्थः । इह पूर्वोक्तान् पूर्वपक्षान् हृदि निधाय ते द्वे भावनीये। न हीति । अभेदे चिन्मात्राद्वैते । प्राक् पूर्वपादे वामनाख्ये । निर्विशेषत्वेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ततश्च ब्रह्मैव ब्रह्मसम इत्येवार्थः । अत एव ब्रह्मभावानन्तरं ब्रह्माऽप्ययः सङ्गच्छते नान्यथा । श्रुतिश्च—'निरञ्जनः परमं साम्यमुपैती'ति, 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतमे'ति च । स्मृतिश्च—'इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' ॥ इति, 'भोगमात्रसाम्यलिङ्गाच्चे'ति न्यायश्च ॥ २२ ॥

आनन्दित्वप्रतीतेरिति भावः । न चेति । अवाप्तिरानन्दलाभः । सा श्रुति'र्ब्रह्मविद् ब्रह्मैव भवती'त्यादिका । व वेत्यमरवाक्यम् । अत एवेति । एवशब्दस्य साम्यार्थकत्वेन ब्रह्मतापत्तेरपनीतत्वाद् ब्रह्मभावेन ब्रह्मसाम्यभवनस्य व्याख्यातत्वाच्चेत्यर्थः । अन्यथा ब्रह्मतापत्तिस्वीकारे । निरञ्जन इति मुण्डके । निर्मायः सन्नित्यर्थः । यथोदकमिति काठके । तादृक् तत्समम् । मुनेर्ब्रह्मध्यायिनो विजानतो ब्रह्मानुभविनो जनस्यात्मा । एवमासिक्तोदकवद्ब्रह्मसमो भवतीत्यर्थः । साम्यमत्र नैरञ्जन्यांशेन ज्ञेयम् । इदमिति श्रीगीतासु । सर्गप्रलययोर्जन्मव्यथाविरहान्मुक्तम् । भोगेति ब्रह्मसूत्रम् । नेति पूर्वतो वर्तते । परमं साम्यमुपैतीति स्वरूपसामर्थ्याभ्यां जीवेशयोः साम्यं वाक्यार्थो न । कुतः, 'सोऽश्नुते सर्वान् कामानि'त्यत्र भोगमात्रे मुक्तस्य ब्रह्मसाम्यवचनाल्लिङ्गादेवेत्यर्थः ॥ २२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

न च लोकेऽज्ञातो जीवब्रह्माभेदः शास्त्रेणैव ज्ञायतेऽतस्तत्र तस्य तात्पर्यमिति वाच्यं, शास्त्रतात्पर्यनिर्णेतृभिः षड्भिर्लिङ्गैस्तद्भेदस्यैव निर्णेष्यमाणत्वात् । तदद्वैतं ब्रह्मातिरिक्तं ब्रह्मात्मकं वेत्यादिभिस्तदभेदस्य पुरा निरासाच्च । तस्मान्नरशृङ्गादिवदसत्त्वादेव तथात्वं तस्य ॥ २३ ॥

एवञ्च 'सदेव सौम्येद'मित्यादाविदंशब्दितस्य जगतः शक्तिमद् ब्रह्मैवोपादानं निमित्तञ्चेति विवक्षितम्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्, पदेभ्यस्तथावगमाच्च । न चैतदभेदमात्रे मानं, एकपदेनैव तत्सिद्धौ पदान्तरवैयर्थ्यापत्तेः । न च सजातीयविजातीयस्वगतभेदनिरासात् पदत्रयमर्थवदेवेति वाच्यम्, अभेदस्य नि-

---

यत्तु मध्ये शास्त्रैकगम्यो ब्रह्माभेद इत्यनेन लोकाज्ञातः शास्त्रमात्रज्ञातस्तदभेद इत्युक्तं तन्निरस्यति न चेति । नन्वद्वैतिभिरद्वैतं षड्भिर्लिङ्गैर्निर्णीतमस्तीति चेत्तत्राह तदद्वैतमिति । पुरा पञ्चमे पादे । तथात्वमिति । तस्याऽभेदस्याऽज्ञातत्वमित्यर्थः ॥ २३ ॥

एवञ्चेत्यादि । एकेति । येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञानादुपादानत्वम् । पदेभ्यस्तथेति । 'तदैक्षत बहु स्यां प्रजायेये'ति 'तत्तेजोऽसृजत' इत्यादिषु

Digitization by Arya Samaj Charitable Foundation, Chennai

रस्तत्वात् । तस्मादेवाद्वितीयपदे तदितरसर्वाभावस्तस्य च निरुपाख्यत्वमधिकरणरूपत्वञ्चेत्यादिकल्पनं दूरोत्सारितम् । किञ्च तेन कल्पनेनाऽपि नाऽभिमतं सिद्ध्यति । अभावेनैव सद्वितीयत्वापत्तेः । द्वितीयस्य निरुपाख्यत्वेऽपि ब्रह्मणि तदाधारत्वापत्तेः । अभावस्याऽधिकरणरूपत्वे तु घटाभावो भुवीत्यत्र भुवि भूरित्याद्यनुभवाप-

---

सृजतीत्यादिपदेभ्यो निमित्तत्वञ्चेत्यर्थः । न चेति । एतत् सदेव सौम्येति वाक्यम् । तत्सिद्धावभेदनिष्पत्तौ । पदान्तरयोरेवाऽद्वितीयपदयोर्निष्फलतापत्तेः । न च सजातीयेति । क्षेत्रज्ञेभ्यः सजातीयः । प्रकृत्यादिभ्यो विजातीयः । स्वगुणेभ्यः स्वगतश्च भेदः प्रतीयते । तन्निवारकतया त्रीणि पदानि सार्थकानीति न वाच्यमित्यर्थः । निरस्तत्वाद्वामनपादे । तस्मादिति । अभेदस्य पूर्वत्र निरस्तत्वादेव हेतोः । तस्य चेति । ब्रह्मेतरसर्वाभावस्य खपुष्पादिवदवस्तुत्वमित्यर्थः । अधिकरणरूपत्वं ब्रह्मात्मकत्वमित्यर्थः । तथा च सर्वैरुपायैरद्वैतमेव साध्यते । तस्य च पूर्वं निरस्तत्वादुपायानां निरर्थकत्वमिति भावः । किञ्चेति । तेनाद्वितीयपदे ब्रह्मणितदन्यसर्वाभावाश्रयत्वकल्पनेन सर्वाभावस्य निरूपाख्यत्वकल्पनेन चेत्यर्थः । तवाभिमतं निर्विशेषचिदद्वैतं न सिद्ध्यति । द्वितीयस्य तदितरसर्वाभावस्य । ब्रह्मणि अभावाधिकरणत्वं हि भावरूपं प्रतीतेरिति स्वमतेन दूषणमर्पितम् । अथ तार्किकमतेन तदर्पयति—अभावस्येति । भुवि घटाभाव इत्यत्र भुवि भूरित्यापत्तेरित्यर्थः । ब्रह्मणः सर्वाभाव-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्तेर्ब्रह्मणो निरुपाख्यतापत्तेश्चेत्यन्ये । तस्मात्तुच्छमेतत् ॥ २४ ॥

नेह नानेत्यत्र ब्रह्मव्यूहेषु प्रतीतस्य भेदस्य निषेधः । तेषु नानात्वेन प्रतीतिरभेदे सत्येवेति श्रुतिराह—'एकोऽपि सन् बहुधा योऽवभाती'ति, 'एकं सन्तं बहुधा दृश्यमान'मिति च । धर्मभेदस्य वायं प्रतिषेधः । श्रुतिश्च 'यथोदकं दुर्गे वृष्ट'मित्याद्या । न चात्र नानाविधज्ञातृज्ञेयत्वादिप्रतिषेधः, तस्य श्रुतिप्रतिपादितत्वात् ॥ २५ ॥

'यत्र हि द्वैतमिवे'त्यादौ च न भेदस्य प्रतिषेधः पारमार्थिकत्वात् । 'पृथगात्मानं प्रेरितारञ्च मत्वा जुष्ट-

---

रूपत्वे शून्यतापत्तेश्चेत्यन्ये तार्किकास्तस्मिन् दूषणमर्पयीन्त । स्वमते त्वभावस्याऽधिकरणरूपत्वेपि विशेषबलादभावत्वमप्यस्तीति बोध्यम् । तस्मादिति । एतदद्वितीयपदेऽर्थद्वयकल्पनम् ॥ २४ ॥

नेह नानेति श्रुतिं व्याचष्टे नेहेत्यादिना । ब्रह्मव्यूहेषु वासुदेवादिषु चतुर्षु । धर्मभेदस्य वेति । ब्रह्मधर्मा ब्रह्मणो भिन्ना न भवन्तीति वा तदर्थः । पराभिमतं वाक्यार्थं दूषयति न चात्रेति । तस्य ज्ञातृज्ञेयादिभावस्य । 'तमात्मस्थं येऽनुपश्यन्ति धीराः । एतज्ज्ञेयं नित्यमेवात्मसंस्थ'मित्यादिश्रुतिप्रतिपादितस्य श्रुत्यैव प्रतिषेधे तस्या उन्मत्तताप्रत्तिरिति भावः ॥ २५ ॥

यत्र हीत्यादिभिरनृतेन हि प्रत्यूढा इत्येतैर्भेदः कल्पितत्वात्प्रतिषिद्ध इति यदुक्तं तत्तावन्निरस्यति यत्र हि द्वैतमित्यादिना ।

Digitization by Arya Samaj Charitable Foundation, Chennai

स्ततस्तेनाऽमृतत्वमेति' जुष्टं यदाप सति अन्यमीशमस्य महिमानमिति वीतशोक इति तज्ज्ञानस्य मोक्षहेतुत्वश्रवणात् ॥ २६ ॥

अयमेवार्थः—ब्रह्मायत्तवृत्तिकत्वाद् ब्रह्मात्मकमिदं जगद् व्यपदिश्यते। प्राणायत्तवृत्तिकत्वाद्यथा प्राणात्मकं बहिर्व्यपदिष्टम्। छान्दोग्ये—'न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते। प्राण इत्येवाचक्षते।

पारमार्थिकत्वादिति। नित्यत्वादित्यर्थः। तत्त्वे हेतुमाह—पृथगिति श्वेताश्वतरोपनिषदि। आत्मानं स्वप्रेरितारञ्च परेशं पृथङ्मत्वा प्रेर्य्यत्वप्रेरकत्वाभ्यामणुत्वविभुत्वाभ्यां भृत्यत्वस्वामित्वाभ्याञ्च भेदं तयोर्विज्ञाय। ततस्तदनन्तरं जुष्टस्तमुपासीनस्तेन पार्थक्यवत्ताजोषणेनाऽमृतत्वमेति। जुष्टमिति प्रकटार्थम्। तज्ज्ञानस्य भेदावगमस्य। अत्र जीवेशयोर्भेदोऽणुत्वविभुत्वादिनित्यधर्मकृतत्वात् सत्यस्तस्य ज्ञानञ्च मोचकम्। असत्यत्वेन तज्ज्ञानं मोचकं न श्रूयेत। न हि शुक्तिकारजतज्ञानं मोचकं श्रुतं तर्हि शुक्तिकाज्ञानं सत्यत्वान्मोचकमस्तु, मैवमश्रुतत्वात्। भेदज्ञानस्य मोक्षहेतुत्वमुक्तं याज्ञवल्क्येन भारते—'यदा तु पश्यतेऽन्योऽहमन्य एष इति द्विज!। तदा स केवलीभूतः षड्विंशमनुपश्यती'ति ॥ २६ ॥

चोद्यं निरस्य स्वमते वाक्यार्थं सप्रमाणमाह—किन्त्विति। न वै इति। वागादीनि न वागादिशब्दव्यपदेश्यानि किन्तु मा-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राणो ह्येवैतानि सर्वाणि भवती'ति ॥ २७ ॥

तथा ब्रह्मनिष्ठत्वाद् ब्रह्मव्याप्यत्वाद्वा ब्रह्मात्मकं तत् स्मर्यते । 'अन्यश्च परमो राजन् तथान्यः पञ्चविंशकः । तत्स्थत्वादनुपश्यन्ति ह्येक एवेति साधव' इति, 'सर्वं समाप्नोषि ततोऽसि सर्व' इति च ॥ २८ ॥

तथा च संसारदशायां तत्त्वाज्ञानात् स्वतन्त्रमिव तदज्ञस्य भवति । तत्रेतर इतरं पश्यति स्वतन्त्रं जानातीत्यर्थः । यदा तु शास्त्राचार्यप्रसादाद्विध्वस्ताऽज्ञानः सन्ततानुचिन्तनेन सञ्जातब्रह्मसाक्षात्कारस्तत्स्वरूपश-

---

णाधीनवृत्तिकत्वात् प्राणशब्दव्यपदेश्यानि प्राणरूपाणि च तानि यथा तत्प्रकृतेऽपीति ॥ २७ ॥

गत्यन्तरे प्राह—अन्यश्चेति । मोक्षधर्मे जनकयाज्ञवल्क्यसंवादे विश्वावसुं गन्धर्वराजं प्रति याज्ञवल्क्यवाक्यम् । परमो हरिः । पञ्चविंशको जीवः । तत्स्थत्वात् परमाधारकत्वात् । एकः परमाभिन्नः । सर्वमिति श्रीगीतास्वर्जुनवाक्यम् । समाप्नोषि व्याप्नोषि । ततः सर्वोसि सर्वं त्वदात्मकमुच्यते इत्यर्थः ॥ २८ ॥

सङ्गतित्रयं प्रदर्श्य यत्र हीति वाक्यार्थं योजयति । तथा चेत्यादितत्त्वाज्ञानात्तदायत्तवृत्तिकत्वाद्यबोधादित्यर्थः । यदा त्विति । ज्ञानदशायां मोक्षदशायाञ्चेत्यर्थः । विध्वस्ताज्ञानो विनष्टस्वातन्त्र्याभिमानः स्फुरिततदायत्तत्वादिधर्मद्वयश्चेत्यर्थः । सन्ततानुचिन्तनेन सर्वदा निदिध्यासनेनेत्यर्थः । स्वरूपशक्त्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

कत्यनुग्रहेणोपलब्धपार्षदभावस्तदा केन कं पश्येदपि तु तेनैव तं पश्येदित्यर्थः ॥ २९ ॥

श्रुतिरप्येवमाह—'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वा'मिति । स्मृतिश्च-'प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् । आरब्धकर्मनिर्वाणो न्यपतत् पाञ्चभौतिक' इति, 'आदत्ते हरिहस्तेन हरि-

---

नुग्रहेण भक्तभावानुविधायिभगवत्सङ्कल्पप्रवृत्तपरासारह्लादसंवित्प्रसादेन लब्धपार्षदभावसिद्धभगवत्सेवोपयोगिविग्रह इत्यर्थः । तदा प्राकृतदेहेन्द्रियाणामभावात् केन प्राकृतेन चक्षुषा कं बान्धवादिकं जनं पश्येन्न केनचित् कश्चिदित्यर्थः । अपि तु तेन भगवन्तं पश्येदित्यर्थः ॥ २९ ॥

भगवत्तनुं साक्षात्करोति तत्सङ्कल्पसिद्धां तनुञ्च विन्दतीत्यत्र कठश्रुतिमुदाहरति यमेवेति । यं मुमुक्षुं साधनसम्पन्नं जीवम् । एष परमात्मा । वृणुते स्वीकरोति । तेनैव स लभ्यः । कथं लभ्यस्तत्राह-स्वां तनुं तस्य विवृणुते दर्शयति । स्वसङ्कल्पसिद्धां तनुं ददाति चेत्यर्थः । ददातीत्यत्र स्मृतियुगलमुदाहरति प्रयुज्यमाने इति । प्रथमे नारदवाक्यम् । तां भागवतीं तनुं प्रति । मयि प्रयुज्यमाने नीयमाने सति । आदत्त इति । हरिहस्तेनेत्यादि । हरिसङ्कल्पप्रवृत्तपरासाररूपत्वादिति भावः । तृतीये ब्रह्मवाक्यञ्च । 'त्वं भक्तियोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् । यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'ति । इतरथेति । मोक्षे नि-

Digitization by Arya Samaj Charitable Foundation, Chennai

दृष्ट्यैव पश्यति । गच्छेच्च हरिपादेन मुक्तस्यैषा स्थितिर्भवे'दिति च । इतरथा सर्वपदसङ्कोचापत्तिः ॥३०॥

वाचारम्भणमित्यादौ कारणाद् ब्रह्मणः कार्यजगदभिन्नमित्येवार्थः । आह चैवं भगवान् सूत्रकारः—'तदनन्यत्वमारम्भणशब्दादिभ्य' इति । तत्र च ब्रह्मवत् सत्यं जगदिति प्रतिपन्नम् । इतरथा सत्याऽसत्ययोरभेदानुपपत्तिः ॥ ३१ ॥

इतोऽन्यदार्तमित्यत्राऽन्यज्जगदार्तं दुःखीत्येवार्थः, 'आर्तो जिज्ञासुरर्थार्थी'त्यत्र तथाऽवगमात् । दुःखि चेदमखिलम्, 'तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधि-

---

र्विशेषब्रह्माभिन्नो भवतीति स्वीकारे । यत्र त्वस्य सर्वमात्मैवाऽभूदिति सर्वशब्दस्य सङ्कोचः स्यात्, यत्रायमात्मैवाऽभूदित्येतावतैव विवक्षितसिद्धेरिति भावः ॥ ३० ॥

तदनन्येति । तस्मात् प्रधानक्षेत्रज्ञशक्तियुक्तत्वाद्ब्रह्मणोऽनन्यदभिन्नमेव जगत् । कुतः ? 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मित्यादिवाक्येभ्य इत्यर्थः । तत्र चेति । तदनन्यत्वसूत्रे । इतरथा शुक्तिरजतवज्जगतो मिथ्यात्वस्वीकारे । सत्यासत्ययोर्ब्रह्मजगतोः ॥ ३१ ॥

तस्मादिति श्रीदशमे ब्रह्मवाक्यम् । असत्स्वरूपं परिणामिवपुः परतन्त्रं वा । 'सत्त्वं स्वातन्त्र्यमुद्दिष्ट'मित्यादिस्मृतेः । एतमि-

Digitization by Arya Samaj Charitable Foundation, Chennai

षणं पुरुदुःखदुःख'मित्युक्तेः । एतमित्यादौ प्रत्यक्परता-विरोधिकर्कशकपटरूपमप्रियमसत्यं वाक्यमनृतमुच्यते । तेन यस्मात् प्रजाः प्रत्यूढाः, तस्मादेनं ब्रह्मलोकं न विदन्तीत्येवमर्थः। ऋतं खलु सूनृतं वाक्यम् 'ऋतञ्च सूनृती वाणी'ति भगवद्व्याख्यानात् । तद्भिन्नमनृतम् ॥ ३२॥

एवञ्च 'गुणाः सृजन्ती'त्यादावरविन्दनेत्रो भगवान् ज्ञानमात्राद्वैतवादमुपदिशतीति न शक्यं भणितुं, स्वस्यापि परेशाभिमानिनो मिथ्याभूतत्वोपपादनेनोपदेष्टृत्वासम्भवात्, पूर्वापरनिजोक्तेर्विरोधाच्च । परमार्थरूपपरमेश्वरत्वैमुख्यादस्य जीवस्य संसृतिस्तत्सांमुख्यात्तु तदुपरतिरिति शास्त्रेऽस्मिन्नभ्यस्यते ॥ ३३ ॥

तस्मादयमेवार्थः—नश्वरतया विश्वं विपश्यन् हृदयशुद्धिलोकसङ्ग्रहेच्छया निवृत्तं कर्माऽनुतिष्ठन् यथा-

---

ति । प्रत्यूढा ग्रस्ताः । ऋतं खलु सूनृतमिति । 'सूनृतं प्रिये सत्ये' इत्यमरश्च । ऋतञ्चेत्येकादशे ॥ ३२ ॥

श्रुतिशैल्यां परकृतं पूर्वपक्षं निरस्य स्वमतं तत्र प्रदर्शितम् । अथ स्मृतिशैल्यां स्वमतं दर्शयिष्यता परकृतः पूर्वपक्षस्तावद् दूष्यते—एवमित्यादिना । अस्मिन्नेकादशस्कन्धे शास्त्रे ॥३३॥

सिद्धान्ते वाक्यार्थं योजयति तस्मादित्यादिना । यथायथं यथार्हं यमान्नियमांश्च । भजन्निति न तेष्वतीवाभिनिवेशः किन्तु

Digitization by Arya Samaj Charitable Foundation, Chennai

यथं यमनियमान् भजन् मदभिज्ञगुरूपसत्तिविदिततत्त्वत्रयो विविच्य प्रणिहितमद्रूपस्तदुपसत्तिलब्धयाऽऽत्मविद्यया संसृतिं विधुनोतीति मयोदितेष्वित्यादिभिः स्वमतं प्रागुपदर्शितम्। अथ तस्य परिशुद्धये प्रतिपक्षभूतानि मतान्तराणि निराक्रियन्ते विंशत्या ॥ ३४ ॥

तेष्वथैषामित्यादिभिः सप्तदशभिः कर्मजडानां मतं स्वयमुपन्यस्य दूषितम् । जीवस्य स्वतः कर्तृभोक्तृत्वरूपमिति तदंशस्तु 'गुणाः सृजन्ती'त्येकेन साङ्ख्यमतमाश्रित्य । नानाभूताः स्वतन्त्राश्च पुरुषा इति साङ्ख्यमतं च 'यावत् स्यादि'त्यादिना सार्धेन ज्ञानमात्राद्वैतमतमाश्रित्येति । अथ तदिदं मतत्रयं कुमतमिति

भक्तावेव स इति भावः । तत्त्वत्रय इति । ईश्वरो जीवः प्रकृतिरिति तत्त्वत्रयम्। कालकर्मणोरुपलक्षणमेतत् । विविच्य प्रकृत्यादितः स्वतश्च पृथक् कृत्वा । प्रणिहितं ध्यातं मद्रूपं येन सः। तदुपसत्तिर्गुरूपासना । अथेति । तस्य स्वोपदिष्टस्य सिद्धान्तस्य । परिशुद्धये परिष्काराय परिपक्वज्ञानायेति यावत् ॥ ३४ ॥

तेष्विति । तेषु विंशतिश्लोकेषु मध्ये । अथेत्यादिभिः सप्तदशभिः कर्मजडानां मतं स्वयं भगवतैवोत्थाप्य स्वयुक्त्यैव निराकृतमित्यर्थः। जीवस्येति । तदंशः कर्मजडैरूरीकृतो मतांशः। साङ्ख्यमतमाश्रित्य भगवता दूषित इत्यन्वयः । 'गुणाः सृजन्ती'

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वयं प्रत्याचष्टे 'य एतत्समुपासीरंस्ते मुह्यन्ति शुचार्पिता' इत्यनन्तरोत्तरवाक्येनार्द्धेनेति ॥ ३५ ॥

इत्थ'ञ्चदमत्रे'त्यादिनैकजीववादरूपं रहस्यकल्पनमपि निरस्तम् । 'नित्यो नित्यानां चेतनश्चेतनानामेको

त्यस्य साङ्ख्यमतेनैवमर्थः । गुणाः सत्त्वादयः । 'गुणो मौर्व्या'-मित्यादि मेदिनीकारकोशात् । मिथुनवृत्तयस्ते । कर्माणि सृजन्ति न त्वामा । नन्विन्द्रियाणि कर्मकर्तृण्यनुभूयन्ते तत्राह-गुणोऽहङ्कारो गुणानिन्द्रियाणि सृजते इति स्वकार्याहङ्कारसृष्टानामिन्द्रियाणां यत् कर्मकर्तृत्वं तद् गुणानामेव सत्त्वादीनामित्यर्थः । नन्वात्मनो भोक्तृत्वात्कर्तृत्वं च तस्यैव स्यादुभयोरैकनिष्ठ्यादिति चेत्तत्राह-जीवस्त्विति । गुणैरिन्द्रियैः संयुक्तो जीवो न तु शुद्धः कर्मफलानि भुङ्क्तेऽनुभवतीति भोक्तृत्वमपि गुणहेतुकत्वाद् गुणानामेवेति साङ्ख्यानामेष सिद्धान्तः । यावत् स्यादित्यादि सार्द्धकन्तु प्राग् व्याख्यातमेवाऽनुसन्धेयम् । तेन निर्विशेषचिद्द्वैतिनां सिद्धान्तेन नानाभूताः स्वतन्त्राश्च पुरुषा इति साङ्ख्यमतञ्च दूषितं निरस्तं भगवतेति सम्बन्धः । अथ स्वयं तन्मतत्रयं दूषयति । य इति । कर्मजडानां साङ्ख्यानां केवलाद्वैतिनां च यन्मतं ये तत्तन्मतावलम्बिनः समुपासीरन् स्वीकुर्वीरन् ते शुचार्पितास्तत्तन्मतानां भ्रान्तिविजृम्भितत्वात् शोकप्रेता मुह्यन्ति संसारसरसि निमज्जन्तीत्यर्थः ॥ ३५ ॥

इत्थञ्चेति । एतस्य मतत्रयस्य भ्रान्तिविजृम्भितस्य भगवता प्रत्याख्याते सतीत्यर्थः । तस्य गुणाः सृजन्तीत्यादिकस्य ।

Digitization by Arya Samaj Charitable Foundation, Chennai

बहूनां यो विदधाति कामा'निति श्रुतेश्च । एवं सति जीवेशाविति श्रुतिस्तु तर्कसमयकल्पितावेव तावादाय सङ्गच्छते न तु श्रुतिसिद्धाविति । तस्यां तु नित्यज्ञानादिगुणकमणुचैतन्यं जीव इति नित्यज्ञानादिगुणकविग्रहस्वरूपस्त्वीश्वर इति प्रतिपादनात् ॥ ३६ ॥

तथा किं भद्रमित्यादावप्यसौ स्वशक्तिमयस्य द्वैतप्रपञ्चस्य मिथ्यात्वमाहेति शङ्कितुमप्यनुचितं, 'य एको वर्णो बहुधा शक्तियोगाद्वर्णाननेकान्निहितार्थो द-

---

सार्द्धद्वयस्यैकजीववादपरत्वरूपरहस्यकल्पनञ्च निरस्तमित्यर्थः । नित्य इत्यादि कठश्रुतेश्चैकजीववादो निरस्तः । य ईश्वरो नित्यश्चेतन एको नित्यानां चेतनानां बहूनां जीवानां कामान् वाञ्छितानि विदधाति सम्पादयतीति तदर्थः । एवं सतीति । तौ जीवेशौ । तर्कशास्त्रे खलु जीव ईशश्चाकाशवद्विभुर्जडो ज्ञानाधिकरणमिति स्वक्रियते । तदिदं श्रुतिविरुद्धं भगवन्मायामोहितैस्तार्किकैः कल्पितम् । अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । दन्द्रम्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धा इति श्रुतेः । श्रुतिसम्मतौ तौ दर्शयति तस्यामिति ॥ ३६ ॥

तथेति । असावरविन्दनेत्रो भगवान् । ईश्वरः स्वशक्त्या जगद्रचयतीति श्वेताश्वतराणां श्रुतिराह य इति । जगतो मिथ्यात्वे श्रुतिरेषा व्याहतार्था स्यात् । षड्विंशतीति । स्वयं भगवतै-

Digitization by Arya Samaj Charitable Foundation, Chennai

धाती'त्यादिश्रुतिव्याकोपात् षड्विंशतिपक्षस्य स्वयमेवा-ऽङ्गीकारात् । एतस्मादुपदेशात् प्रागूर्ध्वञ्च तस्य स्वात्मकत्वोपपादनाच्च । उपदेष्टृत्वासम्भवाच्च ॥ ३७ ॥

प्राग् यथा—'विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण चे'ति । ऊर्ध्वं यथा—'ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथाऽनुमानम् । आद्यन्तयोरस्य यदेव फलं का-

---

व । तत्पक्षे जीवेशभेदोऽस्तीति द्वैतं सत्यम् । एतस्मादिति । किं भद्रमित्यादिकात् । तस्येति द्वैतप्रपञ्चस्य । उपेति । तद्वादेऽभिमते भगवतो मिथ्यात्वेनोपदेष्टृत्वानुपपत्तेरिति मुख्यो दोषः ॥ ३७ ॥

प्राग्यथेति । प्रकृत्या पुरुषेण च सिद्धं विश्वमेकात्मकं शक्तिमदीश्वराभिमतं पश्यन् य एक इत्यादि श्रुतितो विजानन् परेषां स्वभावान् शान्तघोरमूढान् कर्माणि तादृशानि न प्रशंसेन्न गर्हयेदिति पूर्वेणाऽन्वयः । द्विमिश्रं जगदैश्वरं विज्ञाय तस्य स्तुतिनिन्दे त्यजेदित्यर्थः । ऊर्ध्वं यथेति । विवेको ज्ञानमित्यन्वयः । तस्य साधनान्याह—निगमो वेदः । तपो वेदोक्तकायक्लेशः । प्रत्यक्षं निजानुभवः । ऐतिह्यं पारम्परिक उपदेशः । अनुमानं तर्कः । फलमाह—अस्य जगत आद्यन्तयोर्यदस्ति तदेव मध्येपीति । किन्तत् ? कलयति प्रकाशयति इति कालः परेशः । हेतुः कारणम् । उपादानं प्रधानजीवलक्षणम् । परिणामनिमित्ते कालकर्मणी इति । इदं विश्वं शक्तिमदीश्वराभिन्नमिति यो विवेको निगमादिसाधनैरुत्पद्यते तज्ज्ञानं फलमित्यर्थः । अत्र दृष्टान्तमाह यथेति । सुष्ठु कङ्कणादिरूपेण

Digitization by Arya Samaj Charitable Foundation, Chennai

लश्च हेतुश्च तदेव मध्ये ॥ यथा हिरण्यां सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्व'दिति ॥३८॥

किञ्च भ्रान्तं ब्रह्मैव जगदिति तण्डुलपाकवत् संयुक्तमेव द्वैतमतो नित्यमबाधितमिति शुक्तिरजतवदारोपितत्वादसत्यं तदिति च वादस्तत्त्वोपदेशान्ते स्वयमेव निराकरिष्यते । 'एतावानात्मसंमोहो यद्विकल्पस्तु केवले।

कृतं रचितं हिरण्मयस्य कङ्कणादेरुत्पत्तेः पुरस्ताद्विनाशाच्च पश्चाद्यदस्ति तदेव मध्ये नानापदेशैः कङ्कणादिनामभिर्व्यवहार्यमाणं भवति । अस्य जगत आदावन्ते मध्ये चाऽहमेव शक्तिमान् तद्व्यपदेश्य इत्यर्थः । अत्रोभयत्रोपदेशे शक्तिमदीश्वराभिन्नं जगदित्युक्तम् ॥ ३८ ॥

अथ किं भद्रमित्यादौ यः केवलात्मैक्यवादस्त्वयाभिप्रेयते न स भगवदभिमतः, तद्वादस्य तेनान्ते निराकृतत्वादित्याह—किञ्चेत्यादिना । भ्रान्तमिति । यथा भ्रान्तो राजपुत्रः कैवर्तस्तथा भ्रान्तं ब्रह्मैव जीव इति । स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वमित्यादिश्रुत्यर्थाभासमाश्रित्य वर्णयन्ति, तदिदं दूषयत्येतावानित्यर्धकेन । केवले चिदेकरसे निर्गुणे ब्रह्मणि प्रपञ्चोऽहमस्मीति विकल्पो भ्रम एतावानुच्यते । अज्ञानमेतद् वक्तुरित्यर्थः । न हि तादृशे भ्रमः शक्यो वक्तुं यथा तण्डुलपाके तण्डुलाविविक्ता मिथः सम्पृक्तास्तथाऽनेके जीवाः प्रकृत्या

Digitization by Arya Samaj Charitable Foundation, Chennai

आत्मन्यृते स्वमात्मानमवलम्बो न यस्य हि ॥ यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम् । व्यर्थेनाऽप्यर्थवादोऽयं द्वयं पण्डितमानिना'मिति । विकल्पो भ्रमः ॥३९॥

तस्मादत्रायमर्थः । पूर्वत्र स्वप्राप्तिहेतुभूता स्वभक्तिरुपदिष्टा । तत्प्रतिकूलयोः परनिन्दाप्रशंसयोर्विहा-

---

संश्लिष्टाः सन्तः कर्तृत्वभोक्तृत्वे भजन्तीत्यजामेकामित्यादिश्रुत्यर्थाभासमाश्रित्य साङ्ख्या वर्णयन्ति, तदिदं दूषयति–आत्मनीत्यर्धकेन । स्वमसाधारणं सत्यसङ्कल्पादिशक्तिकं परेशं विनाऽऽत्मनि जीवे विषये यस्य प्रपञ्चात्मकस्य परिणामस्याऽवलम्बो न सम्भवति। जीवेच्छायाः सचेतनप्रकृतिकृतत्वात् तस्या जीवावलम्बनं, न हि जीवेच्छाया+ +रूप्यात् । न च शक्तिसार्वज्ञ्ये, अश्रुतत्वादिति तदसम्भवः । शुक्तिस्वरूपानभिज्ञैर्यथा शुक्तौ रजतमारोप्यते तथा ब्रह्मस्वरूपानभिज्ञैस्तत्र जगदारोप्यते ततो रजतवज्जगन्मिथ्यैवेति रज्ज्वामहेर्भोगभवाभवौ यथेत्यादिस्मृत्यर्थाभासमाश्रित्याऽद्वैत्येकदेशिनः कल्पयन्ति, तदिदं दूषयति धत्तामित्येकेन । नामभिराकृतिभिश्च रूपैर्ग्राह्यं पञ्चवर्णं भूम्यादिपञ्चकमयं द्वैतं सत्येश्वरशक्तिमयं तदिति प्रमाणप्रमितत्वादबाधितम् । तत्र जगन्मिथ्या शुक्तिरजतवदारोपितत्वादिति व्यर्थेन सत्प्रतिपक्षेनानुमानेनार्थवादो मिथ्येत्यर्थकथनं पण्डितमानिनामेव न तु पण्डितानामित्यर्थः ॥ ३९ ॥

एवं चोद्यं निरस्य वाक्यार्थं स्वमतेन योजयति तस्मादयमत्रेति । तत्प्रतिकूलयोर्भक्तिबाधकयोः । तस्येति प्रपञ्चस्य । अ-

Digitization by Arya Samaj Charitable Foundation, Chennai

नाय तस्य विकारित्वं पारतन्त्र्यं चोपदर्शयति किमिति । अवस्तुनः परिणामिनः । 'यत्तु कालान्तरेणाऽपि नान्यसंज्ञामुपैति वै । परिणामादिसम्भूता तद्वस्तु नृप तच्च किम् ॥ अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते । तत्तु नाशि न सन्देहो नाशि द्रव्योपपादित'मिति स्मृतेः । तच्च द्वैतमनृतं न ऋतं सत्यं प्रियं वाक्यं यस्मिंस्तत् । प्रत्यक्परताप्रतिकूलकर्कशकपटवाक्यवदित्यर्थः । तादृशं च वाचा मनसा च गोचरीकृतं सदवगम्यत इत्याह-वाचेति । स्फुटार्थस्तु न सम्भवेत् । 'यत् किञ्चिन्मनसा ग्राह्यं यद्बाह्यं चक्षुरादिभिः । बुद्ध्या च यत् परिच्छिन्नं तद्रूपमखिलं तवे'ति स्मृतेः । तस्मादलं तत्प्रशंसयेति । अस्वतन्त्रं च द्वैतम् । न तस्मात् किञ्चित् परमार्थरूपं फलं किन्त्वनुषङ्गादपुमर्थं जनयत्येवेत्याह—छाये-

---

वस्तुपदस्य परिणाम्यर्थकत्वं श्रीविष्णुपुराणवाक्येन व्याचष्टे—यत्त्विति । अनाशी परिणामरूपनाशशून्यः । तत्त्विति । कर्म तज्जन्यं जगच्च नाशि परिणामीत्यर्थः । तादृशमनृतं सत्यप्रियवाक्यरहितमित्यर्थः । स्फुटार्थस्त्विति । द्वैतं मिथ्येत्यर्थस्तु न सम्भवेदित्यर्थः । अत्र बाधिकां वैष्णवोक्तिमुदाहरति—यत्किञ्चिदिति । श्रीवराहदेवं प्रति पृथ्वीवाक्यम् । तस्मात् परिणामित्वात्तस्य प्रपञ्चस्य प्रशंसयाऽलं व्यर्थम् । एवं द्वैतस्य विकारि-

Digitization by Arya Samaj Charitable Foundation, Chennai

ति । असन्तोऽस्वतन्त्राः । 'सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णेन चापरैः । अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारते'ति स्मरणात् । तस्मादलं तन्निन्दयेति ॥ ४० ॥

अस्वातन्त्र्यञ्च तस्येश्वरशक्तिमयत्वादिति योजयत्यात्मेति सार्धेन । प्रभुस्तत्तच्छक्तियोगात् समर्थः, तर्हि विकारापत्तिः स्यान्नेत्याह—अन्यस्मादिति । स्रष्टृसृज्यादिभावमापन्नेऽपि तस्मिन्नविचिन्त्यस्वरूपमहिम्ना कथञ्चिदपि विकारो नेत्यन्यत्वं तस्येत्यर्थः । इदं खलु मदीयं मतम् । या त्वियं सात्त्विकादिरूपाऽध्यात्मादिरूपा वा त्रिविधा भातिरात्मनि जीवे स्वकर्ममात्रहेतुकैवाज्ञै-

---

त्वमापाद्य परतन्त्रत्वमाह—अस्वतन्त्रं चेति । छायेत्यादिवाक्ये छायाहीनामस्वातन्त्र्यं प्रत्यक्षसिद्धम् । तद्वाक्येऽसच्छब्दस्याऽस्वातन्त्र्यार्थकत्वं भारतवाक्येन व्याचष्टे सत्त्वमिति । तदन्येषां कृष्णभिन्नानां चिज्जडानां वस्तुमात्राणामित्यर्थः ॥ ४० ॥

अस्वातन्त्र्यञ्चेति । तस्य प्रपञ्चस्य । प्रभुरिति । तत्तच्छक्तियोगादित्यत्र य एको वर्णो बहुधा शक्तियोगादित्यादिश्रुतिरनुसन्धेया । अविचिन्त्येति । सार्वज्ञ्यसत्यसङ्कल्पशक्तिकस्य स्वरूपस्य प्रभावेणेत्यर्थः । सङ्कल्पमात्रेण सृष्टत्वादिति यावत् । या त्विति । अज्ञैः कर्मजडैर्निरीश्वरैः । ते हि स्वकर्मद्वारा जीवः स्वभोगायतनं चतुर्दशभुवनात्मकं जगद्रचयतीति मन्यन्ते । नात्रेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

निरूपिता सा तु निर्मूलैव, नाऽत्र किञ्चित् प्रमाणमस्तीत्यर्थः । ईश्वरशक्तिमयत्वं तस्य स्फुटयति—इदं गुणमयमिति । एतद्विद्वानिति । परस्तुतिनिन्दाभ्यां भक्तिप्रावण्यविक्षतिर्विस्फुटैव । तदभावाद्भक्तितेजःपरिवृद्धेश्च सूर्यवदिति । प्रत्यक्षेणेति । मदधीनोत्पत्तिभङ्गमिदं जगदसदस्वतन्त्रमिति प्रत्यक्षादिभिरवगत्य तत्रासक्तश्चरेदिति नैतादृशस्य क्वचिदपि तद्विक्षतिरित्यर्थः । एवञ्चाऽमूलमेतदित्यत्राऽप्राशस्त्ये नञ् । अकेशा वनितेतिवत् । ईशवैमुख्यं खलु मनःप्रभृतेर्मूलं तच्चाऽप्रशस्तमेव । इत्थमेव परोऽपि सन्दर्भो जीवेश्वरस्वरूपनिरूपणपरतया परेशप्रपत्तिहेतुकमोक्षपरतया च व्याख्येयः ॥ ४१ ॥

ननु मायामयमायाकृतासच्छब्दप्रयोगात् कुहकराचि-

प्रपञ्चस्य जीवकर्ममात्रहेतुकत्वे प्रमाणं नास्तीत्यर्थः । शक्तिमदीश्वरहेतुकं जगदिति श्रुत्यादीन्याहुः । एतदेवाहेदमिति । एवञ्चाऽमूलमित्यत्र अशब्दवाच्यो विष्णुस्तन्मूलमस्येति वनमालिवर्णिनः । इत्थमिति । एतद्व्याख्यानं तु मनोरमायां द्रष्टव्यं ग्रन्थविस्तरभयान्नाऽत्र लिखितम् ॥ ४१ ॥

अत्राशङ्कते नन्विति । कुहकमिन्द्रजालम् । कविरितीशावास्योपनिषदि । याथातथ्यतः सत्यतया । ऋतं सत्यं समीचीनं सम्यक् तथ्यं यथातथमिति हलायुधः । ब्रह्म सत्यमिति भारते । ब्रह्म

Digitization by Arya Samaj Charitable Foundation, Chennai

तवदवस्त्वेतज्जगदिति चेद् भ्रान्तमिदम्, तथात्वे—'कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः' इत्यादिश्रुतेः।'ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः। सत्याद् भूतानि जातानि सत्यं व्रतमयं जगत्॥ तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पव'दिति स्मृतेश्च व्याकोपापत्तेः। कुहकरचितमपि न मृषा कुहकेन देशान्तरादानीय सत्यस्यैव दर्शितत्वात्। क्वचित्तदानीं तस्याद्यापि स्थितेश्च ४२॥

परेशः। तपस्तस्यालोचनम्। सोऽकामयत बहु स्यां प्रजायेय स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजदिति श्रुतेः। तदेतदिति श्रीवैष्णवे। पूर्वत्र—द्वे रूपे ब्रह्मणस्तस्य क्षरं चाऽक्षरमेव च। क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते॥ अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत्। एकदेशस्थितस्याग्नेरित्यादिना ब्रह्मशक्तिरूपे जगति ब्रह्मविष्ण्वीशरूपाणि पठित्वाह तदेतदिति। ईश्वरजीवप्रकृत्यात्मकं जगन्नित्यमक्षयञ्च। तत्रेश्वराभागरूपं नित्यमेकरसम्। जीवप्रकृतिभागरूपं त्वक्षयं निरन्वयविनाशशून्यम्। एतदेवाहाऽऽविर्भावेति। ईश्वरभाग आविर्भावतिरोभाववान्। जीवादिभागस्तु जन्मनाशविकल्पवानित्यर्थः। अवस्थोदयभङ्गावत्र जन्मनाशौ भवतः। कुहकेनेति। सत्यस्यैव फलादेर्वस्तुनः। ननु मौहूर्तिकत्वात्तस्यासत्यत्वं मन्तव्यमिति चेत्तत्राह क्वचिदिति। मरुदेशे दाडिमवाटिकायास्तेन दर्शिताया इदानीमपि विद्यमानत्वादित्यर्थः॥४२॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सत्येश्वरशक्तिमयत्वाज्जगत् सत्यम् । ईश्वरस्य जीवप्रकृत्योश्च सत्यत्वमजामन्त्रात् परस्माद्वैष्णवत्रवाक्योच्चयाच्च व्यक्तम् । जीवप्रकृत्योरीश्वरशक्तित्वन्तु—'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जग'दिति स्मृतेः । जगतस्तत्कार्यत्वे तु—'य एको वर्णो बहुधा शक्तियोगा'दित्यादिश्रुतेः । 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ॥' 'एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जग'दिति

जगतः सत्यत्वमक्षयत्वमुक्तं, तत्तच्च सत्यपरेशशक्तिमयत्वादिति प्रतिपादयति सत्येति । अजामन्त्रादजामेकां लोहितशुक्लकृष्णामित्यादिकात् । अजत्वादत्र सत्यत्वं तस्य तन्मयत्वे प्रमाणान्युदाहरति भूमिरिति । द्वयं श्रीगीतासु । चतुर्विंशतिधा प्रकृतिर्भूम्याद्यात्मनाऽष्टधा मे मदीया ज्ञेया । भूम्यादिषु पञ्चसु तद्धेतूनां गन्धादीनां पञ्चानां तन्मात्राणामन्तर्भावः । अहङ्कारे तत्कार्याणामिन्द्रियाणामेकादशानाम् । बुद्धिशब्देन महत्तत्त्वं मनःशब्देन मनोगम्यं प्रधानमिति चतुर्विंशतिधा सिद्ध्यति । इयं प्रकृतिरपरा जडत्वाद् भोग्यत्वाच्च निकृष्टेत्यर्थः । इतोऽन्यां जीवभूतां प्रकृ-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्मृतेश्च ॥ एतेन जन्मभङ्गान्यथानुपपत्त्या जगन्मिथ्या ब्रह्मवत्सत्यत्वे तदनुपपत्तेरिति प्रत्युक्तम् । जन्मादिकं ह्यनित्यत्वव्याप्यम् । सत्यत्वं नित्यानित्यसाधारणम् । अतः सत्यमनित्यं जगत् । 'अनित्यमसुखं लोक'मिति

तिं परां चेतनत्वाद् भोक्तृत्वाच्चोत्कृष्टां विद्धि । मे मदीयाम् । यया प्रकृत्या स्वकर्मद्वारेदं जगत् सर्पादिवद् धार्यते भोगाय गृह्यते । ममेति च तास्वेव । ममाण्डकोटिस्रष्टुरीश्वरस्य महद् ब्रह्मयोनिर्गर्भधारणस्थानं तस्मिन् महति ब्रह्मणि योनिभूते प्रधाने गर्भं चित्परमाणुगणमहं दधाम्यर्पयामि । स्फुटमन्यत् । क्षरमक्षरञ्चेति । द्विरूपं ब्रह्म प्रतिज्ञाय अक्षरं परं ब्रह्म, क्षरन्तु ब्रह्मादिस्थावरान्तं जगदित्युक्त्वा तच्च ब्रह्मशक्तिमयमित्याहैकदेशेति श्रीवैष्णवे । प्रादेशिकस्याग्नेर्दीपादेर्दाहकस्यापि यथा तद्विलक्षणा ज्योत्स्ना प्रभा तत्प्रकाशशक्तिविस्तारस्तथा ब्रह्मणो वैकुण्ठनिलयस्य शक्तिविस्तार इदमखिलं जगत् । यत्तेनाक्षरस्य विलक्षणं क्षरं कथं रूपं स्यादिति शङ्का निरस्ता । ज्योत्स्नादृष्टान्तेन ब्रह्मादिजीवानां तारतम्यमभिमतं स्फुटयति । तत्राप्यासन्नदूरत्वाद् बहुत्वस्वल्पता यथा । ज्योत्स्नाभेदोऽस्ति तच्छक्तेस्तद्वत् मैत्रेय ? विद्यते ॥इत्यादिभिः। यथाऽग्न्यासन्नायाः प्रभाया बहुत्वं ततोऽतिदूराया स्वल्पत्वमेवं स्थावरान्ताया ब्रह्मशक्तेरविद्यावृत्तितारतम्याद् बाहुल्याल्पत्वमित्यर्थः । वक्ष्यति चैवम् -तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तत इति । तच्छक्तिकार्येषु ब्रह्मादिषु विष्णुः पठितः, स तु चौरेषु मिलितो राजेव विशिष्टो बो-

Digitization by Arya Samaj Charitable Foundation, Chennai

भगवत्कण्ठोक्तेश्च । त्रिकालबाध्यन्तु मिथ्या, यथा खपुष्पादि ॥ ४३ ॥

परमार्थस्त्वमेवैको नान्योऽस्तीत्यत्र न कदाचिदनीदृशं जगदित्येवमभिधायिभिर्नित्यस्वतन्त्रतया निश्चितस्य प्रपञ्चस्य निषेधः, न तु ब्रह्मात्मकस्यापि तस्य तद्ग्रहणेनैव गृहीतत्वात् । इतरथा जगत्पतित्वोक्तिव्याकोपः । ब्रह्माधीनस्तु सत्य इति दर्शयन्ति तवेति । इतरथा महिम्नो बाधितत्वात्स्तवनविरोधापत्तिः । यदेतदिति । ज्ञानात्मकस्य तवैतज्जगत् त्वत्सम्बन्धि त्वच्छक्तिमयत्वादित्यर्थः । ये त्वयोगिन एवं ज्ञानयोगशून्याः । ते देवमनुष्यादिरूपं नित्यं स्वत-

---

ध्यः । एतेनेत्यादिकमगूढार्थम् ॥ ४३ ॥

अथ वैष्णववाक्यानि सङ्गमयति परमार्थ इत्यादिना । न कदाचिदिति । जगत् कदाचिदनीदृशमस्वतन्त्रमनित्यञ्च किन्त्वीदृशं दृष्टरूपं स्वतन्त्रं नित्यमभिधायिभिः कर्मजडैरित्यर्थः । तस्येति । ब्रह्मात्मकस्य प्रपञ्चस्य ब्रह्मग्रहणेनैवागतत्वादित्यर्थः । इतरथेति । दृष्टस्य प्रपञ्चस्य ब्रह्माधीनत्वे सति । ब्रह्मेति । ब्रह्माधीनो ब्रह्मशक्तिरचितः प्रपञ्चः सत्यस्तथैव श्रवणात् । इतरथा चराचरस्य जगतोऽनीश्वरत्वेन तद्व्याप्तेरभावे सतीत्यर्थः । यदेतदित्यत्र जगद्रूपं दृष्टाकारं स्वतन्त्रं नित्यमित्यर्थः । ज्ञानेत्यादौ

Digitization by Arya Samaj Charitable Foundation, Chennai

न्त्रमिदं तत्त्वत्सम्बन्धीति भ्रान्त्येव पश्यन्ति । न च तेषां संसारनिवृत्तिरित्याहुर्ज्ञानस्वरूपमिति । ज्ञानं ब्रह्मैव स्वरूपं वृत्तिप्रदं यस्य तथाभूतमिदं जगत् परतन्त्रमित्यर्थः । तत्त्वार्थस्वरूपं फलरूपं स्वतन्त्रं नित्यमिति यावत् । अबुद्धयः केचित् कर्मजडा वेदवादरता इत्यर्थः । येस्त्विति । ज्ञानं शास्त्रं तद्विदः । ज्ञानं ब्रह्मैवात्मा प्रकृतिकृद्यस्य तत् । एतदेवाह त्वद्रूपमिति । वृत्तिपदं खलु स्वरूपं व्यपदिष्टं प्राणसंवादादिषु ॥ ४४ ॥

ये त्वन्यथा व्याचक्षते तेषां पूर्वापरग्रन्थविरोधश्च ।

स्वरूपमिति । स्वस्मिन् सृष्टिपालनाभ्यां रूपापत्ति(?)र्दर्शयतीति निरुक्तेर्वृत्तिप्रदमित्येवार्थः । अतस्त्वद्रूपमित्यग्रे । त्वत्तो रूपं यस्य तत् । अर्थस्वरूपमिति । स्त्रीपुत्रादेरन्नरसादेर्हस्त्यश्वादेश्चाऽनुभवादिह सुखानि सन्ति । उपरि सुराङ्गनासुधापानाद्यनुभवात्तानि महान्तीति फलरूपत्वं तत्तत्कारणत्वात् स्वयमकारणत्वाच्च स्वतन्त्रं नित्यं जगत् । अर्थः प्रकारे वित्तकारणवस्तुषु । अभिधेयेऽपि शब्दानां निवृत्तौ च प्रयोजने ॥ इति विश्वः । न हीदृशस्य जगतः कोऽपि कर्ता सम्भावयितुं शक्यते इति नित्यं तत् । ये त्विति । ज्ञानविदः शास्त्रज्ञाः । ज्ञानात्मकं ब्रह्महेतुकमवृत्तिकं प्रपश्यन्ति । एतदेव स्फुटयति त्वद्रूपमिति । अन्यथा त्वामिव नित्यं स्वतन्त्रं प्रपश्यन्तीति ब्रूयुः ॥ ४४ ॥

ये त्विति । केवलाद्वैतिनः । अन्यथा प्रतीतार्थपरतया ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा हि—पूर्वत्र हि मैत्रेयपराशरयोरेवं प्रश्नोत्तरे दृष्टे। 'निर्गुणस्याऽप्रमेयस्य शुद्धस्याप्यमलात्मनः। कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यत' इति प्रश्नः। सत्त्वादिगुणयोगिषु कर्माधीनेष्वपूर्णेषूत्पादनादिकार्यं दृष्टम्। ब्रह्मणि तु तद्विलक्षणे कथं तदङ्गीकार्यमिति तस्यार्थः। तत्रोत्तरञ्च—'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः। यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥ भवन्ति तपता श्रेष्ठ पावकस्य यथोष्णते'ति॥ अत्रायमर्थः—सर्वेषां भावानामेवाऽचिन्त्यबुद्धिबोध्या मिथोविलक्षणाः कार्यकल्प्याः शक्तयो यस्मात् प्रतीयन्ते, अतः सर्वबृहत्तमस्य सर्वानुग्राहकस्य ब्रह्मणस्तु तास्तथाभूताः सर्गाद्या भावशक्तयो भवन्तीति न तस्य तत्कर्तृत्वविरोधः। ताश्च स्वाभाविक्य एवेत्याह-पावकस्य यथेति। 'परा शक्ति'-

---

निर्गुणस्येति। सत्त्वादिगुणशून्यस्य। अप्रमेयस्याऽपरिच्छेद्यस्वरूपगुणविभूतिकस्य। शुद्धस्य कर्मवश्यतागन्धरहितस्य। तद्विलक्षणे सत्त्वादिगुणयोगेन कर्मवश्यतयाऽपूर्त्या च रहिते। सर्वेषामिति। तास्तथाभूता अचिन्त्यबुद्धिबोध्या इत्यर्थः। भावशक्तय इति। स्वभावभूताः शक्तय इत्यर्थः। भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मस्वित्यादिमेदिनीकारकोशात्। तासां स्वाभाविकत्वं दृष्टान्तेन ग्राहयति पावकस्य यथेति। कैमुत्यमिति। मण्यौषधादीनां

Digitization by Arya Samaj Charitable Foundation, Chennai

रित्याद्या श्रुतिश्च । तुशब्दः कैमुत्यं द्योतयति । इह विचित्रशक्तिमद् ब्रह्मेति सुव्यक्तम् ॥४५॥

एवमेव परत्रापि दृश्यते यथा—'शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते । मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥ सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः । नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना ॥ वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि । स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशे-

---

चेदचिन्त्याः शक्तयः स्वाभाविक्यश्च भवन्ति, तर्हि किमुत ब्रह्मण इति ॥ ४५ ॥

परमात्मनो भगवच्छब्देन वाच्यत्वं प्रतिजानीते शुद्धे इति । षष्ठांशस्य पञ्चमेऽध्याये, तेन लक्ष्यत्वं निरस्तम् । विभूत्या विशिष्टस्य शुद्धत्वोक्तेस्तस्याश्च स्वरूपवद्विचिन्त्यत्वं तस्य च व्यस्तसमस्तभूतस्य स वाच्य इति वर्णयति सम्भर्तेति । सर्वधारणं सर्वपालनं च भकारस्यार्थः । नेता स्वध्यातॄणां स्वरूपशुद्धिप्रापकः । गमयिता विशुद्धानां तेषां स्वधामप्रापकः । स्रष्टा स्वधाम्नि तेषां विचित्रानन्दप्रकाशक इति गकारस्यार्थः । अथ समस्तयोर्भकारगकारयोरर्थमाह—ऐश्वर्यस्येति । समग्रस्येति षण्णां विशेषणम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

षतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥ एवमेष महाशब्दो भगवानिति सत्तम। ब्रह्मभूतस्य ···· वासुदेवस्य नान्यगः॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारत' इति॥ ४६॥

'स सर्वभूतप्रकृतिर्विकारगुणांश्च दोषांश्च मुनेव्य-

इङ्गना संज्ञा। अथ वकारस्याह वसन्तीति। भूतात्मनि पूर्वसिद्धस्वरूपे। निखिलात्मनि शक्तिमद्रूपेण सर्वोपादाने। तथा च सर्वहेतुः सर्वान्तर्यामी सर्वेभ्यः पूर्वो हरिरिति वकारस्यार्थः। अथ वर्णत्रयस्य समस्तस्याह—ज्ञानेति। ज्ञानं सार्वज्ञयम्। शक्तिः सत्यसङ्कल्पेनैव विचित्रजगत्कर्तृतावलं तादृग्जगद्विधारणसामर्थ्यम्। ऐश्वर्य्यमखिलतन्नियामकत्वम्। वीर्यमविकारित्वं भजज्जनोद्धारसामर्थ्यं वा। तेजो मायातिरस्कारी प्रभावः। अशेषतः पूर्णानीत्यर्थः। एतानि षट् भगवच्छब्दवाच्यानि। स्वरूपाभिन्नधर्मत्वादिति भावः। विनेति। हेयैः प्रकृतिगुणैस्तत्कार्यैः कर्मभिः फलैश्च विना। एवमिति प्रकटार्थम्। तत्रेति। पूज्यस्य पदार्थस्य विष्णोर्वाच्यतारूपा योक्तिस्तद्रूपया परिभाषया समन्वितोऽयं भगवच्छब्दस्तत्र सम्भर्तेत्याद्युक्तलक्षणे परमात्मन्युपचारेण न वर्तते। अन्यत्र महर्षिषु नृपेषु चोपचारेण प्रयुज्यते, तेषु तद्गुणलेशानां सत्त्वात्। अनियमेति। यमकारिणी हि परिभाषा॥ ४६॥

स वासुदेवः सर्वेषां भूतानां प्रकृतिश्चिदचिच्छक्तिद्वारोपा-

Digitization by Arya Samaj Charitable Foundation, Chennai

तीतः । अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद् भुवनान्तराले ॥ समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद् भृतभूतसर्गः । इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥ तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥ स ईश्वरो व्यष्टि-

---

दानम् । विकारगुणान् सत्त्वादीन् दोषांश्च ख्यातान् क्रौर्यादीन् व्यतीतोऽतिक्रान्तस्तैः शून्य इत्यर्थः । अतीतसर्वावरणो मायावरणरहितः । अखिलात्मा सर्वप्रवर्तकः । भुवनान्तराले यत्किञ्चिदस्ति तत्सर्वं तेनास्तृतं व्याप्तम् । तस्य विकारातिक्रमित्वादयो गुणास्तु तदभिन्ना इत्याह समस्तेति। स्वरूपानुबन्धिगुणगुण इत्यर्थः । भृतो धृतः । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति तद्वाक्यात् । निष्कामानां भक्तानां तन्मात्रविषयेच्छया गृहीतो वशीकृतस्तैः स्वरूपाभेदेनाभिमत ऊरुरुत्कृष्टो देहो विग्रहो यस्य सः । अहं भक्तपराधीनो, वशे कुर्वन्ति मां भक्त्येत्यादितद्वाक्यात् । समस्तेत्युक्तं स्फुटयति तेजोबलेति । पराणां नित्यमुक्तानामपि परः यत्र क्लेशादयः समस्ता अंशतोऽपि न सन्ति । पतञ्जलिनाप्येवमुक्तम्-'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति। शक्तिद्वारा व्यष्ट्यादिरूपस्तद्वृत्तिप्रदत्वादिना वा तद्रूपः। स्वविमुखानामव्यक्तरूपः, स्वसंमुखानां प्रकटस्वरूपः। सर्वेश्वर इत्यर्थकं स्फुटार्थम् । येनोक्तलक्षणं भगवत्स्वरूपं संज्ञायते मनसाऽनुभूयते । सन्दृश्यते भक्तिभावितेन चक्षु-

Digitization by Arya Samaj Charitable Foundation, Chennai

समष्टिरूपो व्यक्तस्वरूपः प्रकटस्वरूपः । सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥ संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् । सन्दृश्यते वाप्यथ गम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्त'मिति च ॥ ४७ ॥

अत्र हि प्राणिनामभ्युदयनिःश्रेयसप्रदो निरस्तसमस्तदोष ऐश्वर्यवीर्यादिविशुद्धगुणराशिश्चिदचित्पदार्थानां स्वेतरेषां वृत्तिहेतुत्वादिना तद्रूपस्तेषामुत्पत्त्यादिकारी शास्त्रीयज्ञानगोचरो भगवानिति निरूपणान्निर्विशेषचिन्मात्रं ब्रह्मेति विबुध्यते । एवमन्यच्च द्रष्टव्यम् ॥४८॥

क्षेत्रज्ञं चापि मां विद्धीति चकारः क्षेत्रं समुच्चिनोति । अपिरवधारणे । क्षेत्रं क्षेत्रज्ञं च मामेव विद्धि मद-

---

षाऽनुभूयते । अथ गम्यते निजस्वामित्वेन प्राप्यते । तच्छास्त्रेण निरूप्यमाणं ज्ञानं ततोऽन्यत्तद्विपरीततदैक्यानुसन्धिकरमज्ञानमित्यर्थः ॥ ४७ ॥

स सर्वभूतेत्यादिवाक्यानां वर्तुलितार्थमाह—अत्र हीत्यादिना । अभ्युदयेति । स्वर्गादिभोगमोक्षदातेत्यर्थः । एवमिति । अन्यच्च विष्णुपुराणदृष्टमद्वैतप्रत्यायकं वाक्यजातमनेन प्रकारेण व्याख्यातव्यम् । ग्रन्थगौरवभयान्नात्र लिखितमित्यर्थः ॥ ४८ ॥

अथ श्रीगीतावाक्यं स्वमतेन व्याख्याति क्षेत्रज्ञमित्यादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

धीनवृत्तिकत्वादिना मदात्मकं जानीहीत्यर्थः । एवमेवानूक्तं 'क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम' ति। तयोर्मदधीनवृत्तित्वादिविषयतया यज्ज्ञानं मम मतमित्यर्थः । एतेनैव न तदस्ति विना यत् स्यादित्यपि व्याख्यातम् ॥४९॥

ननु कैवल्योपनिषदि श्रूयते—'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्त्रियन्नपानादिविचित्रभोगैः स एव जाग्रत्परितुष्टिमेति ॥ स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके । सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्धः । पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सक-

---

ना । एवमिति । अनूक्तमनूदितम् । एतेनेति । मायाविनाभूत यच्चराचरं तन्नास्तीति रज्जुशक्त्या सर्वादीवमभूसत्तया चराचरमिति नार्थः । मदधीनवृत्तिकतया मद्व्याप्यतया च मदात्मकं तदित्येवार्थः । क्षेत्रज्ञं चापीत्यादिवाक्यानां व्याख्यान्तरं श्रीगीताभूषणे द्रष्टव्यम् ॥ ४९ ॥

अत्र निर्विशेषचिदद्वैती विप्रतिपद्यते नन्वित्यादिना । स परमात्मैव राजपुत्रकैवर्तन्यायेन मायया स्वाविद्यया परिमोहितात्मा सन् सत्त्वप्रधानं शरीरमास्थायेश्वरो हिरण्यगर्भो भूत्वा सर्वं जगत् करोति । स्त्रियन्नेति । स परमात्मैव स्वाविद्यया व्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

लं विचित्रम् ॥ आधारमानन्दमखण्डबोधं यस्मिल्लयं याति पुरत्रयं च । एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् । सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते । तद् ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते' इति ॥ ५० ॥

ष्टिजीवः सन् जाग्रदवस्थः स्त्र्यादिभोगैः तुष्टिः जीवमेति । स एव स्वप्ने सुखादिभोक्ता भवति । सुषुप्तौ तु सकले इन्द्रियेऽहङ्कारे च विलीने स एव तमसाभिभूतः सन् सुखीभवति । सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति श्रुतेः । स एव जीवः प्रबुद्धः सन् जन्मान्तरकर्मयोगात् पुनः स्वपिति तत्कर्मफलानि शिबिकारोहणादीनि पुनर्लभते इत्यर्थः । यः परमात्मा एवं जीवः सन् पुरत्रये लोकत्रयेऽवस्थात्रये च क्रीडति । ततो हिरण्यगर्भादीश्वरात् सकलं चराचरलक्षणं विचित्रमिदं जातम् । यदा स्वाविद्ययायमीश्वरजीवभावमापन्नस्तदाप्यानन्दादिरूपं ब्रह्मैव सः । यस्मिन्नेव पुरत्रयं प्रलये स्वसाक्षात्कारे च लयं याति । एतस्मादिति । हिरण्यगर्भादीश्वरात्परमात्मनः । श्रुतिर्जिज्ञासुमुपदिशति यदिति । सर्वात्माऽऽत्मा सर्वेषां क्षेत्रज्ञानां स्वरूपं विश्वस्यायतनमिति । रज्जुसत्तया सर्पादिवद्यत्सत्तया सर्वं भासत इत्यर्थः । जाग्रदिति । यद्यतः प्रकाशते यत्सत्तया भासत इत्यर्थः ॥ ५० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मादित्थमत्र व्याख्येयम्—परेशस्यैव सतोऽविद्ययैव क्षेत्रज्ञभावः, रज्जोरिव भुजङ्गत्वं तन्निवृत्त्यर्थमाप्ततमस्य भगवतोऽयमुपदेशः—क्षेत्रज्ञं चापि मां विद्धीति। रज्जुरियं न भुजङ्ग इत्याप्तोपदेशाद् भुजङ्गभ्रान्तिरस्माद् वाक्यान्निवर्तते इति चेन्मन्दमेतत्। उपदेशासम्भवात्। तथा हि-अयमुपदेष्टा भगवांस्तत्त्वज्ञो न वा। आद्ये द्वितीयमात्मानमिजानतस्तस्य नार्जुनादिभेददृष्टिरिति न तान् प्रत्युपदेशः सम्भवेत्। अन्त्येऽप्यज्ञत्वादेव नात्मज्ञानोपदेशित्वम्। नापि सर्वेश्वरस्याऽविद्यास्तीति य एव मायेति श्रुतिमाश्रित्य शक्यं गदितुं—'य सर्वज्ञः सर्ववित्परास्य शक्ति'रित्यादिश्रुतेः, 'वेदाहं समतीतानी'त्यादिस्मृतेश्च ॥ ५१ ॥

तस्मादिति। अत्र क्षेत्रज्ञवाक्ये। अविद्याभ्रमात्मकेनाज्ञानेन क्षेत्रज्ञभावो जीवत्वम्। स्फुटार्थमन्यत्। तथा हीति। आद्ये तत्त्वज्ञ इति पक्षे। अन्त्ये तत्त्वज्ञो नेति पक्षे। नापीति। अविद्या विमोहिका माया, वेदाहमित्यादावादिशब्दात्। 'विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया। विमोहिता विकत्थन्ते ममाहमिति दुर्धिय' इति ब्रह्मवाक्यं ग्राह्यम्। एवञ्च बहुशास्त्रविरोधात् म एव मायापरिमोहितात्मेत्यादि चोद्यं दूरोत्सारितम्। माया खलु स्वाश्रयं न विमोहयति ॥५१॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथाधिगताद्वैतस्यापि भगवतो बाधितानुवृत्तिरूपेयं भेददृष्टिरतो नोपदेशानुपपत्तिरिति चेन्न, दृष्टान्तविरोधात् । मरीचिकावारिबुद्धिबाधितानुवृत्तापि न वार्य्याहरणादौ प्रवर्तयत्येवमद्वैतज्ञानबाधिता भेददृष्टिरनुवृत्तापि मिथ्यार्थविषयत्वावधारणान्नोपदेशादौ प्रवर्तयिष्यतीति ॥ ५२ ॥

किञ्च बाधितानुवृत्तिरपि न शक्या वक्तुं बाधकेन तादृशात्मज्ञानेनात्मेतरद्वैतज्ञानहेतोरज्ञानादेर्विनष्टत्वात् । द्विचन्द्रज्ञानादौ तु चन्द्रैकत्वज्ञानेन सत्यतिमिरादिदोषस्य द्विचन्द्रज्ञानहेतोराविनाशात् सा युक्ता । इह त्वद्वितीयात्मज्ञानेन द्वैतस्य तज्ज्ञानस्य च विनाशात् । कथञ्चिदपि सा न सम्भवेदिति तुच्छमेतत् । तस्मात्तदायत्तवृत्तिकत्वादिभिरीश्वराभेदो जीवस्येहोपचर्यते । अ-

---

मरुमरीचिकादृष्टान्तेन साधितामुपदेशोपपत्तिं दूषयत्यथाधीति । दृष्टान्तेति । विषमदृष्टान्तत्वादित्यर्थः । मृगतृष्णा मरीचिकेत्यमरः ॥ ५२ ॥

हेत्वभावाद् बाधितानुवृत्तिस्त्वन्मते न सम्भवतीत्याह—किञ्चेत्यादिना । तादृशेति । केवलाद्वैतविषयकेणेत्यर्थः । एवं चेत्तर्हि स एव मायेत्यादिवाक्यार्थः कथम् ? तत्राह—तस्मादिति । जीवस्येश्वरायत्तवृत्तिकत्वादिस्तदभेद इह गीतावाक्ये कैवल्योपनिषद्वाक्ये चोपचर्यत इत्येवार्थः । अत एवेति । औपचारिकाद्

Digitization by Arya Samaj Charitable Foundation, Chennai

त एव जगज्जन्मादिकर्तृपरेशगाढसख्यावेशादस्य जीवस्य विमुक्तिरिति तत्रैवोच्यते 'यत् परं ब्रह्मे'त्यादिना ॥५३॥

यत्तु शुद्धे चैतन्येऽविद्यया कल्पितं विश्वं विद्यया बाध्यमिति तच्चैतेन निरस्तं कल्पकानिरूपणाच्च। न चास्य ब्रह्म कल्पकं, वैशिष्ट्यापत्तेः, । नापि जीवः, प्राक् तस्यैवाऽसिद्धेः। न चाविद्या, जाड्यात् ॥ ५४ ॥

किञ्च नेयं सत्या वक्तुं शक्या, अनिवृत्तिप्रसङ्गात् भेदापत्तेश्च। नाप्यसत्या, प्रतीतिविरोधात्। न च

भेदात् मुख्याभेदाभावादित्यर्थः। अस्य जीवस्येश्वरमायाविमोहितस्य सख्यलक्षणात्तद्भजनाद्विमुक्तिस्तत्रैवोच्यते यदित्यादिना। गाढसख्ये सति त्वमहं त्वमिति भावः स्पष्टः ॥ ५३ ॥

केवलाद्वैतिनोभिमतं स एवेत्यादिवाक्यस्यार्थं निराकर्तुमाह-यच्चेति। आद्वतीये चैतन्ये तत्त्वाज्ञानाद्राजपुत्रधीवरन्यायेन तत्र जीवत्वादि कल्प्यते। ज्ञाते तु तत्त्वे तद् बाध्यते इत्येतच्चैतेन परमात्मनो मायामोहकृतजीवत्वनिराकरणेन निरस्तम्। न चास्येति। वैशिष्ट्यापत्तेः सधर्मकत्वप्रसङ्गात्। कल्पनात् प्रागिति। विश्वकल्पने सति खलु विश्वावयवो जीवो वाच्यः। न च तत्कल्पनात् पूर्वं सोऽस्तीत्यात्माश्रयतापत्तिः। न चाविद्येति। समनाश्चेतनः कल्पको दृष्टः शुक्तिरजतादौ। न चाऽविद्याऽचेतना ॥ ५४ ॥

अथ पराभिमताविद्यां निराकर्तुमाह-किञ्चेत्यादि। क-

Digitization by Arya Samaj Charitable Foundation, Chennai

सदसद्विलक्षणत्वादिष्टासिद्धिः, तादृशि प्रमाणाभावात् । न च 'न सदासी'दित्यादिश्रुतिरत्र प्रमाणं सदसच्छब्दवाच्ये चिदचिद्व्यष्टी तयोः प्रलये पृथगवस्थितिर्न स्यादचित्समष्टौ तमःशब्दवाच्यायां तदानीं विलीनत्वादित्यर्थाभिधानात् । तमःशब्दिता त्वचित्समष्टिरिति सुबालोपनिषदि दृष्टम् । 'भूतादिर्महति विलीयते महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयतेऽक्षरं तमसि विलीयते तम एकाकी भवति परस्मिन् परस्मान्न सन्नासन्न सदस'दिति स्मृतिश्च । 'नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभूच्च नान्यत् । श्रोत्रादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासी'दिति ।

लिपकाऽविद्या चेत् सत्या तर्हि तस्यानिवृत्तिर्न स्याद् भेदागमश्च । असत्या चेदज्ञोऽहमिति प्रतीतिर्न स्यात् । नन्वस्याः सत्यत्वासत्यत्वे विचार्ये न किन्तु कल्पकत्वमुच्यते । तत्त्वं चाऽनिर्वाच्यत्वात् सेत्स्यतीति चेत्तत्राह—न च सदसदिति । तादृशीति । सदसद्विलक्षणायामविद्यायामित्यर्थः । न च न सदिति । घटादिः सन् खकुसुमादिरसन् घटादिरेव देशकालव्यवस्थया । सदसच्चेति । त्रिविधा बुद्धिर्विदुषामभ्युदेति । नाऽतोऽन्या विधाऽस्ति यत्रैषा श्रुतिः प्रामाण्यमास्वीदेदिति पुराप्येतद्दर्शितं न विस्मर्तव्यम् । स्वमते श्रुतेरर्थमाह सदसदिति । उक्तेऽर्थे हेतुत्वेन श्रुत्यादिवाक्यमाह—भूतादिरिति । भूतादिस्तामसाहङ्कारः । ना-

Digitization by Arya Samaj Charitable Foundation, Chennai

अत्र प्रकृतिब्रह्मजीवाः प्रलये तिष्ठन्ति विस्फुटम् ॥५५॥

नन्वेतस्यास्तमःशब्दिताचित्समष्टेः सूक्ष्माया 'मायां तु प्रकृतिं विद्या'दिति मायाशब्देनोक्तेरनिर्वाच्यत्वम्। मैवम्, तस्य सदसद्विलक्षणार्थकत्वादर्शनात्। न च तादृशः काप्यर्थोऽस्ति यद्वाचिना तेन भाव्यम्। नापि सर्वत्र तस्य दम्भवाचकता नानार्थत्वात्। तथा हि पठन्ति 'माया दम्भे कृपायां चे'ति। 'माया स्याच्छाम्बराबुद्धो'रिति। 'मायावयुनं ज्ञान'मिति च। तद्वाच्यस्य मिथ्यात्वे वेदाप्रमाण्यान्नास्तिकतापत्तिरिति वक्ष्यामः। तस्मा-

---

ऽह इति श्रीवैष्णवे। तदा प्रलयेऽहोरात्रिश्च नासीत् सूर्यादेरभावात्। तमश्च नासीद्रात्रेरभावात्। ज्योतिश्च नासीदह्नोऽभावात्। अन्यच्च नभोभूम्यादिकं नासीत्। तर्हि किमासीत्तत्राह—श्रोत्रादिबुद्ध्या शब्दादिजन्यज्ञानेनाऽनुपलभ्यं प्राधानिकं प्रधानम्। स्वार्थे ठक्। ब्रह्म परेशः पुमान् जीवश्चेति त्रयमासीदित्यर्थः ॥ ५५ ॥

ननु मायाशब्दादनिर्वाच्यत्वमविद्याया विवक्षितं सेत्स्यतीति चेन्नैवं दुरापा कार्येति भावेनाह—नन्वित्यादिना। मायाशब्देनोक्तेरिति किं स्वप्न एतदुत मायेति। व्रजेश्वरीकर्तृके विश्वरूपदर्शने मायाशब्देन तद्दृष्टस्याऽनिर्वाच्यत्वप्रत्ययादिति भावः। तस्येति मायाशब्दस्य। न चेति। तादृशो युष्मद्विवक्षितः सदसद्विलक्षणोऽर्थः क्वापि लोकेऽस्ति। यद्वाचिनाऽनेन मायाश-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्मायाशब्देनाऽत्र विचित्रसर्गकरी पारमेश्वरी शक्तिरुच्यते । सा तु सत्यैव । तस्यास्तथाभूतत्वं श्रुतिर्दर्शयति-'अस्मान्मायी सृजते विश्वमेत'दिति ॥ ५६ ॥

यत्तूक्तमियं पुनर्ब्रह्मात्मैक्यविज्ञानान्निवर्तत इति, तन्मन्दम् । कीदृशं खलु ज्ञानं निवर्तकम् ? न केवलं

ब्देन भाव्यम् । ननु मायाशब्दस्य छद्मवाचित्वात्तदर्थस्यानिर्वाच्यत्वं सेत्स्यतीति चेत्तत्राह-नोपीति । सर्वत्र शास्त्रे । तस्य मायाशब्दस्य । नानार्थत्वात् दम्भकृपाबुद्धिज्ञानरूपार्थचतुष्टयवाचित्वादित्यर्थः । मायेति विश्वः । माया स्यादिति त्रिकाण्डशेषः । मायेति निघण्टुः । तथा च क्वचिदनृतार्थस्थले तु नाम तस्य छद्मवाचित्वं न तु मायां त्वित्यादौ तात्त्विकार्थस्थले इति भावः । ननु ब्रह्मवाचितायाश्च सत्त्वान्मायां त्वित्यादावपि तेन छद्मवाचिना भवितव्यमिति चेत्तत्राह-तदवाच्यस्येति । वैदिकमायाशब्दवाच्यस्यार्थस्येत्यर्थः । स्वमते तदर्थमाह-तस्मादित्यादिना । विचित्रसर्गकरी आश्चर्यबुद्धिहेतुकसृष्टिकरी तद्धेतुत्वाद्रुक्मिण्यां मायाममत्वमुक्तं श्रीदशमे । तावदेव मायामिव वीरमोहिनीमिति । हरिवंशे च रत्यां तदुक्तम् । नाम्ना मायावती नाम मायेव सुरदर्शनेति । सा तु सत्यैवेति । अजामन्त्रादिभिस्तत्सत्यता बोध्या । तथात्वं विचित्रसर्गकारित्वम् । अस्मादिति प्रधानाद्धेतोः ॥ ५६ ॥

ब्रह्मात्मैक्यविज्ञानादविद्या विनिवर्तते न तु ब्रह्मप्रपत्त्येति यदुक्तं तन्निराकर्तुमाह यत्त्विति । ज्ञानं पृच्छति कीदृशमिति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

चैतन्यं तस्य नित्यत्वेनाऽविद्याया नित्यनिवृत्तिप्रसङ्गात् । ततश्च तन्मूलकसंसारोपलम्भानुपपत्तेः सर्वशास्त्रानारम्भप्रसङ्गोऽनुभवविरोधश्च । नापि वृत्तिरूपं तस्य सत्यत्वे द्वैतापत्तेः । मिथ्यात्वे कथमज्ञाननिवर्तकता, सत्यस्य हि रज्ज्वादिज्ञानस्य भुजङ्गादिभ्रमोपादानाज्ञाननिवर्तकत्वमुपलब्धम् । न च निरिन्धनवन्हिवत्तस्य स्वपरबाधकारणत्वं कतकरजोवच्चेति वाच्यं, कारणतानिर्वाहिकालस-

---

केवलं निर्विशेषम् । तन्मूलकोऽविद्याहेतुकः । अनुभवेति । जीवोऽहं दैवाधीनोऽहमिति सर्वेषामनुभवः स न स्यादित्यर्थः । नापीति । वृत्तिरूपं ब्रह्माकारान्तःकरणवृत्तिजन्यमित्यर्थः । निवर्तकस्य ज्ञानस्य मिथ्यात्वं नेत्याह सत्यस्येति । रज्जुज्ञानस्य मिथ्यात्वे भुजङ्गभ्रमस्तस्यां सदैव स्यादित्यर्थः । वृत्तिज्ञानस्य मिथ्यात्वाय पूर्वपक्षे दृष्टान्तद्वयम् । न च निरिन्धनेति । वह्निर्यथा काष्ठं दग्ध्वा स्वयं विनश्यति तथा वृत्तिज्ञानं प्रपञ्चभ्रमं निवर्त्य स्वयमेव विनश्यतीत्यर्थः । एतन्निरस्यति कारणतेति । वृत्तिज्ञानं तद्भ्रमनिवृत्तेः कारणम् । तल्लक्षणं च नियतपूर्ववृत्तित्वम् । ततश्च कारणतानिर्वाहिकालस्थित्या द्वैतसिद्धिः । कालमपि प्रपञ्चान्तःपातित्वान्निवर्तयतीति चेत्कारणत्वं तस्य न निर्वहेत् । कालान्तरस्वीकारे त्वनवस्था । किञ्च निरिन्धनस्य वह्नेर्महातेजसि सत्त्वादिन्धनभस्मनश्च दृश्यमानत्वात् कतकरजसः कर्दमस्य बाधस्थितत्वाद्विषमं दृष्टान्तयुगत्वं तत्त्वं स्यात् । ब्रह्मप्रपञ्च्या तु माया-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वेनाऽद्वैतहानात् ॥ ५७ ॥

एवं च स्वाप्निकस्त्रीसङ्गादेरसत्यस्य सत्यसुखादिजनकत्वदर्शनादसत्येनैव शास्त्रादिना सत्यमोक्षसिद्धिरित्यपि निरस्तं, तत्र सत्यस्यैव तत्तज्ज्ञानस्य तत्तज्जनकत्वात् । इतरथा मरीचिकाजलादिभिर्हरिणतृष्णादिनाशापत्तिः । ननु रेखारोपितवर्णोऽर्थस्य शङ्काविषं मरणस्य साधनं दृष्टमिति चेन्न, पदस्याऽर्थे इव रेखाया वर्णे सङ्केतित्वेन रेखास्मारितवर्णस्य सत्यस्यैवाऽर्थबोधकत्वात् । शङ्काविषेऽपि शङ्कानिमित्तभीजन्यधातुव्याकुलत्वस्य सत्यस्य मरणहेतुत्वात् ॥ ५८ ॥

यत्तु सत्यमित्यादिषु वाक्येषु प्रवृत्तिनिमित्तानि लक्षणां च विना शुद्धचिद्ब्रह्म प्रतीयते शब्दशक्तेरविचि-

---

निवृत्तिरुक्ता । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति श्रीभगवता ॥ ५७ ॥

एवं चेति । मृषाभूतस्याऽर्थस्य सत्यकार्यजनकत्वे निरस्ते सतीत्यर्थः । तत्तज्ज्ञानस्य स्त्रीसङ्गशिरश्छेदाद्यनुभवस्येत्यर्थः । इतरथेति । मिथ्याभूतस्याऽर्थस्य सत्यार्थजनकत्वे सति । नन्वित्यादिकमगूढार्थम् ॥ ५८ ॥

जात्यादिस्वीकारे ब्रह्मणः सगुणता । लक्षणास्वीकारे शब्दान्तरवाच्यता स्यात्ततो निर्गुणत्वावाच्यत्ववाक्ययोर्व्याकोपा-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्यत्वादतद्व्यावृत्तेर्वेति मतं तदतीव मन्दं भाष्यकारादिभिरेवमस्वीकारात् ॥ ५९ ॥

प्रमाणापत्तेश्च निर्विशेषं तन्न श्रद्धेयम् । तथा हि- न तावत्प्रत्यक्षं तत्र प्रमाणं रूपाद्यभावात् । नाप्यनुमानं तद्व्याप्यलिङ्गाभावात् । न चोपमानं तत्सादृश्याभावात् । नाऽपि शब्दः प्रवृत्तिनिमित्ताभावात् । न च

पत्तिरतः शब्दशक्तेरचिन्त्यतां गौरगोभिन्न इत्येवमतद्व्यावृत्तिं वा शब्दार्थमाश्रित्य निर्गुणं सत्यादिस्वरूपं ब्रह्म प्रत्येतव्यमिति केवलचिदद्वैतिनः प्राहुस्तान्निरस्यति यच्चित्यादिना । भाष्येति । भाष्यकारो नागराजः । स हि जातिगुणक्रियासंज्ञारूपाणि चत्वारि शब्दानां प्रवृत्तिनिमित्तानि मन्यते । एवं भरतोऽप्याचार्यः स्वीकरोति । जातौ शक्तिं मीमांसका, विशिष्टे तु नैयायिका मन्यन्ते इति सर्वोपजीव्यानामेषा पद्धतिरित्येवं स्थिते केयं नवीना व्युत्पत्तिरचिन्त्या शब्दशक्तिरिति । अतद्व्यावृत्तिं च नास्तिका ऊरीचक्रुस्तामाश्रयन्तो नास्तिकान्तःपातिनो विदिताः ॥५९॥

प्रमाणाधीना खलु प्रमेयसिद्धिः प्रमाणाभावान्निर्गुणं ब्रह्म न प्रमातुं शक्यमित्याह प्रमाणाप्रवृत्तेरिति । अर्थसन्निकृष्टं चक्षुरादीन्द्रियं प्रत्यक्षं रूपादिमद्वस्तुग्राहि । तच्च निर्विशेषे ब्रह्मणि न प्रमाणं रूपादिविरहात् । अनुमितिकरणमनुमानं पर्वतो वह्निमान् धूमादित्यादौ वह्न्यादिज्ञानमनुमितिः तत्करणं धूमादिज्ञानम् । अत्र यथा वह्निव्याप्यो धूमो वह्नेर्लिङ्गं न तथा ब्रह्मव्याप्यं लिङ्गमस्ति

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्र लक्षणा सर्वशब्दावाच्यत्वादित्युक्तं प्राक् । न त्व-
र्थापत्तिः तद्विनाऽनुपपद्यमानाभावात् । न चाऽनुपलब्धि-
र्भावरूपत्वेन तदगोचरत्वादिति ॥ ६० ॥

अथात आदेशो नेति नेतीत्यादौ रूपगतेयत्ता प्र-

तस्य निर्विशेषत्वात् । यत्र धूमस्तत्राऽग्निरिति हेतुसाध्ययोः सा-
हचर्यनियमो व्याप्तिः । अतो नाऽनुमानं तत्र प्रमाणम् । उपमि-
तिकरणमुपमानम्। गोसदृशो गवय इति वाक्ये गवयशब्दगवयपि-
ण्डयोः संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । अतिदेशवाक्यस्मृतिस-
हकृतगोसादृश्यविशिष्टपिण्डज्ञानमुपमानं तत्करणत्वात्। अत्र यथा
गवये गोसादृश्यज्ञानं तस्य ग्राहकं तथाऽन्यसादृश्यज्ञानं ब्रह्मणि
ग्राहकं न शक्यं त्वया वक्तुम्। अन्यस्याऽभावादिति नोपमानं तत्र
प्रमाणम् । नापि शब्द इत्यादि व्याख्यातार्थमन्यथाऽनुपपत्त्या
ह्यर्थापत्तिः प्रसूयते । पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र दिवा-
ऽभुञ्जाने रात्रिभोजनं विना पीनत्वस्याऽनुपपत्तिस्तस्य रा-
त्रिभोजने प्रमाणं स्यादेवं ब्रह्म विना कस्याऽर्थस्यानुपपत्तिर्ब्र-
ह्मणि प्रमाणं स्यादिति ब्रह्मान्यस्याभावान्नार्थापत्तिस्तत्र प्रमाण-
म् । जगदस्तीति चेदिष्टं नः समागतम् । नास्तीह घट इति घ-
टोपलब्धेरभावे घटाभावे प्रमाणम् । ब्रह्मणो भावरूपत्वान्न तत्रा-
ऽभावः प्रमाणमिति ॥ ६० ॥

ब्रह्मणो निर्विशेषत्वे यत्त्वथात इत्यादि वाक्यमुदाहृतं त-
त्प्रमादादेवेति दर्शयत्यथात इत्यादिना । तत्र हेतुमाह प्रकृतेति ।
अस्यार्थः—हरिरिव चेतनो जीव इति स्थितम् । ननु चिदाभास

Digitization by Arya Samaj Charitable Foundation, Chennai

तिषिद्धा न तु रूपमात्रम्। प्रकृतैतावत्त्वं हि प्रतिषेधति 'ततो ब्रवीति च भूय' इति न्यायात् ॥ ६१ ॥

न चाऽऽत्मशब्दात् प्रतिपत्तृस्वरूपं ब्रह्मेति वाच्यं,

एव जीवः स्यान्न तु हरिवच्चेतनः। बृहदारण्यके द्वे वावेत्यादिना पृथिव्यादीनि माहारजतादीनि च ब्रह्मणो रूपाणि प्रतिपाद्य पुनरथेत्यादिना तस्मादन्यस्य सर्वस्य प्रतिषेधात्। जीवस्य तद्वच्चेतनत्वे तदन्यमात्रस्य निषेधो न घटेत। तस्मात्तदन्यनिखिलविशेषणशून्यं ब्रह्मेति प्राप्ते प्रकृतेति। न खल्वेषा श्रुतिर्निर्विशेषचिदद्वितीयं ब्रह्म ब्रुवन्ती तदन्यन्निखिलं प्रतिषेधति, किन्तु तत्तद्रूपविशिष्टं तद्ब्रुवन्ती तस्य प्रकृतैस्तै रूपैरेतावत्त्वं प्रमिततां प्रतिषेधति न तु प्रकृतानि तानि रूपाणीत्यर्थः। ततः प्रतिषेधानन्तरं तस्य भूयः प्रचुरं सत्यनामादिरूपं ब्रवीति च। हि यस्मादित्यर्थः। अथेत्यस्यार्थः-अथ मूर्तामूर्तादिरूपनिरूपणानन्तरं यतोऽपरिमितरूपं ब्रह्म अतो नेति नेत्यादेः सः। इतिशब्दस्य समाप्त्यर्थत्वादिति न पूर्वोक्तं मूर्तादिलक्षणं परिमितं तस्य रूपं न, किं तु नेति सत्यनामादिकमपरिमितं रूपमन्यदस्तीत्युपदेश इत्यर्थः। विशेषस्तु भाष्ये द्रष्टव्यः ॥ ६१ ॥

न चेति। आत्मेत्येवोपासीतेति वाक्ये प्रतिपत्तुरुपासकस्य स्वरूपमेव ब्रह्म न तु ततोऽन्यदिति नार्थः। तस्येत्यात्मशब्दस्य। अतति व्याप्नोति, अतति प्रकाशते, अत्यते गम्यते मुक्तैरिति व्युत्पत्त्या विभुचित्सुखवस्तुपरत्वम्। य एष सम्प्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य पुरुषाकारविभुचित्सुखवस्तुपरत्वात् भेदश्रुतिभ्यश्च ॥ ६२ ॥

न च निष्फलो लोकज्ञातो वाऽयं भेदः 'पृथगात्मानं प्रेरितारं च मत्वे'त्यादौ भेद एव फलश्रवणात् । विरुद्धधर्मावच्छिन्नप्रतियोगिकस्य तस्य शास्त्रमात्रगोचरत्वात् ॥ ६३ ॥

किञ्च—'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्तौ च लिङ्गं तात्पर्यनिर्णये' ॥ इत्यत्र यानि

साद इत्यादौ स उत्तमः पुरुष इति श्रुतेः । पुरुषाकारत्वम् आनन्दमयस्यात्मनः पुरुषविधत्ववचनाच्च तत्त्वमित्येके ॥ ६२ ॥

द्वा सुपर्णेत्यादिभेदश्रुतिभ्यः प्रतिपत्तुः स्वरूपं ब्रह्म नेत्युक्तं, तस्य भेदस्य नैष्फल्याल्लोकज्ञातत्वाच्च न तत्र शास्त्रतात्पर्यमित्युक्तं पुरा । अथ स्वोक्तस्य तस्य भेदस्य नैष्फल्यलोकज्ञातत्वे निरस्य तत्र शास्त्रतात्पर्यं दर्शयति न चेति । फलश्रवणाद्रि- अमृतलक्षणस्य फलस्य श्रुत्योक्तत्वादित्यर्थः । विरुद्धैर्भो य- भुत्वादिभिर्धर्मैरवच्छिन्नौ विशिष्टौ जीवेशरूपौ प्रति देहादि- स्य भेदस्येत्यर्थः । न ह्येतादृशो भेदो लोकैर्ज्ञातः कृत एव स तैर्ज्ञायते ॥ ६३ ॥

अथ षड्भिर्लिङ्गैर्भेदे तत्तात्पर्यं दर्शय- कश्चेति । उपक्रमे- ति वाक्यं बृहत्संहितायाम् । उपक्र- संहारयोरैकरूप्यमित्येकं

Digitization by Arya Samaj Charitable Foundation, Chennai

शास्त्रतात्पर्यनिर्णेतॄणि षड्विधानि लिङ्गानि स्मर्यन्ते तानि च तत्रैव वीक्ष्यन्ते ॥ ६४ ॥

तथा हि श्वेताश्वतरोपनिषदि—'अजो ह्येको जुषमाणोऽनुशेते' इत्याद्युपक्रमः। 'जुष्टं यदा पश्यति अन्यमीशमस्य महिमानमेति वीतशोक' इत्युपसंहारः। 'द्वा सुपर्णा तयोरन्योऽनश्नन्नन्यः' इत्यभ्यासः। तादृशस्य भेदस्य वेदान्ताद्विना लोकादप्रतीतेरपूर्वता। 'वीतशोक' इति फलम्।'अस्य महिमानमेती'त्यर्थवादः।'अत्यनश्नन्नि'त्युपपत्तिरिति। एवमन्यानि च पृथगात्मानमित्यादीनि तस्यामेव द्रष्टव्यानि ॥ ६५ ॥

मुण्डकोपनिषदि च-'द्वा सुपर्णे'त्युपक्रमः। 'परमं साम्यमुपैती'त्युपसंहारः।'तयोरन्योऽनश्नन्योऽन्यमीश'मित्यभ्यासः। कालत्रयाबाध्यस्य भेदस्याऽन्यतोऽप्रतिपत्तेरपूर्वता। 'पुण्यपापे विधूये'त्यादि फलम्।'अस्य महिमानमे-

---

लिङ्गम्। आरम्भे समाप्तौ च भेदोक्तिरित्यर्थः। अविशेषपुनःश्रुतिरभ्यासः। वेदान्तैकगम्यत्वमपूर्वता। फलं पुमर्थः। अर्थवादः प्रशंसा। युक्तिप्रदर्शनमुपपत्तिः ॥ ६४ ॥

तादृशस्येति। अणुत्वविभुत्वादिनित्यधर्महेतुकस्येत्यर्थः॥६५॥

अन्यासु चोपनिषत्स्वेतानि लिङ्गानि सन्तीत्याह मुण्डकेति।

Digitization by Arya Samaj Charitable Foundation, Chennai

ती'त्यर्थवादः।'अत्यनश्नन्नि'त्युपपत्तिश्च । एवमन्यासु चोपनिषत्सु तानि दृश्यन्ते ॥ ६६ ॥

यस्तु प्रपञ्चस्याऽध्यस्तत्वान्मिथ्यात्वं साधयति तस्य वेदाप्रामाण्यापत्तिः। 'यतो वा इमानी'त्यादेरग्निहोत्रपरस्य च वाक्यजातस्य तद्विषयतया प्रामाण्यात् । विषयाभावे 'एष वन्ध्यासुतो भाती'त्यादिवाक्यसाम्यात् । ततश्च नास्तिकतापत्तिः ॥ ६७ ॥

ननु वयं न खपुष्पवत्तस्य मिथ्यात्वं ब्रूमः, व्यावहारिकसत्त्वाङ्गीकारात् । तेन न वेदाप्रमाण्यं नापि नास्तिकतापत्तिरिति चेन्न, अनवधानात् । तथा हि द्विविधं खलु सत्त्वं पारमार्थिकमपारमार्थिकञ्च । तत्राऽन्त्यं द्विवि-

---

प्रकटार्थम् । अन्यतो लोकतः ॥ ६६ ॥

अथाऽध्यासवादिनां नास्तिकतापत्तिं समर्थयितुमारभते यस्त्वित्यादिना । तद्विषयतया प्रपञ्चपरतया । विषयस्य प्रपञ्चस्याऽभावे मिथ्यात्वे सति 'कर्मलोमपटच्छन्नः शशमृगधनुर्धरः । एष वन्ध्यासुतो भाति खपुष्पकृतशेखर' इति वाक्यस्य यथा व्यर्थत्वादप्रामाण्यं तथा यतो वा इत्यादेर्वेदवाक्यस्येति ॥ ६७ ॥

युक्त्याभासेन मायी पुनः प्रसवतिष्ठते नन्विति । तस्येति प्रपञ्चस्य । व्यावहारिकेति । अर्थात् प्रपञ्चस्येति बोध्यम् । तेनेति । व्यावहारिकसत्त्वाङ्गीकारेण प्रपञ्चस्य सद्रूपत्वे तद्बोध-

Digitization by Arya Samaj Charitable Foundation, Chennai

धं व्यावहारिकं प्रातीतिकं च । तदेतत्सत्त्वत्रयं क्रमाद्ब्रह्मप्रपञ्चशुक्तिरूप्येषु वर्तते । तत्र व्यावहारिकसत्त्वस्य प्रपञ्चेऽङ्गीकारान्न तद्बोधिवेदाप्रामाण्यम् । पारमार्थिकसत्त्वाभावात्तु तस्य मिथ्यात्वमिति हि मतम् । तदेतदयुक्तं बाध्यार्थबोधकतया वेदाप्रामाण्यानुद्धारात् । बाध्यो हि प्रपञ्चः । यदुक्तम्—'तत्त्वमस्यादिवाक्यार्थसम्यग्धीजन्ममात्रतः । अविद्या सह कार्येण नामादस्ति भविष्यती'ति ॥ ६८ ॥

नापि सत्त्वद्वैविध्यस्वीकृत्या बाह्येभ्यो वैलक्षण्यं तैरपि तस्याङ्गीकारात् । यदुक्तम्—'सत्त्वं तु द्विविधं प्रोक्तं सांवृतं पारमार्थिकम् । सांवृतं व्यवहार्यं स्यान्नि-

---

कस्य वेदस्यैष वन्ध्येत्यादिवाक्यवदप्रामाण्यं न, ततो नास्तिकतापत्तिर्नेत्यर्थः । द्विविधं खलु सत्त्वमिति मायिनस्तव मते इति बोध्यम् । बाध्यो हीति । भानकालेऽपि वस्तुतोऽसत्त्वादिति भावः । तत्र मुक्तावलीकारिकां प्रमाणयति तत्त्वमसीति । तद्वाक्यान्निर्विशेषचैतन्यमेकं वास्तवमित्यनुभवोदये सतीत्यर्थः । कार्येण प्रपञ्चेन सह कालत्रयेऽप्यविद्या सत्तामृन्नेत्यर्थः ॥ ६८ ॥

यच्च बौद्धान्तःपातिलाञ्छनाद्भीतेन मायिना तल्लाञ्छननिवृत्तये सत्त्वद्वयं स्वीकृतं, तेनापि न तल्लाञ्छनान्निस्तार इत्याह नापीति । तैरपि बौद्धैः । तस्य सत्त्वद्वयस्य । सत्त्वं त्विति । प्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

वृत्तौ पारमार्थिकम् ॥ द्वे सत्त्वे समुपाश्रित्य बौद्धानां धर्मचोदना । लोके सांवृतसत्यत्वं सत्यं च परमार्थतः ॥ विचार्यमाणे नाऽसत्त्वं सत्त्वं चापि प्रतीयते । यस्य यत्सांवृतं सत्त्वं व्यवहारपदं च त'दिति । तस्मान्न तेभ्यस्तत्—'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते' इत्यादिस्मरणाच्च ॥ ६९ ॥

अपि च—सत्त्वशब्दो न नानार्थः सत्त्वभेदे प्रमाणाभावात् । यदि सत्त्वशब्दस्य मिथ्यापरमार्थवाच्यतयाऽर्थभेदः स्यात्तदा सदाकारानुगतप्रत्ययानुपपत्तिः, नानार्थसैन्धवादिपदे तददर्शनात् । मृषार्थको व्यावहारिकशब्दो

कटार्थम् । तेभ्यस्तदिति । बाह्येभ्यो मायिनां वैलक्षण्यं नेत्यर्थः । मायावादमिति पाद्मे रुद्रवाक्यम् । 'मयैव कथितं देवि कलौ ब्राह्मणरूपिणे'ति वाक्यशेषः । नारसिंहे चैवं यमवाक्यम्—'विषधरकणभक्षशङ्करोक्तीर्दशबलपञ्चशिखाऽक्षपादवादान् । महदपि सुविचार्य लोकतन्त्रं भगवदुपास्तिमृते न सिद्धिरस्ती'त्येतत् ॥ ६९ ॥

अथ सत्त्वशब्दस्य नानार्थतां निराकरोति—अपि चेत्यादिना । सत्त्वभेदे इति । सर्वेषु सत्स्वेकमेव सत्त्वं सामान्यनामकम् । नित्यत्वे सत्यनेकसमवेतत्वं तत्त्वम् । नानार्थेति । सैन्धवो माणिमन्थेऽश्वे सिन्धुदेशोद्भवे त्रिष्विति श्रीधरः । सजाती-

Digitization by Arya Samaj Charitable Foundation, Chennai

लालात्रक्तासवादिशब्दवत् प्रतारणाय प्रयुक्त इति सत्त्व-द्वयप्रामाण्येन व्यवस्था नोपपन्ना ॥ ७० ॥

स्यादेतत्। ब्रह्मसत्तैव प्रपञ्चसत्ता, तेन न वेदाप्रामाण्यं तदन्यसत्ताभावाच्च मृषात्वोक्तिर्न तु निःस्वरूपत्वात् । 'नेह नानाऽस्ति किञ्चने'ति श्रुतिरपि तदन्यसत्तानिषेधपरा । न चाऽतिप्रसङ्गः कनकमुकुटयोरिवोपादानोपादेयभावस्य नियामकत्वात् । इतरथा 'सर्वं खल्विदं ब्रह्मे'त्यत्र सामानाधिकरण्योपपत्तये तज्जलानिति तज्जत्वाद्युपपत्तिरिति । इदमप्यपेशलं क्षोदाक्षमत्वात् ॥ ७१ ॥

येष्वेव सनामसु सामान्यं गृह्यते न तु विजातीयेष्वपि सनामस्विति भावः । स्फुटार्थं शिष्टम् ॥ ७० ॥

निरस्तोऽपि मायी निस्त्रपः पुनः प्रत्यवतिष्ठते स्यादिति । नन्विति । निःस्वरूपवत्त्वान्निरुपाख्यत्वादित्यर्थः । न चाऽतिप्रसङ्ग इति । ब्रह्मसत्तया चेत्प्रपञ्चः सत्तावांस्तर्हि घटसत्तया पटोऽपि सत्तावान् स्यादित्येवमतिप्रसङ्गोऽत्र न भवेदित्यर्थः । कुत इत्याह कनकेति । ययोरुपादानोपादेयभावस्तयोरेवैका सत्तेति नाऽतिप्रसङ्गः, ब्रह्मप्रपञ्चयोस्तद्भावसत्त्वात् । इतरथा तद्भावाभावे सर्वमिदं ब्रह्मेति वाक्ये ब्रह्मसर्वयोः सामानाधिकरण्यमुपपादयितुं सर्वस्य ब्रह्मजत्वादिकमुक्तमनुपपन्नं स्यादित्यर्थः । निराकरोति-इदमपीति । क्षोदश्चूर्णनं विचार इति यावत् । विचारासहत्वादित्यर्थः ॥ ७१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा हि ब्रह्मसत्तेति किं ते विवक्षितम् ? किं ब्रह्मनिष्ठा सत्ता, किं ब्रह्मस्वरूपा सा, उत ब्रह्माभेदः, आहोस्विद्ब्रह्मव्यतिरेकेणाऽभावः ? ॥ ७२ ॥

आद्ये सा पारमार्थिकी बाध्या वा । प्रथमेऽपसिद्धान्तापत्तिः, अधिष्ठानज्ञानाबाध्यस्य धर्मस्य ब्रह्मण्यस्वीकारात । पारमार्थिकसत्तोपेतस्य प्रपञ्चस्य ब्रह्मवत्सत्यत्वञ्च। न च तत्सत्त्वेऽपि स्वरूपसत्ताभावादसत्यत्वं, पारमार्थिकसत्तोपेतस्य कुत्रापि तददर्शनात् । सत्तोपेतश्चेन्न मृषा । मृषा चेन्न सत्तोपेतः । सत्तासामान्यशून्याऽपि सत्ता सती दृष्टा । सत्तोपेतोऽप्यसन्नदृष्टचरः । किञ्च—समानानां भावः सामान्यं यत्सत्ताशब्देनोच्यते न च तन्मृषासत्ययोः सम्भवेत् । यदुक्तम्—'सत्यत्वं न च सामान्यं मृषार्थपरमार्थयोः । विरोधान्न च वृक्षत्वं सामान्यं सिं-

---

प्रतिवादिनं सिद्धान्ती पृच्छति ब्रह्मसत्तेति । किं ते विवक्षितमिति । चतुर्भिः पक्षैर्ब्रह्मसत्तायाः क्षोदं करोति किं ब्रह्मनिष्ठेत्यादिभिः ॥ ७२ ॥

एवं पक्षान् विरच्य क्रमात्तान् दूषयति—आद्य इति । प्रथमे इति । ब्रह्मणि स्थिता सत्ता पारमार्थिकीति पक्षे इत्यर्थः । न च तदिति । प्रपञ्चे ब्रह्मसत्तायां स्थिरतायामपि स्वरूपसत्ताविरहात्तस्यासत्यत्वमित्यर्थः । तददर्शनादसत्यत्वाप्रत्ययादित्यर्थः । न

Digitization by Arya Samaj Charitable Foundation, Chennai

हवृक्षयो'रिति । न चेतरः, वेदाप्रामाण्यानुद्धारात् । न हि बाध्यसत्ताबोधकं प्रमाणम् । किञ्चाऽस्मिन् पक्षे ब्रह्मणोऽप्यसत्यतापत्तिः, बाध्यसत्तायोगात् । वेदान्ताप्रामाण्यं च निर्विषयत्वात् । न च सत्ताभावेऽपि सद्रूपत्वान्न ब्रह्मणोऽसत्यतापत्तिः, तद्वत्प्रपञ्चस्यापि तदनापत्तेः । 'सदेव सौम्येद'मित्यादिना तस्यापि सद्रूपत्वश्रवणात् । यत्तु दीर्घभ्रमजनकत्वाद्वेदस्य प्रामाण्यं तन्मन्दम्, नभोनीलिमचन्द्राल्पत्वज्ञानजनकस्यापि तथात्वात् ॥ ७३ ॥

नापि ब्रह्मस्वरूपेति द्वितीयः, अबाधितसत्तायोगेन प्रपञ्चस्य मिथ्यात्वासिद्धेः । न तु तृतीयः, विरुद्धयोस्तयोरैक्यानुपपत्तेः । न च चतुर्थः, सर्वं खल्विदमित्यैका-

---

चेति । तत् सामान्यं मृषासत्ययोः प्रपञ्चब्रह्मणोः । न चेतर इति । प्रपञ्चे स्थिता ब्रह्मसत्ता बाध्येति प्रथमकल्पस्य द्वितीयः पक्षोऽपि नेत्यर्थः । निर्विषयत्वादिति । वेदान्तवेद्यस्य ब्रह्मणोऽसत्यतापत्तित इत्यर्थः । तदनापत्तेरिति । असत्यतापत्तेरभावादित्यर्थः । यत्तु दीर्घेति । अनादिकालिकजगद्भ्रमकरत्वादित्यर्थः । तथात्वाद्दीर्घभ्रमजनकत्वात् ॥ ७३ ॥

द्वितीयपक्षं दूषयति नापीति । स्फुटम् । न तु तृतीय इति । ब्रह्मसत्तैव प्रपञ्चसत्तेत्यस्य तृतीयः पक्षो ब्रह्माभिन्नः प्रपञ्च इत्यर्थको न सम्भवतीत्यर्थः । कुत इत्याह विरुद्धयोरिति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

र्थ्यानुपपत्तेः । न हि तदभावे तदैकार्थ्यसम्भवः । न च यश्चौरः सः स्थाणुरितिवद्बाधायां तदिति वाच्यं वेदाप्रामाण्यानिस्तारादिति ॥ ७४ ॥

अपि च—मायिना दृष्टिसृष्टिः स्वीकृता । दृष्टिसमसमया सृष्टिर्न तु सृष्टिसमसमया दृष्टिरिति । सा चैषा क्षणिकविज्ञानपक्षं नातिवर्तते । तत्राऽर्थानामर्थात् क्षणिकत्वात् । न चात्राऽक्षणिकं विज्ञानमात्रमस्तीति स्वीकारात्ततो भेदः, तत्र प्रमाणाभावात् । दर्शितं चैतत्प्राक् ॥ ७५ ॥

चित्त्वचिज्जडत्वाभ्यां विरुद्धयोर्ब्रह्मप्रपञ्चयोरैक्यासम्भवादित्यर्थः । न च चतुर्थ इति । ब्रह्मातिरिक्तः प्रपञ्चो नास्तीति पक्षोऽपि न युक्त इत्यर्थः । ऐकार्थ्यं सामानाधिकरण्यम् । तदित्यैकार्थ्यम् ॥ ७४ ॥

प्रपञ्चमिथ्यात्ववादिनो नास्तिकत्वं प्रोक्तम् । अथ बौद्धसाङ्कर्यात्तस्य तथात्वं प्रस्फुटयति अपि चेत्यादिना । मायिना शङ्करेण । वाक्सुधाख्येन प्रकरणेन दृष्टिसृष्टिः समर्थिता । तस्याः स्वरूपमाह । दृष्टीति । यदैव दृष्टिस्तदैव सृष्टिर्दृष्ट्यभावे सृष्ट्यभाव इत्यर्थः । तत्रेति । क्षणिकविज्ञानवादे योगाचाराख्येन बुद्धशिष्येण प्रतिपादिते । न चात्रेति । अत्र चिन्मात्राद्वैतवादे शङ्कराभिमते । अक्षणिकं नित्यम् । तत्रेति । निर्गुणचिन्मात्रे । प्रागिति । प्रमाणाप्रवृत्तेश्चेत्यादिपूर्वोक्तग्रन्थे । तस्माद्योगाचारमतावलम्बी निर्गुणचिदद्वैतीति ॥ ७५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किञ्च—मायिमतं शून्यवादान्नातिरिच्यते। अविद्यावच्छिन्नं ज्ञानं संवृत्यवच्छिन्नं च। सर्वं ज्ञानमिति शून्यमिति च भावनाप्रकर्षादविद्यायाः संवृतेश्च विनाशे सति ज्ञानमात्रं शून्यमात्रं चाऽवशिष्यते। कार्यनाशस्य कारणरूपत्वात्सैव मुक्तिः। तस्य तस्य च परसामान्यादिरूपं सत्त्वं भावप्रतियोगिकरूपमसत्त्वं अनुकूलवेद्यत्वरूपं सुखत्वं प्रतिकूलवेद्यत्वरूपं दुःखत्वं च किञ्चि-

---

अथ माध्यमिक बुद्धशिष्यमतावलम्बित्वं निर्गुणचिदद्वैतिनो दर्शयति किञ्चेत्यादिना। अविद्येति। अविद्यावच्छिन्नं ज्ञानं जगत्। सर्वं ज्ञानमिति भावनाप्रकर्षेणाविद्याया विनाशे ज्ञानमात्रमवशिष्यते इति। निर्गुणचिदद्वैतिनो मतम्। संवृत्यवच्छिन्नं शून्यं जगत् सर्वं शून्यमिति भावनाप्रकर्षेण संवृतेर्विनाशे शून्यमात्रमवशिष्यते इति माध्यमिकस्य मतमित्यर्थः। कार्येति। कारणरूपत्वाद्विज्ञानमात्ररूपत्वाच्छून्यमात्ररूपत्वाच्चेत्यर्थः। क्रमोऽत्र बोध्यः। सैवेति। कारणरूपः कार्यनाशो मोक्ष इत्यर्थः। तस्य तस्य चेति। विज्ञानमात्रस्य शून्यमात्रस्य चेत्यर्थः। परसामान्येति। अनुवृत्तधीहेतुर्नित्यमेकमनेकानुगतं च सामान्यम्। तत् खलु परमपरं चेति द्विविधम्। परं सत्ता द्रव्यादिवृत्तित्वात्। अपरं द्रव्यत्वादि द्रव्यादिमात्रवृत्तित्वादिति। तथा च द्रव्यत्वादेरिव भावरूपत्वं नास्तीत्यर्थः। भावेति। घटो यस्य प्रतियोगी स घटाभावप्रतियोगिकस्तत्त्वं नास्तीत्यभावरूपत्वं नास्तीत्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वास्तवं नास्ति । उभयं च निर्लेपमजरममरमसम्बाधं सर्वमानावेद्यं स्वयम्प्रभातम् ॥ ७६ ॥

नन्ववेद्यत्वे सत्यपरोक्षव्यवहारार्हत्वमनन्याधीनापरोक्षत्वं ब्रह्मणः स्वप्रकाशत्वं, तच्च न शून्यस्यास्तीति कथमुभयोः साम्यमिति चेत्तुच्छमेतत् । अपरोक्षं हि स्वेनैव स्वविषयकमन्यविषयकं वा । नाद्यः स्वाविषयताया मायिनाऽनङ्गीकारे वा चिद्विषयत्वरूपदृश्यत्वापत्त्या ब्रह्मणो मिथ्यात्वापत्तिर्विषयत्वविषयित्वाभ्यां वैशिष्ट्यापत्तिश्च । नेतरः मोक्षेऽन्याभावेनान्यविषयापरोक्षसम्भवात् । तस्माच्छून्यसंवृत्योः पर्यायतयैव ज्ञानाविद्ययोः स्थितिरिति मा-

---

भावरूपत्वं च । नेति । सर्वमानावेद्यत्वमुभयस्य तुल्यम् । अन्यत् प्रकटार्थम् ॥ ७६ ॥

अथ माध्यमिकात् स्वस्य वैलक्षण्यमाख्यातुं मायी प्रवर्तते नन्वित्यादिना । न खलु नासाकर्णवत्त्वमात्रेण विप्रस्याप्यन्त्यजत्वं त्वयापि शक्यं वक्तुमिति भावः । परिहरति तुच्छमेतदिति । अपरोक्षं हि स्वेनैवेति । ब्रह्मैव स्वं साक्षात्करोति तदन्यो वा जीव इत्यर्थः । शिष्टं स्पष्टम् । ततश्च मायिमाध्यमिकयोः सर्वथा धर्मसाङ्कर्यं सिद्धमित्याह तस्माच्छून्येति । साधर्म्यान्तरमाह वेदान्तानामिति । संसर्गेति । संसर्गो गुणसम्बन्धः । स यस्यागोचरो विषयो न भवति तादृशी निर्विशेषापरिच्छिन्नैकब्रह्मविषया प्रमा तज्जनकाः सर्वे

Digitization by Arya Samaj Charitable Foundation, Chennai

यो माध्यमिक एव। वेदान्तानामखण्डार्थबोधकत्वं संसर्गागोचरप्रमाजनकत्वं स्वीकुर्वता मायिना सत्यं ज्ञानमनन्तमित्यत्रासज्जाड्यपरिच्छिन्नव्यावृत्तं ब्रह्मस्वरूपमेव तथेति व्याख्यातं—यथा गौरगोव्यावृत्त इत्यादिकमपोहत्वादिना बौद्धेन ॥ ७७ ॥

अपि च जैनसख्यं च मायिनो विलोकितम्। जैनः खलु जीवादीन् षट् पदार्थान् सत्त्वासत्त्वादिविरुद्धधर्मयोगिनो वर्णयति कथञ्चित्तु सदसदित्येवमादिना सप्तभङ्गिन्यायेन। मायी च विश्वं सदसद्भिन्नम्, औपनिषदमपि ब्रह्म सर्वशब्दावाच्यमित्यादि। तस्माच्छब्दान्तरेण स्वच्छद्म समावृण्वन्नयं नास्तिकविशेष एवेत्यस्य वेदाप्रामाण्यकारिणः स्पर्शाद्बिभेतव्यं वैदिकैरिति ॥ ७८ ॥

वेदान्ता इत्यर्थः। यथेति। गोभिन्नभिन्नत्वं गोत्वमिति बौद्धानां लक्षणम्। अतद्व्यावृत्तिरपोहः ॥ ७७ ॥

एवं मायिनो बौद्धत्वमापाद्य जैनत्वमापादयति—अपि च जैनेति। सख्यं साधर्म्यम्। स्फुटार्थो ग्रन्थः। सप्तभङ्गीन्यायोऽयं सूत्रभाष्याद् बोध्यः, विस्तरभयान्नात्र लिखितः। नास्तिकविशेष इति। केनचिद्धर्मेणा + + प्येष नास्तिक एवेति भावः। अस्य स्पर्शाद्भेतव्यमिति। यदुक्तं—हस्तिना पीड्यमानोऽपि न गच्छेज्जैनमन्दिरमिति ॥ ७८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्पुन'र्ज्योतींषि विष्णु'रित्यादौ ज्ञानमात्रे ब्रह्मणि व्यवहारस्याध्यस्तत्वात्तस्य तद्भेदस्य च बाध्यत्वमित्युक्तं तदसत्, अस्तिनास्तिशब्दवाच्यं चिज्जडात्मकं कृत्स्नं जगत् परस्य विष्णोः कायभूतं तदायत्तवृत्तिकत्वादिभिस्तदात्मकं व्यपदिश्यते। स तु सर्वात्मापि सर्वविलक्षणः क्षेत्रज्ञस्य जीवस्य ज्ञानरूपस्यापि देवमनुष्यादिभावप्राप्तौ तद्भोग्यजन्मपरिणतौ च स्वरूपावरककर्मैव हेतुर्विष्णूपसत्त्यैव तस्य कर्मणो विमुक्तिरित्येतस्यैवार्थस्य निरूपणात् ॥ ७९ ॥

तथा हि ज्योतींषीति । इह विष्ण्वायत्तवृत्तिकत्वादिभिश्चिदचितोस्ताद्रूप्यमभिहितं ताभ्यां विष्णोर्वैलक्षण्यमाह ज्ञानस्वरूप इति। यस्मादसौ भगवान् ज्ञानस्वरूपः

अथ प्रकृतान् पूर्वपक्षान्निराकर्तुमाह यत्त्वित्यादिना । सत्विति । शक्तिद्वारा वा वृत्तिदातृत्वेन वा व्यापकतया वा सर्वरूपोपि सर्वास्पृष्ट इत्यर्थः । स्वरूपावरककर्मैवेति । कर्माऽत्राऽविद्यारूपं बोध्यम् ॥ ७९ ॥

तथा हीति । स्वमतमर्थं दर्शयतीत्यर्थः । ताद्रूप्यं विष्णुरूपत्वम् । ताभ्यां चिदचिद्भ्याम् । जीवार्थं विजृम्भितानिति । जीवभोगाय विरचितानित्यर्थः । अत्र प्रमाणं बुद्धीन्द्रियेति । श्रीदशमे । जीवस्येति । अनादिकालिकी विषयस्पृहाऽस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रूयतेऽतोऽशेषमूर्तिः परिणामिप्रपञ्चाकारो न तु भवति किं तु वस्तुभूतोऽपरिणामिचिद्रूप इत्यर्थः। प्रपञ्चस्तु तस्मादेव निमित्तादुद्भूत इत्याह ततो हीति। क्लीवत्वमार्षम्। विज्ञानार्थं जीवार्थं विजृम्भितानित्यर्थः। 'बुद्धीन्द्रियमनःप्राणान् जनानामसृजत् प्रभुः। मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय चे'ति स्मरणात्। जीवस्य ज्ञानस्वरूपस्याप्यनादिभगवद्वैमुख्यकृतैः कर्मभिः संसारस्तत्सांमुख्ये तु सति विलीयते स्वरूपं च स्फुरतीत्याह यदा तु शुद्धमिति। यदैव विज्ञानस्वरूपमेवात्मवस्तु स्वस्मिन् देवादिवैविध्यानुसन्धिहेतोः सर्वस्य कर्मणः सत्तीर्थानुग्रहलब्धया ज्ञानपूर्वकोपासनया क्षये सति शुद्धं परिशोधितं सन्निजरूपि भवति, तदा देवादिदेहाभिमानिनोऽस्यात्मनः सङ्कल्पपूर्वककर्मफलभूता देवादिदेहभोग्याः शैलाब्धिधरादयो वस्तुभेदा न भवन्ति तद्धेतोः कर्मणः प्रणाशादित्यर्थः। इत्थं चाऽचिदंशस्य प्रतिक्षणपरिणामितया विनष्टप्रायत्वान्नास्तिशब्दवाच्यत्वं दर्शितम्। प्रतिक्षण-

---

भगवद्वैमुख्यं, तेन प्रकृतावासज्जति कर्माणि च करोतीति। तैरूर्ध्वमधश्च भ्रमतीत्यर्थः। सत्तीर्थेति सद्गुर्वित्यर्थः। निजरूपीति। ज्ञानगुणकमणुचैतन्यं सत् स्फुरतीत्यर्थः। न भवन्ति तद्धे-

Digitization by Arya Samaj Charitable Foundation, Chennai

मवस्थाभङ्गस्तत्र निमित्तमित्याह वस्त्वस्तिकिमिति । चिदंशः खल्वादिमध्यावसानहीनः सदैकरूपस्तस्य न कदाचिन्नास्तिबुद्धियोगः । अचिदंशस्तु कदापि तथाभूतो न दृष्टः । ततः किं तत्राह यच्चेति । यदन्यथात्वं परिणामं मुहुः प्राप्नोति तत् पुनस्तथा पूर्वत्रन्न भवति । तत्र पूर्वावस्थाशून्येऽपरावस्थाभाजि वस्तुनि तदेवेति प्रतीत्यभावात्तत्त्वमस्तिशब्दवाच्यत्वं कुतः स्यान्नेत्यर्थः । तथैव प्रतीयते इत्याह महीति । पिण्डादिद्वारा घटत्वं मही प्राप्नोति । घटाद्भग्नात् कपालिका । मर्दितायाश्च तस्याश्चूर्णं रजः । ततोणुरतिसूक्ष्मश्चेत्येवं जनैरवस्त्वेव स्वभोग्यभूतं स तत्परिणामि जडमेवालक्ष्यते । अत्र परिणामपरम्परायां सततैकरूपमस्तिशब्दवाच्यं वस्तु जीवेशान्यतरत् किमालक्ष्यते त्वं ब्रूहीति नैवालक्ष्यते इत्यर्थः । तत्र हेतुः स्वकर्मेति ॥ ८० ॥

यस्मादेवं तस्मादचिदंशोऽस्तिशब्दवाच्यो न भवती-

गाय नोदयन्ते । अचिदंशस्य प्राकृतभागस्य शैलाब्धिधरादेः । अचिदंशेनाऽस्तिशब्दस्य प्रवृत्तौ निमित्तमाह प्रतीति । तत्पुनस्तथेति । पूर्ववच्चिदंशवत् सदैकरूपो न भवतीत्यर्थः । तथैवेति । नानावस्थतया । तस्या इति । कपालिकायाः ॥८०॥

यस्मादित्यादिकं प्रकटार्थम् । विशुद्धमित्यादिकं जीवस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

त्याह तस्मान्नेति। चिदंशस्तु परिणामाभावात् सदैकरूपो देवादिदेहविलक्षणोऽपि तदादिप्रापकेन निजकर्मभेदेन विभिन्नचित्तैर्जनैर्बहुधा देवमनुष्यादिरूपेणानुसंहित इत्याह विज्ञानमेकमिति। एतच्च भगवद्धेमुख्यहेतुकेन कर्मणैव कृतं न तु स्वरूपप्रयुक्तमित्याह ज्ञानं विशुद्धमिति। विशुद्धं कर्मरहितं विमलं प्रकृतिस्पर्शरहितं विशोकं तत्कृतदुःखरहितं लोभादिहेयगुणरहितं च। एवं मदुक्तप्रकारकं सर्वदैकरसमिति विश्वान्तर्वर्तिनः क्षेत्रज्ञस्य शुद्धं स्वरूपं निरूपितम्। यस्योपसत्त्योक्षस्तमीशं निरूपयति परम इति। परेशस्तु परमो नित्यलक्ष्मीकः वासुदेवो विशुद्धसत्त्वाविर्भावः। 'सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृत' इति स्मरणात्। यतोन्यन्नास्ति शक्तिमतस्तस्माज्जगदन्यन्न भवतीति जीवाद्भेदः ॥ ८१ ॥

उपसंहरति सद्भाव इति। एवं नित्यलक्ष्मीकतया

नैजं रूपं बोध्यम्। जीव ईशश्चाऽस्तिशब्दवाच्यः। तत्र जीवस्तद्वाच्योऽतः। अथेश्वरं निरूपयति यस्योपसत्त्येत्यादिना। उपसत्त्योपासनया। इति जीवादिति। नित्यलक्ष्मीकत्वविशुद्धसत्त्वाविर्भावित्वरहिताज्जीवात्तद्वानीश्वरो भिन्न इत्यर्थः ॥ ८१ ॥

सद्भाव इति। सच्छब्दस्य ब्रह्माभिधायित्वं ॐतत्सदिति

Digitization by Arya Samaj Charitable Foundation, Chennai

विशुद्धसत्त्वाविर्भावितया च मया सतो ब्रह्मणो भावो विभूतिः स्वभावश्च तत्रोक्तः । ज्ञानं चिदंशः । पूर्वस्य सर्वदैकरूप्येणास्तिशब्दवाच्यत्वं सत्यत्वम् । उत्तरस्य प्रतिक्षणपरिणामितया विनाशगर्भत्वान्नास्तिशब्दवाच्यत्वमसत्यत्वं च तत्रोक्तम् । नन्वस्याचिदंशस्योक्तिः किमर्था तत्राह एतत्तु यदिति । तत्रापि विष्णुतत्त्वनिरूपणैर्यदेतदचिदंशभूतं भुवनाश्रितं शैलाब्धिधरादिगतं तत् सम्यक् परमार्थोपयोगितया व्यवहारभूतं न तु शुक्तिरजतादिवन्मृषाभूतमित्यर्थः । देवमनुष्यादिभावः कर्मणैवेति विशदयति यज्ञः पशुरिति । अचिदंशस्य संव्यवहारभूततामाह यच्चैनदिति । कर्मवश्यो जीवो नानायोनीर्व्रजतीति ज्ञात्वा विरलः सन्निह जगति तत् कुर्याद्येन वासुदेवं विशति प्राप्नोति । पुरं प्रविशतीत्यत्र पुरप्राप्तिरवगम्यते । प्रवेशहेतुश्च भक्तिरेव । 'भक्त्या मामभिजानाती'त्यादिस्मृतिभ्यः ॥ ८२ ॥

निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति वाक्यात् । भावशब्देन विभूतिः स्वभावश्चोच्यते । भावः सत्तेत्यादिमेदिनीकरकोषात् । स्फुटमन्यत् ॥ ८२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्त्विह बाधायां सामानाधिकरण्यमाश्रित्य ब्रह्मैकं निर्विशेषं सत्यं ततोऽन्यत् सर्वमसत्यमिति कल्पयन्ति ।

मायिनो व्याख्यां दूषयति यत्त्विहेत्यादिना। अयमर्थः-ज्योतींषि विष्णुरिति । बाधायां सामानाधिकरण्यादेकमेव ब्रह्मतत्त्वमिति प्रतिज्ञाय ज्ञानस्वरूपो भगवानिति तस्मिन्नज्ञानेन विजृम्भितं जगदध्यारोप्य। यदा शुद्धमिति। तदेव दृढीकृत्य वस्त्वस्तिकिमित्यादिभ्यां प्रतीतिकालेपि तस्य मिथ्यात्वमापाद्य तस्मान्न विज्ञानमिति प्रतिज्ञातं तत्त्वैकत्वमुपसंहृत्य विज्ञानमेकमिति कर्मैव भेददृष्टिमूलमिति विशदीकृत्य ज्ञानं विशुद्धमिति ब्रह्मस्वरूपं संशोध्य। सद्भाव इति। ब्रह्मैव परमार्थसत्यं तदन्यत् सर्वं मृषाभूतं तस्य सत्यत्वं व्यावहारिकमिति शास्त्रीयं रहस्यमत एकमेव चिन्मात्रं ब्रह्म। अज्ञाने त्वनिर्वाच्यं, तेन शैलाब्धिधरादिजगत्तत्राध्यस्तमिति प्रत्यापद्य यच्चैतदित्यनेन ब्रह्माहमित्यद्वैतभावनयोपाधिविगमे स्वात्मभूतमेव वासुदेवं ब्रह्म विशति । घटनाशे घटाकाश इव महाकाशमिति प्रतिपादयति पराशर इति । व्याचष्टे केवलाद्वैती तन्मन्दं, तत्र हेतुः पूर्वापरेति । अत्र हि भुवनकोशस्य विस्तीर्णं स्वरूपं निरूप्य तत्रानिरूपितस्यैव रूपान्तरं सङ्क्षेपान्निरूप्यते-सङ्क्षेपः श्रूयतां पुनः। यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा। पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता॥ ज्योतींषि विष्णुरित्यादिः । अत्र विष्णोः कायभूते ब्रह्माण्डे चिदचिद्भूतौ द्वावंशौ । तत्र चिदंशः सदैकरूप्यादस्तिशब्दवाच्यः, अचिदंशस्तु परिणामेन नाशगर्भत्वान्नास्तिशब्दवाच्यः परिभाष्यते। चिदंश-

Digitization by Arya Samaj Charitable Foundation, Chennai

न तच्चतुरस्रं पूर्वापरविरोधादेवं बाधाद्द्रष्टुरनिरूप्यत्वाच्च ॥ ८३ ॥

अस्मिन् शास्त्रे श्रीमान् पराशरः पूर्वमीशजीवप्रकृतिकालान्नित्यानवोचत्। तथा हि—'अविकाराय शुद्धाय नित्याय परमात्मने। सदैकरूपरूपाय विष्णवे सर्वजिष्णवे॥ प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया हरिः। क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ ॥ अव्यक्तं कारणं यत्तत् प्रधानमृषिसत्तमैः। प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् ॥ अनादिर्भगवान् कालो नान्तोस्य द्विज विद्य-

---

स्याऽचिदंशावेशात् संसृतिर्विष्ण्वावेशात्तु विमुक्तिरिति पूर्ववर्णितस्यैव विशेषो वर्ण्यते नान्यदिति। एवमेव मैत्रेयस्यानुक्तिश्च सङ्गच्छते। विश्वाधारं यथा चैतत्त्रैलोक्यं समवस्थितम्। परमार्थश्च मे प्रोक्तो यथा ज्ञानं प्रधानतः ॥ इति। तस्मान्नास्त्यसत्यशब्दाभ्यां प्रपञ्चस्य नश्वरत्वमुक्तम्। वस्त्वस्तिकिमित्यादिभ्यां तथैव प्रत्ययात्। नास्त्यादिशब्दाभ्यामुक्तिर्वैराग्यायेति तत्त्वविदः। बाधेति। कोऽसौ बाध इष्टो जीवश्चेदृशि कर्तृत्वानुपपत्तिः, तस्य बाध्यत्वेन तादृशि कर्मत्वात्। ब्रह्मस्वरूपं चेद्वैशिष्ट्यापत्तिः ॥८३॥

श्रीविष्णुपुराणेस्मिन्निर्विशेषचिदैक्यकल्पनमतीव मौढ्यादेवाचार्याहृदयविरोधादिति भावेन प्रकरणं रचयति अस्मिन्नित्यादिना। अविकारायेत्यादीनि प्रथमांशवचांसि। प्रधानमिति। पुरुषं क्षेत्रज्ञं व्ययाव्ययौ सपरिणामापरिणामावित्यर्थः। परिणाम-

Digitization by Arya Samaj Charitable Foundation, Chennai

ते । अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमा' इति । न चैषां भावनयैव नाशः नित्यत्वव्याकोपात् ॥ ८४ ॥

भेदश्चैषामिह समभ्यस्यते—'प्रधानपुरुषव्यक्तकालानां परमं हि यत्। पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम्॥ विष्णोः स्वरूपात् परतो हि तेऽन्ये रूपं प्रधानं पुरुषश्च विप्र । तस्यैव तेन्येन धृते वियुक्ते रूपेण यत्तद् द्विज ! कालसंज्ञम् ॥ न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः । सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥ स ब्रह्म तत्परं धाम परमात्मा स चेश्वरः । स विष्णुः सर्वमेवेदं यतो नावर्तते यतिः ॥ प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनी'त्यादिभिः ॥ ८५ ॥

एतेनैव परत्र भरतरहगणसंवादोपि व्याख्यातः ।

विरहान्नित्यो जीवः । अनादिरिति। आद्यन्तविरहान्नित्यः कालः८४॥

प्रधानेति। परमं श्रेष्ठं तेभ्योऽत्यन्तभिन्नमित्यर्थः। विष्णोरिति। इहान्यशब्दौ भेदार्थकौ व्यक्तमुक्तौ। न सन्तीति वस्तुभूता नामजातिलीलात्र न सन्तीत्यर्थः। आत्मनो जीवात्परे भिन्ने। एषु प्रधानेत्यादिद्वयं प्रथमेंशे, न सन्तीत्यादित्रयं तु षष्ठेंशे बोध्यम् ॥ ८५ ॥

अथ द्वितीयांशस्थं भरतरहगणसंवादं सङ्गमयति—एतेनैवेति। नास्त्यसत्यशब्दाभ्यां परिणामिनः प्रतिपादनेनेश्वरादीनां चतुर्णां नित्यत्वप्रतिपादनेन शास्त्रेस्मिंस्तेषां भेदाभ्यासेन चेत्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

तत्र हि ब्रह्मजीवयोरभेदोऽपरमार्थः । शुद्धब्रह्मानुभवस्तु परमार्थः स्फुटमुक्तः । यस्त्वृभुनिदाघसंवादस्तेन स्वोक्तार्थपोषायोदाहृतः सोऽपि व्याख्यातः । तत्र हि क्षुधादिशून्यं जीवस्य शुद्धं स्वरूपं तस्य व्यापीशतन्त्रत्वं तत्र तत्र निवा-

---

व्याख्यात इति । भेदपरतया परे शक्तिपरतया च नीत इत्यर्थः। एतदेवाह तत्र हीत्यादिना । परमात्मात्मनोर्योगः परमार्थ इतीष्यते। मिथौ तदन्यद्रव्यं हि नैत्यन्यद्रव्यतां यत इति तत्रैव भरतोक्तिः। एतदुक्तं भवति यो भवान् यन्निमित्तं वेत्यादि रहगणेन राज्ञा पृष्टो भरतोऽहमर्थोऽप्यात्मा स्वातन्त्र्याभिमानं नार्हतीत्युपदिशति । अथ श्रेयस्तेन पृष्टो धनपुत्रादीनि परापरात्मैक्यपर्यन्तानि श्रेयांस्यभिधाय तेषामपारमार्थ्यमुपपाद्य शुद्धब्रह्मानुभवस्य पारमार्थ्यमाह—तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः । परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ॥ एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः । जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः॥ परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः । न योगवान्न युक्तोऽभून्नैव पार्थिव योक्ष्यति॥तस्यात्मपरदेहेषु सतोप्येकमयं हि यत् । विज्ञानं परमार्थोसौ द्वैतिनोऽतथ्यदर्शिनः॥वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः । अभेदव्यापिनो वायोस्तथा तस्य महात्मनः ॥एकत्वं रूपभेदश्च बाह्यकर्मप्रवृत्तिजः।देवादिभेदमध्यास्ते नास्त्येवावरणो हि सः इति।एषामर्थः-एकः स्वतन्त्रः व्यापी बहिरन्तश्च व्यापकः आत्मा चित्सुखवपुः । जीवज्ञानादपि यत्परं ज्ञानं तन्मयः असद्भिर्नामादिभिर्नेत्युक्तैः सद्भिस्तैः स्वरूपसिद्धैस्त्रैकालिकयोगवानित्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सगत्यागत्यादित्वं चेति व्यापकाद्वैतमेव निरूप्यते। न त्वन्यत्। उपसंहारोप्येवमेव नेयः। विष्णौ नानात्वदृष्टेर्निषेधस्त्वत्राधिकः ॥ ८६ ॥

एवमुत्तरत्र केशिध्वजखाण्डिक्यसंवादेप्यात्मभावादि-

तस्येदृशस्यात्मपरदेहेषु रवेरिव पृथक् रसतोप्येकमपमैक्यप्रधानं यद्विज्ञानमनुभूतिरसावेव परमार्थः। ये तु द्वैतिनस्तत्तद्देहोपाधिदृष्ट्या तस्यापि भेदं मन्यन्ते तेऽतथ्यदर्शिनः। बहुधात्वभातस्याभेदं दृष्टान्तेन साधयति वेण्विति। सर्वेषु रन्ध्रेषु निःसरतो वायोर्यथैकत्वं तथा तस्य महात्मनस्तत्त्वमित्यनुषङ्गः रूपभेदादेव। मानवादिदेहविशेषस्तु बाह्यस्य बहिर्मुखस्य जीवस्य कर्मप्रवृत्तितो जातः। स परात्मा तु देवादिभेदमन्तर्यामित्वेनाधिष्ठायास्ते तत्तदुपाधिलेपाभावावरणो निरावरण इत्यर्थः। इह स्वतन्त्रो व्यापी चित्सुखवपुरीश्वरः। जीवस्तु तद्व्याप्यः। शुद्धस्येशस्यानुभवस्तु जीवस्य परमार्थ इति निष्कर्षः ॥ ८६ ॥

ऋभुनिदाघसंवादेपि केवलाद्वैतशङ्कां परिहरन्नाह यस्त्विति। इत्युक्ते मौनिनं भूयश्चिन्तयानं महीपतिम्। प्रत्युवाचाथ विप्रोऽसावद्वैतान्तर्गतां कथाम् ॥ ऋभुर्नामाभवत् पुत्रो ब्रह्मणः परमेष्ठिनः। तस्य शिष्यो निदाघोऽभूत् पुलस्त्यतनयः पुरा ॥ प्रादादशेषं विज्ञानं स तस्मै परया मुदा। अवाप्ततत्त्वज्ञानस्य न तस्याद्वैतवासनाम् ॥ स ऋभुस्तर्कयामास निदाघस्य नरेश्वरेति। जीवेश्वरयोः स्वरूपतो गुणतश्च ज्ञानमस्यास्ति किन्त्वीश्वरव्याप्यत्वादिना जीवस्येश्वरानतिरेकमसौ न वेदेत्यद्वैतवासनां न

Digitization by Arya Samaj Charitable Foundation, Chennai

शब्दान्निर्गुणचिदैक्याशा न कार्या, तत्र ध्येयध्यातृभावेन

तर्कयामासेत्यर्थः । अथ दिव्याब्दसहस्रान्ते स्वगृहागतं तमृभुं भोजयित्वा तृप्त्यादि निवासादि च निदाघः पृच्छति । अपि ते परमा तुष्टिरुत्पन्ना तुष्टिरेव वा । अपि ते मानसं स्वस्थमाहारेण कृतं द्विज ॥ क्व निवासो भगवान् विप्र क्व वा गन्तुं समुद्यतः । आगम्यते च भवता यतस्तच्च द्विजोच्यतामिति । ऋभुस्तु क्षुधादिकं प्राणानामेव न त्वात्मनो धर्मः स तु स्वतस्तृप्त इति शुद्धजीवस्वरूपनिरूपणेन तृप्त्यादिप्रश्नान्निराचष्टे । क्षुद्यस्य भुक्तेऽन्ने तृप्तिर्ब्राह्मणस्य न जायते॥ न मे क्षुदभजत्तृप्तिं कस्माद्ब्राह्मण पृच्छसीत्यादिभिः। अथ निवासादिप्रश्नांश्च निरस्यति । क्व निवासस्तवेत्युक्तं क्व गन्तासि च यस्त्वया । कुतश्चागम्यते तत्र तृतीयेपि निबोध मे ॥ आत्मा सर्वगतो व्यापी आकाशवदयं यतः । कुतः कुत्र क्व गन्तासीत्येतदस्यार्थवत् कथम्॥ सोऽहं न गन्ता नागन्ता नैकदेश्यनिकेतनः।न चान्ये च न च त्वं च नान्येन्ये नाहमप्यहमिति । आत्मा चित्सुखवपुर्वासुदेवः सर्वगतो व्यापीत्यन्तर्बहिश्च व्याप्य स्थितः। आकाशवदिति । तथापि व्याप्यसंसर्गजो दोषस्तस्य न भवति । तथा च परतन्त्रस्य व्याप्यस्य मम परेशानतिरेकात् कुतः कुत्र क्व गन्तासीति मदुद्देश्यकः पृथक् प्रश्नोऽनर्थक इति। एतद्विवृणोति सोहमिति तद्व्याप्यत्वात् स एवाहं तदतिरिक्तो नाहमित्यर्थः। नन्वेकोहमेतादृशः किन्त्वन्ये च सर्वेपीत्यर्थः । ननु मम चान्येषां च तव च कर्मसु स्वातन्त्र्यतदभिमानयोः प्रतीतेः कथं प्रत्यक्षविरुद्धमुच्यते तत्राह न च त्वमिति । यस्त्वं तेषु स्वतन्त्रः प्रतीयसे स त्वं तथा न भवसि । ये चान्ये स्वतन्त्राः प्रतीयन्ते तेन्ये तथा न भवन्ति।

Digitization by Arya Samaj Charitable Foundation, Chennai

प्राप्यप्रापकभावेन च द्वैतस्य स्फुटत्वात् ॥ ८७ ॥

यश्चाहं त्वया स्वतन्त्रः प्रतीये तादृशो नाहं, किं तु सर्वे वयमीश्वरेण व्याप्यास्ततो नार्थान्तराणि भवामः। सर्वव्यवहारगोचरः स एवैको निरूपणीय इति व्यापकाद्वैतभावनां धारयेति। अयं भावः-जीवानां गमनादीनि विद्यमानान्यपि तद्व्याप्यत्वात्तदीयान्येव यथा राजगमनाद्यधीनानि सेनागमनादीनि राजकीयानीत्युच्यन्ते तद्वत्। यद्यपि वासुदेवस्य विभुत्वाद्गमनादीनि न सम्भवेयुस्तथाप्यविचिन्त्यशक्त्या तानि भवन्तीति तदीयैस्तैर्जैत्रानि तान्येकीकृतानीति। एवमेवोपसंहरति-एवमेकमिदं ब्रह्मन्नभेदि सकलं जगत्। वासुदेवाभिधेयस्य स्वरूपं परमात्मन इति। स्वरूपमिति।तद्व्याप्यत्वादिनेति बोध्यम्। उपसंहारोपीति। ऋभुनिदाघसंवादेन स्वोक्तं प्रपोष्य भरतो रहगणमाह-तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबान्धवः। भवसर्वगतं जानन्नात्मानमवनीपते॥ सितनीलादिभेदेन यथैकं दृश्यते नभः। अन्तर्दृष्टिभिरात्मापि तथैकः स पृथक् पृथक्॥ एकः समस्तं यदिहास्ति किञ्चित्तदच्युतो नास्ति परं ततोऽन्यत्। सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहमिति। एवमर्थः-आत्मानं वासुदेवाच्युतशब्दितं परेशम्। स चात्मैक एव। तत्र सत्त्वादिगुणकार्यादेव मनुष्यादिभावप्रतीत्या भेदबुद्धिर्भ्रान्तिरेव। यथैकस्मिन्नभसि सितनीलादिमुदिरधर्मारोपणेन वैविध्यबुद्धिरवैदुषी। स तु चित्सुखवपुरित्यर्थः। एकः सोऽच्युतः समस्तं तद्व्याप्यत्वादिना सर्वं ततो नातिरिक्तमित्यर्थः। भेदमोहं स्वातन्त्र्याभिमानरूपं मौढ्यं त्यजेति व्यापकाद्वैतभावनोपदिष्टा ॥ ८७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

यत्पुनरुक्तमथ योऽन्यामित्यादिभिर्भेदग्राहिणो निन्दनाद्भयशंसनाच्च न भेदे शास्त्रतात्पर्यमिति । नैतत् सुपेशलं, भेदे तत्तात्पर्यस्य प्रागुक्तेः । अथेत्यत्र हि सकामसेवकत्वात् कर्मजडो निन्द्यते न तु स्वस्मादभ्यधिकत्वेन स्वामिनो भेदं विद्वान्निष्कामतद्भक्तोऽपि तस्य

खाण्डिक्यकेशिध्वजप्रसङ्गेपि केचित् केवलाद्वैतमुद्गिरन्ति तन्निरस्यति उत्तरत्रेत्यादिना । षष्ठेंऽशे कथास्ति । आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने । विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा । आत्मनः स्वस्य भावं स्वभावमात्मनि स्वस्मिन् भावं विद्यमानतां वेत्यर्थः । न त्वात्मैक्यम् । न ह्याकर्षकस्वरूपतापत्तिराकृष्यमाणस्य दृश्यते । विज्ञानं प्रापकं प्राप्यं परे ब्रह्मणि पार्थिव । प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः । क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज । निष्पाद्यं मुक्तिकार्य्यं वै कृतकृत्यो निवर्तत इत्युत्तरवाक्याच्च । परमात्मध्यानाज्जीवस्तद्वत्प्रक्षीणाशेषभावनः । ब्रह्मभावना कर्मभावनोभयभावना चेति भावनात्रयेण शून्यः प्रापणीयो भवतीति प्राप्यप्रापकभावेनात्र भेदोऽवश्यं वाच्यः । तद्भावभावमापन्नो यदाऽसौ परमात्मना । भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् । विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणोभेदमसन्तं कः करिष्यतीति । तस्य ब्रह्मणो भावः स्वभावादिर्न तु तदैक्यं द्वितीयभावशब्दासङ्गतेर्विज्ञानं प्रापकमित्याद्यनन्तरपूर्वोक्तविरोधादाकर्षकदृष्टान्तविरोधाच्च । ब्रह्मस्वभावः खलु प्रक्षीणाशेषभावनत्वरूपस्तेन ध्यातेन भावं परिशुद्धिं गत

Digitization by Arya Samaj Charitable Foundation, Chennai

जुष्टमित्यादिना स्तुतत्वात्। यदेवेहेति। ब्रह्मव्यूहेषु भेददर्शिनो यदा ह्येवेति। ब्रह्मनिष्ठाविच्छेदकर्तुश्च संसृतिभयमुक्तम् ॥ ८८ ॥

एतेन त्वं वा इत्यादिकमपि व्याख्यातम्। उपासकानामित्यादौ च न निर्विशेषत्वं श्रद्धेयं, उत्तरत्राऽऽत्ममूर्तये

इत्यर्थः। तदायमभेदी भवति कर्मरूपाज्ञानमूलदेवादिदेहकृतविजातीयभेदशून्यो भवतीत्यर्थः। एतद्विवृणोति विभेदेति। देवादिदेहकृतविजातीयभेदजनके कर्मरूपाज्ञाने ब्रह्मस्वभावध्यानेनात्यन्तिकं नाशं गते सति हेत्वभावादसन्तं ब्रह्मणः सकाशादात्मनो जीवस्य तद्भेदं कः करिष्यति न कोपीत्यर्थः। सजातीयो भेदस्तु तदाप्यस्तीति ॥ ८८ ॥

एवं श्रीविष्णुपुराणे शङ्कां निर्धूयाऽवशिष्टाः काश्चिच्छङ्का निर्धुनोति यदित्यादिना। अथ योन्यामित्यादिवाक्यात् पूर्वं तद्वै तत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेत्यहमिति स्ववृत्तिहेतुं ब्रह्म विमृश्य तदायत्तवृत्तिकत्वादिना मन्वादिप्रधानं जगत्तदात्मकमुपदिश्य तद्बुद्धिस्थैर्य्याय तादृशज्ञानविधुरः कर्मजडो विनिन्द्यतेऽथेति। यो हि देवतामन्यां स्वप्रवृत्त्यहेतुं स्वाव्यापिकां कर्माङ्गमात्रतयोपकारिणीं मत्वोपास्ते न स वेद नासौ तत्त्ववित्। यथा पशुरिति। लौकिकः पशुर्यथा लोकादुपात्तजीवनस्तस्य परिषेव्य नित्यं क्लिश्यति, तथा देवोपकृतो देवभृत्य इति तस्य पुरुषार्थविषणाविरहाः देवाः खलु तन्निषेवा-

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मानन्दैकविग्रह इति सविशेषत्वश्रवणात् । वेदाहमित्यादा'वादित्यवर्णं तमसः परस्ता'दिति श्रुतेश्च । तस्मात् प्राकृतरूपमादाय तत्सङ्गमनीयम् ॥ ८९ ॥

यत्तु भेद आविद्यको मोक्षे तदभावादित्युच्यते तद्भ्रमसाभिधानं—'निरञ्जनः परमं साम्यमुपैती'त्यादिवाक्यै-

---

भिकाङ्क्षिणस्तज्ज्ञानं प्रतिव+तीति तत्रैव विश्रुतम् । ब्रह्म तु स्वयमनन्तानन्दपूर्णतया परिनिःस्पृहं सर्वसुहृत्त्वान्निर्हेतुकोपकारि स्वज्ञानस्वरूपयोरुपलम्भकम् । तद्भक्तश्च तद्भक्त्यैव पूर्णस्तदेवेच्छति, न तु ततः किञ्चिदन्यदिति स्तुतियोग्यत्वम् । सकामसेवकत्वादित्यत्र तत्पुरुषः कर्मधारयश्च समासः । एवं निष्कामतदित्यत्र च यदेवेहेत्यत्र ब्रह्माविर्भावेषु जीवेष्विव प्रतीतो भेदः प्रत्याख्यायते, न तु ब्रह्मजीवयोर्भेदेपि तस्य तात्पर्य्यलिङ्गैर्दर्शितत्वात् । यदा ह्येवेत्यत्रान्तरशब्देन ब्रह्मनिष्ठा या विच्युतिरुच्यते सा खल्वेतदनन्तरवाक्ये प्रतिष्ठाशब्देनोक्ता । तस्मात् सर्वात्मना राजन् भगवान् हरिरीश्वरः । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयमित्यत्राजस्तं तन्निष्ठताऽभयहेतुरुपदिश्यते । तद्विच्छेदे तु संसृतिभयमस्तीत्युक्तं श्रीशुकेन ॥ ८९ ॥

एतेनेति । यो यद्वृत्तिहेतुर्यद्व्यापी च ततस्तद्वर्तिनस्तद्व्याप्याश्च नान्य इति प्राणसंवादादिभिः प्रतिपादनेनेत्यर्थः । श्रीरामतापनीयं वाक्यं समादधाति उपासकानामिति । सविशेषेति । मूर्त्तत्वोक्तेरित्यर्थः । वेदाहमिति । पुरुषसूक्तेपि ब्रह्मणो रूपवत्त्वं प्रस्फु-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्तत्र तस्योदाहृतत्वात् । 'कर्मक्षये याति स तत्त्वतोन्यः' 'सोऽश्नुते सर्वान् कामा'नित्यादिवाक्याच्च । तस्मात्पारमार्थिको जीवेशभेदः ॥ ९० ॥

अत एव स्मरन्ति—'यथेश्वरस्य जीवस्य सत्यो भेदो विनिश्चयात् । एवमेव हि मे वाचं सत्या कर्तुमिहार्हसि ॥ यथेश्वरश्च जीवश्च सत्यभेदौ परस्परम् । तेन सत्येन मां देवास्त्रायन्तु सह केशव' इति ॥ ९१ ॥

इति सिद्धान्तरत्नाख्ये भाष्यपीठके विधान्तरेण केवलाद्वैतनिरासः षष्ठः पादः ॥ ६ ॥

टम् । तस्मादिति । प्राकृतं विराड्रूपमित्यर्थः । तदित्युपासकानामिति वाक्यम् ॥ ९० ॥

मोक्षकालिकभेदवाक्यानि प्रागुक्तानि श्रुत्वापि चिन्मात्रैक्यवादी वा धैर्य्यमालम्ब्य प्रत्यवतिष्ठते यश्चिति । मोक्षे तदिति । मोक्षकालिकभेदावेदकवाक्याभावादित्यर्थः । कर्मेति । श्वेताश्वतराणां वाक्यम् । स जीवः कर्मक्षये सति ब्रह्म याति । कीदृश इत्याह तत्त्वतोन्यस्तदापि वस्तुतो ब्रह्मभिन्न इत्यर्थः । वाचनिकं भेदस्य सत्यत्वमुदाहरति यथेति ॥ ९१ ॥

इति श्रीगोविन्दभाष्यपीठकटिप्पण्यां षष्ठस्त्रिविक्रमपादो व्याख्यातः ॥ ६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सप्तमः पादः।

अत्राहुः—'एकमेवाद्वितीयं' 'सत्यं ज्ञानमनन्त'मित्यादिषु शक्त्यादिविशेषाप्रतीतेः सजातीयादिभेदत्रयशून्यं ज्ञानमेव परं तत्त्वमिति प्रतीयते। तस्य च तर्ह्येवैकादिपदलब्धेन भेदत्रयाभावेनानन्तत्वं सत्यत्वं चोपपद्येत यदि ज्ञानमित्येतद्भावसाधनं भवेत्। इतरथा कारकसाधने ज्ञातृज्ञेयतत्साधनैः प्रविभागे सान्तत्वमेव स्यात्। तथा कर्तृसाधने ज्ञानस्य कर्तृतया विक्रियमाणस्य करणसाधनतैव वास्यादिवज्जडतया प्रतिपन्नस्यासत्यत्वं च स्यात्। तस्माद्भावसाधनमेव तत्। तथा च

पूर्वपादेन मायिनः सिद्धान्तो निरस्तः। अथ तस्य कुटिलाः काश्चन युक्तीश्छेत्तुं नन्दकपादोऽयमारभ्यते। स एवमुद्गिरति। एकमित्यादिवाक्यादखण्डं ज्ञानमात्रं ब्रह्म प्रतिबुध्यते। ज्ञानमिति। भावार्थकल्युट्प्रत्ययात्। स्वरूपपरत्वादिदं वाक्यं बलवत्। यः सर्वज्ञ इत्यादिवाक्यं तु गुणपरत्वाद् दुर्लभमिति स्वरूपपरेण बलवता वाक्येन परतत्त्वं ज्ञानमात्रं ग्रहीतव्यमित्येतदनुवदत्येकमेवेत्यादिना। शक्त्यादीत्यादिपदाद् गुणलीले ग्राह्ये। सान्तत्वं सखण्डत्वम्। इतरथा कारकेति। जानातीति ज्ञायते इदमनेन वेति

Digitization by Arya Samaj Charitable Foundation, Chennai

संविदनुभूतिज्ञप्तिपर्य्यायं ज्ञानं नाम तत्त्वं निर्विशेषमेव। तदन्यत् सर्वं मिथ्याभूतमेव। 'नेह नानास्ति किञ्चने'-त्यादेः। ज्ञानस्वरूपो भगवान्। यतोऽसावशेषमूर्तिर्न तु वस्तुभूत इत्यादेश्चेति चेत् ॥ १ ॥

नैतत् पटुतरं, भावरूपस्यापि तस्य तत्त्वस्य गले गृहीतन्यायेन शक्तिस्तावदवश्यमङ्गीकरणीया जगदादिकार्यदर्शनान्यथानुपपत्त्या तस्या अवश्यम्भावात्। न चार्थापत्तिमात्रं तत्र मानं, 'य एको वर्णो बहुधा शक्तियोगा'दित्यादिश्रुतिस्मृतिभ्यः। नन्वस्तु शक्तिः किं तु कल्पितत्वान्मिथ्यैव सेति चेन्मैवं भ्रमितव्यम्। 'परास्य श-

---

ज्ञानमिति कर्तरि नन्द्यादित्वाल्ल्युः। कृत्यल्युटो बहुलमिति सूत्रे बहुलमिति योगविभागेन कर्मण्यपि ल्युट्। करणाधिकरणयोश्चेति करणे सः। असत्यत्वं च स्यादिति। यद्विकारि जडं तदसत्यमित्यर्थः। तदन्यत् सर्वं मिथ्येति। कल्पितत्वादिति भावः। नेह नानेत्यादिवाक्याच्चैतद्व्याख्यानं बलीति भावः ॥ १ ॥

निराकरोति नैतदिति। भावरूपस्येति। ज्ञाधातोर्भावे ल्युटि सिद्धस्य प्रकाशलक्षणस्यार्थस्येत्यर्थः। जगदादीति। दिवाऽभुञ्जानस्य यथा पीनत्वमनुपपन्नं सत् स्वोपपत्तये तस्य रात्रिभोजनं कल्पयत्येवं जगदादिकार्य्यं दृश्यमानं ब्रह्मणः शक्तिं विनाऽनुपपन्नं सत् स्वोपपत्तये तस्य शक्तिं कल्पयतीति दिवा ऽभु-

Digitization by Arya Samaj Charitable Foundation, Chennai

क्ति'रित्यादिना 'शक्तयः सर्वभावाना'मित्यादिना च तस्याः स्वाभाविकत्वोक्तेः कल्पकानिरूपणाच्च । नाप्युक्तयुक्त्या सान्तत्वं 'यच्च किञ्च जगत् सर्व'मित्यादौ बहिरन्तश्च व्याप्तिश्रुतेः। 'तिलेषु तैलं दधिनीव सर्पि'रिति सर्वकर्मिकां तां प्रत्याययितुं दृष्टान्तः । न च कर्त्रादिसाधने सति विकाराद्यापत्त्या तस्यासत्यत्वप्रसङ्गः ज्ञानरूपस्यैव तस्यातर्क्यस्वरूपशक्त्या कर्तृत्वादि भजमानस्यापि स्वरूपसामर्थ्यमप्रच्युतं चकास्तीति श्रुतिसिद्धत्वात् ॥ २ ॥

ननु ज्ञातृत्वं नाम ज्ञानक्रियाकर्तृत्वं तच्च विकाररूपं जडमसत्यमेव,अहं विज्ञातेत्यमहर्थाभेदेन प्रतीतेः। अ-

---

ज्ञानस्य रात्रिभोजनमिव जगदादिहेतोर्ब्रह्मणः शक्तिर्गले निपततीत्यर्थः। कल्पकेति। ब्रह्मणि शक्तेः कल्पको वक्तव्यः। ब्रह्म चेद्वैशिष्ट्यापत्तिः । जीवोऽथवा माया चेदात्माश्रयतापत्तिरिति। नाप्युक्तयुक्त्येति। ज्ञानस्य कर्तृकर्मकरणसाधनैः प्रविभाग इत्यनयेत्यर्थः। प्रविभागः परिच्छिन्नत्वम् । तिलेष्विति श्वेताश्वतराः । तां व्याप्तिम् । न चेति। कर्तृसाधने विकारः करणसाधने जडतेति युक्त्या सत्यत्वं मिथ्यात्वं च स्यादिति नेत्यर्थः । श्रुतिसिद्धत्वादिति। स विश्वकृद्विश्वकृदात्मयोनिर्निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्याद्या श्रुतिर्विश्वकर्तुर्ब्रह्मणो निर्विकारत्वं दर्शयति हि ॥२॥

अत्र शङ्कते—ज्ञातृत्वं जडमेव, अहं जानामीति जडाहङ्काराभेदेन प्रतीतेः। अहङ्कारस्तु जड एव, महत्तत्त्वोपादानकत्वात् । अतो

Digitization by Arya Samaj Charitable Foundation, Chennai

हमर्थस्त्वनात्मैव स्थूलोऽहमित्यादिदेहाभेदेन प्रत्ययात् तं विनापि सुषुप्त्यादावात्मानुभवदर्शनाच्च। तस्मादहङ्काराद्देहवच्च विज्ञातृत्वमात्मनि शुद्धेऽध्यस्तमिति चेत्, मन्दमेत। ज्ञानगुणाश्रयत्वमेव ज्ञातृत्वं, ज्ञानं तु नित्यस्यास्यौत्पत्तिकधर्मत्वान्नित्यम्। श्रुतिश्च 'परास्य शक्ति'रित्याद्या 'अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मे'त्याद्या च। ज्ञानरूपस्य ज्ञानाश्रयत्वं तु प्रकाशरूपस्य रवेः प्रकाशकत्ववदविरुद्धमिति भावसाधनता-

---

नात्मत्वं तस्यासन्देहम्। तत्त्वे युक्त्यन्तरं चाह तं विनेति। अहङ्कारं विनापि सुषुप्तावात्मानुभवः। सन्ने यदिन्द्रियगणेहमिव प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्न इति वचनात्। अहङ्कारस्यात्मत्वे तदा तद्विनाभावानुपपत्तिः। निगमयति तस्मादिति। निराकरोति मन्दमिति। ज्ञानेति। न खलु मनःसंयोगेनात्मा ज्ञानं जनयतीति ज्ञानंक्रियाकर्तृत्वं ज्ञातृत्वं किं तु ज्ञानगुणाश्रयत्वमेव तदिति मनस्तु तदभिव्यञ्जकमस्तु। ननु ज्ञानं जन्यं कुतो नाऽङ्गीक्रियते तत्राह ज्ञान तु नित्यस्येति। परास्येति। परात्मनो ज्ञानं नित्यमुच्यते। अविनाशीति तु जीवात्मनः। अस्यार्थः-अरे मैत्रेयि अयमात्मा जीवः स्वरूपतोऽविनाशी भवति। गुणतश्च यथेत्याह अन्विति। न चानुच्छित्तिरेव धर्मोस्येति समासादविनाश्रितत्वमर्थः, पुनरुक्तिप्रसङ्गात्। ज्ञानरूपस्येति। सत्ता सतीत्यादौ सत्तादीनां सत्ताद्याश्रयत्ववज्ज्ञानस्य ज्ञानाश्रयत्वं बोध्यम्। एवं चेति। वि-

Digitization by Arya Samaj Charitable Foundation, Chennai

पि न विरुध्यते। एवं च 'विज्ञातारमरे केन विजानीया'-दित्यादिश्रुत्यविरोधः । तस्माज्ज्ञानादिशक्तिमदेव ब्रह्म न स्वनुभूतिसंवित्पर्यायज्ञानमात्रम् ॥ ३ ॥

अनुभूतित्वं नाम वर्तमानदशायां स्वसत्तयैव स्वाश्रयं प्रकाशमानत्वन्तर्येव स्वविषयसाधनं वा भवतु । तत्रोभयत्र तन्मात्रवादिनः शक्तिमत्त्वप्रसङ्गः । विषयप्रकाशनत्वेनैव तस्याः स्वयम्प्रकाशत्वं त्वया साधितम् । तत्त्वस्वभावविरहे तत्त्वासिद्धेरनुभवान्तरागोचरत्वाच्च तुच्छतैव स्यात् ॥ ४ ॥

ज्ञातारमीशम् । आदिशब्दाज्ज्ञानज्ञातृत्वबोधकं कर्त्ता बोद्धा विज्ञानात्मा पुरुष इति वाक्यं ग्राह्यम् ॥ ३ ॥

केवलाद्वैतिमतेनाप्यनुभूतिस्वरूपस्य ब्रह्मणः सधर्मकत्वं ग्राहयति अनुभूतित्वमिति । स्वाश्रयमनुभवितारं प्रति । तयैवेति । स्वसत्तयैव घटादिप्रकाशकत्वं नेत्यर्थः । उभयप्रदक्षिणद्वये तन्मात्रवादिनः केवलानुभूतिमानिनः । शक्तिमत्त्वेति । स्वसत्तया स्वाश्रयं प्रति प्रकाशमानता स्वविषयप्रकाशता वा तत्र शक्तिरागतेत्यर्थः । न चेदं त्वया शक्यमपलपितुमित्याह विषयेति । तस्या अनुभूतेः । त्वया केवलानुभूतिवादिना । तत्त्वेति । अनुभूतेर्विषयप्रकाशकत्वस्वभावविरहे सति स्वप्रकाशकत्वासिद्धेरित्यर्थः । तुच्छतैव जडता खपुष्पतुल्यता च स्यादित्यर्थः ॥ ४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु बोधस्वरूपायास्तस्या न कोपि बोध्यो धर्म इति चेत्। न, त्वयैव नित्यत्वस्वयम्प्रकाशत्वादिधर्माणां प्रमाणसिद्धानां स्वीकृतत्वात्। न च तेषामनित्यत्वजडत्वाद्यभावतात्पर्य्यादिष्टसिद्धिः, तथाभूतैरपि चैतन्यधर्मैरिष्टव्याघातात्। तस्यां स्वरूपातिरेकेण नानित्यत्वादिप्रत्यनीकत्वमित्यभावरूपस्य धर्मस्यानङ्गीकारे तत्तन्निषेधोक्त्या किमपि नोक्तं स्यात् ॥ ५ ॥

किञ्च सा सिद्ध्यति न वा । आद्ये सधर्मकता तस्याः प्राप्ता। अन्त्ये खपुष्पादिवत्तुच्छतापत्तिः। सिद्धि-

---

नन्विति। तस्याः स्वाश्रयं प्रति प्रकाशमानत्वविषयप्रकाशत्वं कश्चिद् बोध्यो धर्मो नास्ति, निर्धर्मिका सेत्यर्थः। प्रमाणसिद्धानामिति। नित्यो नित्यानां सत्यं ज्ञानमनन्तमित्यादीनि प्रमाणानि प्रोच्य साधितानामित्यर्थः। न च तेषामिति। अतद्व्यावृत्तिः शब्दार्थ इति मतेन नित्यत्वादिधर्माणामनित्यत्वाद्यभावरूपत्वादनुभूतिमात्रमिष्टं सिद्धमित्यर्थः। तथाभूतैरभावात्मकैः। तस्यामिति। अनित्यत्वादिनिषेधैश्चेदनित्यत्वाद्यभावो नानीयते तर्हि तदुक्तिर्व्यर्थेत्यर्थः ॥ ५ ॥

अथानुभूतेर्विधान्तरेण सधर्मकत्वं साधयति किं चेति। तद्वादिनं पृच्छति सेति। साऽनुभूतिः। सिद्ध्यति सिद्धिं विन्दतीत्यर्थः। आद्ये सधर्मकतेति। सिद्धिसत्त्वादिति भावः। अन्त्ये खपुष्पेति। स्वरूपाभावादेवेति भावः। तद्वादी पुनः प्रत्यवतिष्ठते

Digitization by Arya Samaj Charitable Foundation, Chennai

रेव सेति चेत् कस्य कं प्रतीति वाच्यम्। यदि कस्यचित् कश्चित्प्रति सा तर्हि न सिद्धिः। सिद्धिर्हि पुत्रत्वमिव कस्यचित् कश्चित्प्रति भवति । अनुभूतेरिति चेत्, तर्ह्यनुभूतिसिद्ध्योर्भेदावगतेः सा तस्याः शक्तिरेवेत्यवसीयते, न तु स्वरूपमात्रम् । तदेवमागतं ज्ञानमात्रस्वरूपेऽपि स्वाभाविकज्ञातृत्वनित्यत्वादिधर्मकत्वात् ॥ ६ ॥

यत्तु स्थूलोहमिति देहाभेदेन प्रतीतेः सुषुप्तौ तद्विरहितात्मप्रतिपादनाच्च देहवदहमर्थस्यानात्मकत्वमुक्तं तन्न, तस्यैव शुद्धात्मत्वात् । तथा हि न तावदहमर्थोऽसौ युष्मत्प्रत्ययगोचरो जडो भवितुमर्हति अस्मत्प्रत्ययगो-

---

सिद्धिरेवेति । सानुभूतिः सिद्धिरेव स्वयं, न तु त्वयापि सिद्धेः सिद्धिः शक्या वक्तुमनवस्थाप्रसङ्गादिति भावः । तं प्रति पृच्छति कस्य कं प्रतीति । सानुभूतिः कस्य वस्तुनः सिद्धिः कं कामुकं प्रति सिद्धिरिति त्वया वक्तव्यमित्यर्थः । तद्वादिना वक्तव्यं स्वयं प्रकटयंस्तस्याः सिद्धित्वं निराकरोति यदि नेत्यादिना । न खल्वनुभूतिः कस्यचिद्वस्तुनः सिद्धिर्न वा कश्चित् कामुकं प्रति सा सिद्धिरित्यर्थः ॥ ६ ॥

पूर्वोक्तां शङ्कामपाकरोति यत्त्विति । तद्विरहितेति । अहङ्कारशून्यात्मनिर्णयादित्यर्थः । तथैवेत्यहमर्थस्य । न तावदिति । आत्मास्मदर्थः, अनात्मा युष्मदर्थ इति केवलाद्वैतिनां परिभाषा बोध्या ।

Digitization by Arya Samaj Charitable Foundation, Chennai

चरत्वात् स्वस्मै प्रकाशमानत्वाच्च। यः खलु स्वस्मै प्रकाशते स त्वहमित्येव प्रकाशते। यस्त्वहमिति न प्रकाशते नासौ स्वस्मै प्रकाशते यथा घटादिः। तस्मात् स्वं प्रति स्वसत्तयैव सिद्ध्यन्न जडोऽहमर्थ एवात्मा। यो ह्यहं जानामीति प्रतीतिसिद्धं ज्ञातारं युष्मदर्थं ब्रूयात्तस्य तु प्रसूर्मे वन्ध्येति व्याहतार्थो व्याहारः। अस्यैवाहमर्थस्य ज्ञातुः केवलं ज्ञानं सुखं चावभासते। अहं जानाम्यहं सुखीति ज्ञानस्वरूपस्यापि तस्य ज्ञातृत्वं प्रकाशवस्तुनः सूर्यादेः प्रकाशकत्ववदविरुद्धमित्यभ्यधायि प्राक् ॥ ७॥

ननु ज्ञानमात्र आत्मन्यहमर्थोऽध्यस्त इति चेन्न, अध्यासकाभावात्। अनहङ्कारस्य ज्ञानमात्रस्य जडस्य

अहमर्थस्यात्मत्वादेव स्वप्रकाशत्वमिति विशदयति यः खल्विखादिना। अहमर्थजडत्ववादिनमुपहसति यो हीति। युष्मदर्थमनात्मानम्। प्रसूर्जननी। यद्यहमर्थो घटवदनात्मा स्यात्तर्हि ज्ञानित्वं सुखित्वं च तस्य न स्यादित्याह अस्येवेति। ननु सत्यं ज्ञानमनन्तं विज्ञानं यज्ञं तनुते इत्यादौ ज्ञानस्वरूपत्वेन श्रुतस्यात्मनो ज्ञातृत्वं कया युक्त्येति चेत् सत्तासतीत्यादि। दृष्टिविशेषबलेनेति भावेनाह ज्ञानस्वरूपस्येति ॥ ७॥

अथ निरस्तोपि तद्वादी विधान्तरैः प्रतिप्रवृत्तो निरस्यते नन्वित्यादिना। अध्यासे तदाधारः शुक्तिकादिरध्यासकश्च सान्तः

Digitization by Arya Samaj Charitable Foundation, Chennai

चाहङ्कारस्य तत्कर्तृत्वं न सम्भवति। न च तस्मिन्नहमर्थे ज्ञानच्छायापत्तिः द्वयोर्नैरूप्यात्। न चाऽयःपिण्डे वन्हि-सम्पर्ककृतौष्ण्यवज्ज्ञानमात्रसम्पर्ककृतं ज्ञातृत्वं तस्मिन्नह-मर्थेमन्तव्यमौष्ण्यवत्तद्धर्म्मसम्प्रतिपत्तेः। नन्वसावहङ्कारः स्वानुस्यूतं तज्ज्ञानमभिव्यञ्जयन् ज्ञातृत्वं प्राप्नोतीति चेत्। मैवं,अहङ्कारादिधर्मिणस्तस्य धर्मत्वानुपपत्तेः। स्वयं ज्योतिषो ज्ञानस्य जडात्मकाहङ्कारव्यङ्ग्यत्वायोगात्। यदुक्तम्-'शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः। स्वयं

करणश्चेतनो ज्ञायते। तत्रानुभूता बाधारेकोऽहङ्कारमध्यस्यति। राजपुत्रधीवरन्यायेनानुभूतिरेवाध्यस्यतीति चेन्न राजपुत्रवत्तस्या अहङ्काराभावात्। अहङ्कार इति चेन्न तस्य घटादिवज्जडरूपत्वात्। ननु जडेऽप्यहङ्कारेनुभूतेश्छायया तप्तायोन्यायेन सचेतनत्वापत्तौ स्वाध्यासकत्वं नानुपपन्नमिति चेन्मनोमोदकभक्षणमेतदिति भा-वेनाह न च तस्मिन्निति। स्फुटार्थम्। न चेति। ननु मास्त्वनुभूते-रहमर्थेच्छाया तस्याः सम्बन्धस्तु तस्मिन्नवर्जनीय एव। ततश्च तत्सम्बन्धेनैव तस्मिन् सचेतनत्वं स्यादिति चेन्न, कुत इत्याह औष्ण्यवदिति। औष्ण्यं यथा वह्नेः स्वाभाविको धर्म एवं ज्ञातृ-त्वमनुभूतेरिति तवानभिमतत्वादित्यर्थः। नन्वसाविति। ननु ज्ञातृ-त्वमनुभूतेर्धर्मो नेति सत्यं, किन्त्वेवमस्तु-अहङ्कारः स्वान्तर्गतामनु-भूतिमभिव्यञ्जयन् ज्ञातृत्वं लभतामिति। मैवमेतत्, अनुभूतिः खलु स्वेतरेषां सर्वेषामधिष्ठानं धर्मिणी, तामहङ्कारस्य धर्मं वदन्नप-

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्योतिषमात्मानं न व्यनक्तीति युक्तिम'दिति। तदायत्तप्रकाशेनाहङ्कारेण तस्य प्रकाश्यत्वासम्भवः ॥ ८ ॥

ननु मिहिरकिरणगणस्य स्वाभिव्यङ्ग्यपाणितलाभिव्यङ्ग्यत्ववत् ज्ञानाभिव्यङ्ग्याहङ्कारव्यङ्ग्यत्वं ज्ञानस्य भवेदिति चेत्। न तस्य पाणितलाभिव्यङ्ग्यत्वाभावात्। पाणितलप्रतिहतगतिरसौ बाहुल्यात् स्वयमेव स्फुटतरमुपलभ्यते इति तद्बाहुल्यमात्रहेतुत्वात् पाणितलस्य

सिद्धान्तीभवसीति भावः। उपसर्जनत्वं हि धर्मत्वं सर्वाभ्युपगतम्। अपि च न खलसूच्यत्वमभिव्यङ्ग्यत्वं किं तु प्रकाश्यत्वमेव। तयानुभूतिर्न संभवेदित्याह स्वयमिति। शान्तेति। शान्ताङ्गारो यथादित्यं न प्रकाशयत्येवं जडात्मकोऽहङ्कारः स्वयंज्योतिषमात्मानं केवलानुभूतिलक्षणं न प्रकाशयतीति युक्तमिदमित्यर्थः। तदायत्तेति। अहङ्कारो ह्यनुभूत्यधीनप्रकाशः। अनुभूतिस्तु स्वप्रकाशा। घटसूर्याविह दृष्टान्तौ ॥ ८ ॥

लज्जितस्तद्वादी स्थूलेन युक्त्याभासेन प्रतिप्रवर्तते नन्विद्यादिना। यथा सूर्यांशवः स्वप्रकाश्येन करतलेन प्रकाश्या वीक्ष्यन्ते तथानुभूत्या प्रकाश्येनाहङ्कारेण तदन्तर्गता सा प्रकाश्या भवेदित्यर्थः। एवं कुत इत्याह तस्येति। मिहिरकिरणगणस्येत्यर्थः। पार्थिवप्रधानं हि पाणितलं तैजसप्रधानस्तद्गुणः कथमेतस्य तेन प्रकाश्यता शक्या वक्तुमिति भावः। तर्हि प्रतीतिः कथमिति चेद्धान्त्येत्याह पाणितलेति। असौ तद्गुणः। तिमिमयति तस्मादिति।

Digitization by Arya Samaj Charitable Foundation, Chennai

न तद्व्यञ्जकभावः। तस्मात् स्वत एव ज्ञातृतया सिद्ध्यन्नहमर्थ एव प्रत्यगात्मा न तु ज्ञानमात्रं 'सुखमहमस्वाप्सं न किञ्चिदवेदिष'मिति सुप्तोत्थितस्य परामर्शात्। तत्राप्यसमर्थता सुखिता ज्ञातृता चावगम्यते। तदा तमोगुणाभिभवात् स्फुटतरा नावगतिः। इत्थं च देहवदहमर्थस्यानात्मत्वं परिहृतम्। न हि सुप्तो देहस्तद्विरहितो वेह प्रतीयते ॥ ९ ॥

एष चाहम्भावो न संसृतिहेतुः शुद्धस्वरूपानुबन्धित्वात्, किन्तु तादृशतयाऽवगतिस्ततो मोचयत्येव तद्विरो-

॥ ०९ ॥

उक्तादर्थप्रचाद्धेतोः। सुखमिति। सुखं यथा स्यात्तथाऽहमस्वाप्समिति सुखित्वमहमर्थत्वं च स्फुटम्। न किञ्चिदवेदिषमिति। तदुभयेतरस्य प्राकृताहङ्कारतत्कार्यश्रोत्रादिकस्य तदा विलीनत्वात्तदज्ञानं च साक्षादकार्षमिति सुखित्वादित्रिकानुभवाद्विज्ञातृत्वं च विस्फुटम्। तत्रापि सुषुप्ते जीवे। ननु सुषुप्तौ चिदेवात्मा जागरे त्वन्तःकरणेन सम्बन्धात् सुखित्वादिप्रतीतिरिति चेत्तत्राह तदेति। तमोगुणेन निद्रयाभिभवादावरणादित्यर्थः। अनुभूतमेव स्मरति नाऽननुभूतम्, अनुभवस्मरणयोरेकाधिकरणनियमात्। न हीति। सुप्तो जीवो न देहो न चाहन्ताशून्यस्तदा प्रतीयतेऽपि तु देहाद्भिन्नोहमर्थश्चेति गदितं सुष्ठु ॥ ९ ॥

एवमात्मनोहमर्थत्वमापाद्य तस्याहमर्थत्वस्य संसारहेतुत्वं निराकुर्वन्मुक्तिहेतुत्वं दर्शयति एष चेति। जीवोहमणुपरि-

Digitization by Arya Samaj Charitable Foundation, Chennai

धित्वात्। यद्ययमुपाधिरेव स्यात्तदा मुक्तौ विनश्येयमिति विजानंस्तत्कथाप्रसङ्गादपि जनोऽपगच्छेत्। निवृत्ताखिल-क्लेशोऽक्षयसुखभाक् तेजस्वी भवेयमित्येवं मोक्षकाङ्क्षिणः श्रवणादौ प्रवृत्तिः। सापि न स्यात्, अहमर्थस्यात्मनो मोक्षे विनाशभयप्राप्तेः। न च नष्टेपि मयि किञ्चिज्ज्ञान-मनुवर्तिष्यते स एवात्मेति वाच्यं, एवं प्रवृत्त्यदर्शनात् तत्र प्रमाणाभावाच्च। किं तत्र प्रमाणं वेदः साक्षी वा। नाद्यः अस्वीकारात्। न द्वितीयः तदानीं तस्य नाशात्। साक्षि-णोहमर्थत्वं प्रतिपादयिष्यते। तस्मादहमर्थो ज्ञातैव प्र-त्यगात्मेति सुस्थिरम्॥ १०॥

प्राणो विज्ञानसुखवपुः सुखी विज्ञाता प्राकृताहङ्कारेन्द्रियशून्यो-हमित्येवंलक्षण इत्यर्थः। ततः संसृतेः। तद्विरोधित्वादिति। ब्राह्मणोहं गौरोहमिन्द्रियवानहमज्ञोहमिति प्राकृताहङ्कार-विमर्दित्वादित्यर्थः। विपक्षे दोषमाह यद्ययमिति। जीवो-हमणुरहमित्याद्युक्तलक्षणोहम्भावो यद्युपाधिर्महत्तत्त्वजातः स्यादि-त्यर्थः। अपगच्छेत्पलायेत। निवृत्तेति। अहमर्थनये च मुक्तिसाध-नेषु मुमुक्षोः प्रवृत्तिः, सा तस्य तेषु न स्याद्यद्ययमहमर्थो मुक्तौ नश्येदित्यर्थः। न चेति। मय्यहमर्थे नष्टेपि किञ्चिन्निर्विशेषज्ञानं स्थास्यति निर्गतेपि कल्के मणिरिव शुद्ध इत्यर्थः। तत्र निर्विशेषे ज्ञाने। तदानीं मोक्षकाले। तस्य साक्षिणोहमर्थस्य। नाशस्वीका-रादित्यर्थः। तदा हि ज्ञानमात्रमेव तिष्ठेदिति त्वदीयं मतम्॥१०॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अत एव लब्धविज्ञानस्यापि वामदेवादेरेवं व्याहारः। तद्वैतस्य पश्यन्नृषिर्वामदेवः प्रतिपेदे-'अहं मनुरभवं सूर्य्यश्चेति', 'प्राणोऽस्मि प्रज्ञात्मेति', 'नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत। स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तवे'ति। परस्य ब्रह्मणश्च मुक्तमृग्यस्य 'ब्रह्म वा इदमग्र आसीत्तदात्मानमवैदहं ब्रह्मास्मी'ति, 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता' इति, 'अहं सर्वस्य प्र-

---

एवमहमर्थत्वं शुद्धात्मन आपाद्य तस्य विद्वदनुभवेन तत्त्वं दर्शयति अत एवेति। शुद्धात्मनोहमर्थत्वादेवेत्यर्थः। एवंव्याहारोऽहम्भावप्रधानं वचनमित्यर्थः। व्याहार उक्तिर्लपितं भाषितं वचनं वच इत्यमरः। तद्वेति बृहदारण्यके। एतद्ब्रह्मस्वरूपं सर्ववृत्तिप्रदं सर्वव्यापकं च पश्यन्ननुभवन् वामदेव ऋषिः प्रतिपेदे ऊचे। किं प्रतिपेदे तदाह अहमिति। मद्वृत्तिहेतुर्मय्यापि च ब्रह्मैव मन्वादिजगदित्यर्थः। एवमग्रेपि बोध्यम्। प्राणोस्मीति। छान्दोग्ये इन्द्रस्य। अस्य ब्रह्मभक्तत्वं केनोपनिषदि प्रसिद्धम्। भगवता साकं प्रतिकल्पाचरणं तु तल्लीलापोषाय तदिच्छानुगुणमेव। तथापि मन्तुक्षमणं दासानुचितकर्मत्वादिति व्याख्यातारः। नष्टो मोह इति श्रीगीतास्वर्जुनस्य। परस्येति। चकारादेवंव्याहार इति समुच्चीयते। ब्रह्म वा इति बृहदारण्यके। सेयमिति छान्दोग्ये। परमात्मरूपेयं देवता ऐक्षत विचारयामास। इमास्तेजोऽबन्नलक्षणास्तिस्रो देवताः। अनेन जीवशक्तिमतात्मनानुप्रविश्य नामरूपे

Digitization by Arya Samaj Charitable Foundation, Chennai

भव' इति, 'अहमेवासमेवाग्रे' इति चैवमादि ॥ ११ ॥

एवं सिद्धे यस्तु 'भूमिरापोऽनलो वायु'रित्यादिना क्षेत्रान्तर्भूतोऽहङ्कारः स्मर्य्यते स खल्वनात्मनि देहेऽहम्भावकारणहेतुत्वात्तथोपदिष्टो बोध्यः। तस्मादहङ्कारशब्दस्य च्विप्रत्ययमुत्पाद्य व्युत्पादनं द्रष्टव्यम्। एतदहङ्कारद्वयं च सुखमहमित्यादिश्रुतौ 'सन्ने यदिन्द्रियगणेहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्न' इति स्मृतौ च दर्शितम्। उपाध्यभिमानात्मकस्य प्रसुप्तत्वात् सुखमहमित्यनेन तदनुस्मृतिर्न इत्यनेन वाऽऽत्मनोहम्प्रत्ययेन परामर्शाच्च। अतो मामहं नाज्ञासिषमित्यस्मिन् परामर्शेप्युपाध्यभिमानिनोऽज्ञानविषयस्य नानुसन्धिरन्यस्य त्वज्ञानसाक्षिणोऽनुसन्धिरस्तीति। सुषुप्तावज्ञानसाक्षित्वेनात्मास्ते इति हि भवदीया प्रक्रिया। साक्षित्वं खलु साक्षाज्ज्ञातृत्वमेव।

व्याकरवाणीत्यग्रिमेण सम्बन्धः। स्फुटमन्यत्। ब्रह्म वा इत्यादौ भगवतोहम्भावेन स्वपरामर्शः स्वरूपानुबन्धिनैव तेन मन्तव्यः। सृष्टेः पूर्वं प्राकृतस्याहङ्कारस्यानुत्पत्तेरेवेति तत्त्ववादिनः ॥११॥

ननु चतुर्विंशतितत्त्वात्मकस्य देहस्यावयवोहङ्कारो यो भूमिरित्यादिवाक्येन पठितः। यस्तु स्वरूपानुबन्ध्यहम्भावो निरूपितः, स खलु कपोलकल्पित एव, तस्मिन् प्रमाणालाभादिति चेत्तत्राहैवमित्यादि। अयमर्थः-आत्माभिन्नोहमर्थोऽस्मच्छब्दवाच्यो

Digitization by Arya Samaj Charitable Foundation, Chennai

'साक्षाद्द्रष्टरि संज्ञाया'मिति पाणिनिस्मरणात् । स चायं साक्षी साक्षाज्जानामीति प्रतीतिसिद्धोऽस्मदर्थ एव ।मोक्षे-

---

मुख्यः । देहावयवोहमर्थस्तु मान्ताव्ययवाच्य इति वाच्ययोर्वाचकयोश्च भेदोस्ति । एष देहावयवो महत्तत्त्वजन्मा गौणः । श्यामोहं बधिरोहमित्यनहमि देहादावहङ्कारणहेतुत्वात् उत्पन्नच्चिप्रत्ययेन योऽहङ्कारशब्देन वोच्यते । अहम्भावद्वये प्रमाणमाह सुखमहमित्यादि । सन्ने यदिति । जागरे शब्दादिविषयग्राहिणेन्द्रियगणेनोपेतो जीवः सविकारः । स्वप्ने सर्वेन्द्रियोपादानेनाहङ्कारेणोपेतो वासनामयान् विषयांस्तेनैव भुञ्जानस्तादृश एव । सुषुप्तौ तु पुरीतन्मध्यस्थे ब्रह्मणि सुप्तस्य जीवस्येन्द्रियगणेऽहङ्कारेवसन्ने विलीने सति स कूटस्थो निर्विकारो भवति । कुत इत्याहाशयमृते इति । आशयस्य विकारहेतोर्लिङ्गदेहस्याभावादित्यर्थः । नन्वेवं न प्रतीयते इति चेत्तत्राह तदिति । तस्य सुखज्ञानस्वरूपस्य सुषुप्तिसाक्षिणो निर्विकारस्यात्मनोऽनुस्मृतिर्नो योगेश्वराणामस्तीति ब्रह्मविद्यया लिङ्गभङ्गाभावात् सुषुप्ते उत्थितस्य तस्य पुनर्लिङ्गयोगादानिर्मोक्षे इति भावः । वाक्यद्वयेऽहमर्थद्वयं योजयति उपाध्यभीति । अहमिति । न इति चास्मच्छब्दवाच्योहमर्थः प्रसुप्तादन्य इत्यर्थः । अतो मामिति । यस्मादहमर्थद्वयं सिद्धं तस्मादित्यर्थः । जाग्रत्परामर्शोऽयमज्ञातजातिकः कश्चित् पृष्टः प्राह मामिति । देहाद्यहम्भावस्य देहाद्यज्ञानविषयस्य नानुसन्धिः।अहमिति । देहाद्यज्ञानसाक्षिणोऽस्मदर्थस्य त्वनुसन्धिः । तदा त्वन्मतेऽप्यात्मा न निर्विशेषः किं तु ज्ञाताहमर्थ एवेति दर्शयति सुषुप्ताविति । अज्ञानसाक्षित्वेनात्माभिन्नदेहाद्यज्ञानस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

प्यहमर्थोऽनुवर्तते, इतरथा तस्मिन् प्रवृत्त्यनुपपत्तिरित्युक्तम् ॥ १२ ॥

श्रीविष्णुपुराणेऽप्यहम्प्रत्ययबोध्यताऽऽत्मनः स्वीकृता। 'यो भवान् यन्निमित्तं वा यदागमनकारणम्। तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे त्वये'त्येतद्रहगणेन पृष्टो भरतस्तावदहंशब्दस्यावक्तव्यत्वं प्राह-'श्रूयतां कोहमित्येतद्वक्तुं भूयो न शक्यत' इति। रहगणस्तु तस्यात्मनि वक्तव्यत्वमाह-'आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विजे'ति। भरतः पुनस्तत्स्वीकरोति। 'शब्दोहमिति दोषाय नात्मन्येष तथैव त'दिति। जिह्वादिषु त्वनात्मस्वहंशब्दो न प्रयोज्य इत्यनुगदति। 'अनात्मविज्ञानं शब्दो वा भ्रान्तिलक्षण' इत्यादिभिः ॥ १३ ॥

साक्षाद् द्रष्टृत्वेनेत्यर्थः। साक्षादिति। साक्षाच्छब्दादिनिः स्यात्, वादिनो विवादं यः साक्षात्पश्यति पक्षपातशून्यः सन् तस्य संज्ञायामिति सूत्रार्थः। स्फुटमन्यत् ॥ १२ ॥

अथात्मनोऽहमर्थत्वं प्रस्फुटतया प्रतिपादयति श्रीत्यादिना। यो भवानिति। द्वितीयेंशे बोध्यम्। श्रूयतामिति। स्वातन्त्र्यदोषभयात्तावदिदं निराकरणं ज्ञेयम्। वक्तुं प्रयोक्तुम्। भरत इति। तदहं-शब्दबोध्यत्वम्। अहमिति शब्द आत्मनि न दोषाय तस्यास्मच्छब्दवाच्यत्वादिति भावः ॥ १३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नन्वहमर्थश्चेदात्मा तर्हि—'यद्यन्योऽस्ति परः कोपि मत्तः पार्थिवसत्तम । तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते॥ यदा समस्तदेहेषु पुमानेको व्यवस्थितः । तदा हि को भवान् सोहमित्येतद्विफलं वच' इत्युपरितनो ग्रन्थः कथं सङ्गच्छेत । मैवं, तेनाहमर्थस्याप्यात्मनः स्वातन्त्र्याभिमानो निरस्यते ।तथा हि अहंशब्दः खल्वहं जानाम्यहं भुञ्जेऽहं गच्छामीति स्वार्थे स्वातन्त्र्यं समर्पयति। तदस्य जीवात्मनो न सम्भवति पारतन्त्र्यात्। ततश्च स्वतन्त्रः परमात्मैव तदभिमानमर्हति न तु जीवः। स तु तदायत्तवृत्तिकत्वादिना ततो नातिरिच्यते। न चैवमहमर्थत्वस्य क्षतिः, ईश्वरतन्त्रोहमित्यादिरूपस्याविरुद्धस्य तस्याऽहानात् । तदेवं सत्ययमर्थः—मत्तो मदेकाश्रयादीश्वराद्यद्यन्यः परः स्वातन्त्र्याभिमानी कोपि मल्लक्षणोऽन्यो वात्मास्ति तदा तद्व्यवच्छेदेनैषोऽहमयं त्वन्य इति वक्तुं युज्येत। न चैवमस्तीत्याह यदेति। पुमान् स्वातन्त्र्याभिमानी व्यवस्थया स्थितः,तदा को भवानिति बहुषु समानेषु निर्धाररूपं ते प्रश्नवचः सोहमिति प्रतिवचश्च विफलम्। तदेवं सति श्रूयतामित्य-

---

स्थापितमात्मनोहमर्थत्वमाशङ्क्य द्रढयति नन्वित्यादिना। मत्तो भरतादद्वितीयात् । हे पार्थिवसत्तम रहगण नृपश्रेष्ठ। तेनोपरि-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्राप्ययमेवाभिसन्धिः । तस्मात् स्वातन्त्र्याभिमानो जीवस्यात्र निरस्यते न त्वहमर्थता च । तथा सति स्वोक्ताहंशब्दव्याकोपापत्तेः ॥ १४ ॥

उपसंहारेऽपि देहाहम्भावं निरस्य शुद्धाहम्भावः स्थापितः।'समस्तावयवेभ्यस्त्वं पृथग्भूय व्यवस्थितः।कोऽहमित्येव निपुणं भूत्वा चिन्तय पार्थिव'॥ राजाहं दोष्मानित्यादिधीर्भ्रान्तिरेव, तत्तद्विलक्षणश्चित्सुखवपुरात्माहमिति तु प्रथेत्यर्थः। 'एवं व्यवस्थिते तत्त्वे मयाहमिति भाषितुम्। पृथक्कारणनिष्पाद्यं शक्यते नृपते कथम्' ॥ एवं देहादिव्यतिरेकितयाऽऽत्मतत्त्वेऽवस्थिते मया राज्ञैष शत्रुर्हत, एनमहं हनिष्यामीति भाषितुं कथं शक्यते, यदिदं पृथक्कारणेन प्राकृताहङ्कारेण निष्पाद्यम् ॥ १५ ॥

तनेन ग्रन्थेन । स्वार्थे जीवात्मन्यहमर्थे । अहानादत्यागात् । व्यवस्थया वृत्तिप्रदत्वव्यापकत्वाधारत्वरूपयेत्यर्थः । स्वोक्तेति । भरतोक्तेत्यर्थः ॥ १४ ॥

उपसंहारेऽपीति । तथा चोपक्रमोपसंहारयोरैकरूप्येण लिङ्गेनात्मनोऽहमर्थत्वं सिद्धमित्यर्थः । एवमिति । तत्त्वेऽहमर्थात्मस्वरूपे। पृथगिति । स्वरूपाहम्भावात् पृथगन्यत् प्राकृताहङ्कारणं तेनेत्यर्थः। निष्पाद्यं साध्यम् ॥ १५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

इहाऽपरे त्वेवमाहुः-सर्वभूतेषु स्थितस्यात्मजातस्य ज्ञानादिरूपेणैक्याकारत्वाद्व्यावर्तकजात्याद्यभावेन यो भवान् सोहमित्यादिप्रश्नोत्तरे न घटेते इत्याह यद्यन्योऽस्तीति। परो विलक्षणजात्यादिमान्। सर्वेषु देहेष्वेकाकारव्यक्तिनानात्वमङ्गीकृत्य तद्वैसादृश्यं निषिद्धम्, इतरथैकत्रान्यपरपदद्वयासङ्गतेरिति ॥ १६ ॥

यत्तु सन्नयमनुभूयते चेति सर्वेषां पदार्थानां सत्तानुभूतिघटितत्ववीक्षणात् सर्वत्र तयोः सिद्धिः, सन्मात्रं सत्यमनुवृत्तत्वात्। शब्दस्पर्शादिकं तु व्यावृत्तत्वादसत्यं रज्जुभुजङ्गादिवत्। रज्जुर्यथाऽधिष्ठानतयानुवृत्ता सत्या, भुजङ्गादिकं तु व्यावृत्तत्वादसत्यं तथैतद्द्रष्टव्यं, ज्ञानस्वरूपमखिलं जगदित्यादिस्मरणाच्च। सद्रूपा ह्यनुभूतिः भे-

---

व्याख्यान्तरमत्राह-इहेति। अपरे श्रीवैष्णवाः। सर्वेति। निखिलशरीरेष्वित्यर्थः। आत्मजातस्य जीववृन्दस्य। इतरथेति। एवं व्याख्यानाभावे। एकत्रात्मवस्तुनि। अन्यपरेति। तथा च पौनरुक्त्यप्रसङ्गः स्यादिति ॥ १६ ॥

केवलानुभूतिवादिनामन्यां कुदृष्टिं निराकरिष्यंस्तामाह यश्चिति। अयं शब्दस्पर्शादिलक्षणोर्थः सन् भवति तथानुभूयते चेति प्रतीतेः। शब्दादिषु सत्तानुभूतिश्चास्तीति सिद्ध्यति। ननु तद्वच्छब्दादिरप्यस्तीति भेदापत्तिस्तत्राह सर्वत्र सन्मात्रं सत्यमिति।

Digitization by Arya Samaj Charitable Foundation, Chennai

दाङ्गीकारेऽनवस्थानात्। स्वतःसिद्धां चानुभूतित्वात्। परतस्तत्सिद्धौ शब्दादिवज्जाड्यप्रसङ्गः। न चोत्पत्तिविनाशौ तस्याः शक्यौ वक्तुमसाक्षिकयोरसिद्धेः। न च सैव तयोः साक्षिणी स्वीययोस्तयोः स्वेनैव ग्रहीतुमशक्यत्वात्॥ १७॥

न च तां ग्रहीतुमन्यानुभूतिरपेक्ष्या स्वसत्तयैव प्रकाशमानत्वात्। तथा हि शब्दाद्यनुभूतिस्तदादिवदप्रकाशा प्रतीयते। न चार्थगतप्रकाशातिशयाल्लिङ्गात्तस्या भवेदनु-

---

सत्ता सत्या स्पर्शः सन्निति स्पर्शानुभवेपि तस्या अनुवृत्तेः। शब्दो मृषा, तस्य तत्र व्यावृत्तेः। दृष्टान्तेन विशदयति रज्जुभुजङ्गादिवदिति। रज्जुः सत्या स्रगनुभवेपि तस्या अनुवृत्तेः। भुजङ्गो मृषा तस्य तत्र व्यावृत्तेरित्यर्थः। ननु सत्तानुभूत्योरुभयोः स्थितौ भेदः सिद्ध इति चेत्तत्राह सद्रूपा हीति। अनुभूतितः सत्ता न भिन्ना। सत्तानुभूत्योर्यो भेदः स ताभ्यां भिन्न इत्येवमनवस्थाप्रसङ्गादैक्यवाक्याच्च। नन्वस्त्वनुभूतिः सत्तानतिरेकिणी किं तूत्पत्तिस्तस्याः स्यादनुभूतित्वात् शब्दानुभूतिर्मे जातेति प्रतीतेरिति चेत्तत्राह स्वतःसिद्धेति। परत इति। शब्दादेर्विषयस्य। ज्ञानमिति। तत्त्वमात्मनस्तत्समवायिकारणत्वमिति तार्किकमतेनान्यतो ज्ञानोत्पत्तावित्यर्थः। न चेति। तस्या अनुभूतेः। तयोरुत्पत्तिविनाशयोः। न च सैवेति। अनुभूतिरेव। स्वोत्पत्तिविनाशयोः साक्षाद्द्रष्ट्रीति। न च वाच्यमित्यर्थः॥ १७॥

एवमनुभूतेः सद्रूपत्वं स्वतःसिद्धत्वादुत्पत्तिविनाशरहितत्वं

Digitization by Arya Samaj Charitable Foundation, Chennai

मानं, शब्दादौ तद्भिन्नस्य प्रकाशस्यानुपलम्भात्, उभयसमतया तयैव सर्वव्यवहारनिर्वाहे तत्क्लृप्तेरन्याय्यत्वात् । न च सा नाना अनुभूतिरनुभूतिरित्येकाकारेणावभासात् । प्रयोगश्च विवादाध्यासितानुभूतिरौत्पत्तिकभेदशून्या विनोपाधिपरामर्शमविभाव्यमानभेदत्वात् खवत् । शब्दानुभूतिः स्पर्शानुभूतेर्न भिद्यतेऽनुभूतित्वाद्गन्धानुभूतिव-

---

च साधितम् । अथ किं तस्यां प्रमाणमित्यपेक्षायां स्वप्रकाशत्वान्न तस्यां प्रमाणापेक्षेत्याह न च तामिति । तस्या अनुभूतेर्ग्रहणायान्याऽनुभूतिर्न मृग्येत्यर्थः । कुत इत्याह स्वसत्तयैवेति । नु खलु । रविमीक्षितुं दीपो मृग्यते इति भावः । स्वप्रकाशतां विशदयति न हीति । तदादिवच्छब्दादिवत् । नन्वनुमानज्ञानेन तस्या भवेद्ग्रहणमिति चेत्तत्राह न चार्थगतेति । यथा पर्वतेषु धूमज्ञानाद्वह्निरनुमितस्तथा शब्दादिष्वनुभूतिरनुमिता, तेषां स्फुरणाधिक्याल्लिङ्गादिति न वाच्यमित्यर्थः । कुत इत्याह शब्दादाविति । तद्भिन्नस्यानुभूतेरन्यस्य । अनुभूतिरेव प्रकाशो न त्वनुभूतेरितरः स इत्यर्थः । उभयेति । अर्थप्रकाशरूपा ह्यनुभूतिरुभयवादिसंमता, तयैव ज्ञानज्ञेयव्यवहारे सिद्धेऽर्थप्रकाशातिशयाल्लिङ्गादनुभूतेरनुमेयत्वकल्पनमन्याय्यमित्यर्थः । शब्दादिविषयभेदादनुभूतेर्विषयिण्या भेदं चेत्कश्चिद् ब्रूयात्तं निराकरोति वचसेति । सानुभूतिर्नाना बहुविधा न भवति शब्दानुभूतिः स्पर्शानुभूतिरित्येवं चरमैक्यावभासनात् । विवादेति । विमतानुभूतिः स्वाभाविकभेदहीना शब्दादिसम्बन्धं

Digitization by Arya Samaj Charitable Foundation, Chennai

दिति ॥ १८ ॥

तस्मान्नित्या स्वप्रकाशा निर्विशेषाऽद्वितीया चैषानुभूतिः । जीवस्येश्वरस्य च स्वरूपमेतदेव । इतोन्यत् सर्वमिह मायया विजृम्भितमिति जल्पन्ति । तच्चानुभूतिस्वरूपस्यात्मनोऽनुभवितृत्वाहम्प्रत्ययबोध्यत्वाविषयप्रकाशकत्वस्वभावहेतुकस्वयम्प्रकाशत्वप्रतिपादनेनैव निरस्तं वेदितव्यम् ॥ १९ ॥

विना भेदानवभासादित्यर्थः ॥ १८ ॥

निगमयति तस्मादिति । अनुवृत्तत्वात् । सत्या उत्पत्तिविनाशविरहान्नित्या । प्रमाणनिरपेक्षप्रतीतिकत्वात् स्वयम्प्रकाशा । चरमे विशेषास्पर्शादैक्यरूपेण भानाच्च निर्विशेषाऽद्वितीया चैषानुभूतिर्ब्रह्मेत्यर्थः । जीवस्येति । अविद्यया जीवत्वं विद्यया चोपाधिनेश्वरत्वं चानुभूतौ कल्पितं, तयोर्वास्तवं स्वरूपं त्वनुभूतिरेव । घटाकाशगृहाकाशयोरिव महाकाशमित्यर्थः । इतोऽन्यदिति । माययानुभूतिस्वरूपाज्ञानरूपया । विजृम्भितं कल्पितम् । इति कल्पयन्तीति । यत्त्विति । कल्पयन्ति केवलानुभूतिवादिनः । तच्चानुभूतेरात्मनोनुभवितृत्वादिप्रतिपादनेनैव निरस्तं वेदितव्यमित्यनुषङ्गः । सत्तादीनां सत्ताद्याश्रयत्ववद्विज्ञानस्वरूपस्यैवात्मनो विज्ञातृत्वमिह प्रतिपादितम् । तस्यैव विज्ञातुरहमर्थत्वं तस्य स्वविषयप्रकाशनशीलतया स्वप्रकाशकत्वं चेति हेतोस्तत्कुचोद्यं परिहृतमित्यर्थः । न खलु विज्ञाताहमर्थो विषयप्रकाशकसत्ताकश्चार्थो निर्विशेषत्वाच्छक्यते वक्तुम् ॥ १९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किं च शब्दानुभूत्युत्तरे स्पर्शानुभूतिकाले व्यावृत्तस्य शब्दस्यासत्यत्वमाख्यातुं न शक्यते तदानीमेव तस्यैवान्यैरनुभूयमानत्वात् । ज्ञानाप्रसाराद्युगपदनेकाग्रहः । प्रसृतज्ञानाः खल्वष्टावधानिप्रभृतयो दृश्यन्ते, न तेषां विषयव्यावृत्तिरस्ति । क्रमेण परात्मानुभवे च नानुभूतस्य व्यावृत्तत्वादसत्यं, 'नित्यो नित्याना'मित्यादिश्रुतिव्याकोपात् । एतेनैव तावनुभूत्यां कल्पितावतस्तथैत्युक्तिरपि निरस्ता कल्पकानिरूपणाच्च । रज्जुभुजङ्गादिकं

आपातरमणीयान् पूर्वपक्षार्थानधुना निराकरोति किञ्चेत्यादिना । तदानीमिति । अनुभूतशब्दस्य जनस्य तदानीं स्पर्शानुभववेलायामेव तस्यैव शब्दस्यान्यैः श्रोतृभिरनुभूयमानत्वादित्यर्थः । ननु स्पर्शानुभवी तं शब्दं कुतो नानुभवति तत्राह ज्ञानाप्रसारादिति । दुरदृष्टेन ज्ञानसङ्कोचादित्यर्थः । ये तूग्रपुण्येन प्रसृतज्ञानास्ते किल सार्धमेवाऽनेकानर्थाननुभवतीत्याह प्रसृतेति । क्रमेणेति । अनुभूतस्य परात्मनः । नित्येति । व्याख्यातं प्राक् । एतेनैवेति । एतेन परापरात्मनोर्नित्यत्वश्रवणेन हेतुना तौ जीवपरावनुभूत्यां कल्पितावतः कल्पितत्वाद्धेतोस्तथा मिथ्याभूतौ भवतोऽनुभूतिरेव सत्येत्युक्तिश्च निराकृता नित्ययोः कल्पितत्वासम्भवादिति भावः । रज्ज्विति । पुरः स्थितायां रज्जौ भुजङ्गं कल्पयन् रज्जोरन्यो यथा प्रतीतस्तथानुभूत्यां शब्दादीन् कल्पयन्ननुभूतेरन्यः प्रत्येतव्यः । स च ते नास्तीति विषमदृष्टान्ती

Digitization by Arya Samaj Charitable Foundation, Chennai

तु न दृष्टान्तो वैषम्यात् ॥ २० ॥

न च सन्मात्रमनुभूतिः, विषये भावेन भेदस्य सिद्धत्वात् । न च शब्दाद्यनुभूतिस्तत्राप्यात्मा वृत्तिज्ञानस्यानित्यत्वस्वीकारात् । न च स्वरूपानुभूतिः सः, योऽहं बाल्ये स्वपितरावन्वभूवं, स एवेदानीं वार्द्धके स्वनप्तृननुभवामीत्यनुभवितुरेवास्मदर्थस्य तत्त्वेन प्रत्यभिज्ञानात् । न चानुभूतैरनुभूतिगोचरत्वे शब्दादिवज्जाड्यापत्तिः, अनुभूतित्वेनैव गोचरत्वात् । तस्माज्ज्ञानग्राह्यत्वेपि न जाड्यापत्तिः, 'मृगैर्मृगाणां ग्रहण'मित्या-

---

त्वमिति ॥ २० ॥

यत्तु सद्रूपा ह्यनुभूतिरिति सदनुभूत्योरभेदः प्रतिपादितस्तन्निरस्यति न च सन्मात्रमिति । न च तयोर्भेदे गृहीतेऽनवस्थापत्तिः तस्याऽधिकरणात् । यतो न तदनापत्तिः तथापि भेदवत्त्वभानं निर्विशेषात् । न च शब्दादीति । तव केवलानुभूतिवादिनः । न च स्वरूपेति । यस्मान्नीलपीताद्याकारा ज्ञानवृत्तयो भवन्ति सा ब्रह्मस्वरूपा निर्गुणानुभूतिरात्मेति त्वया न शक्यमभिधातुमित्यर्थः । कुत इत्याह योऽहमिति । तत्त्वेनात्मत्वेन । यत्तु न च तां गृहीतुमन्यानुभूतिरपेक्ष्येत्यात्मनो ज्ञानगोचरत्वं निषिद्धं, तत्प्रत्याख्याति न चानुभूतेरिति । अनुभूतित्वेनैवेति । न तु शब्दादिवज्जडत्वेनेत्यर्थः । सजातीयेन गृहीतत्वे विजातीयत्वं न भवतीति विशदयितुं निदर्शनं न हीति । एवमिति । ज्ञान-

Digitization by Arya Samaj Charitable Foundation, Chennai

देः, 'ज्ञानगम्यः पुरातन' इति तन्नामस्तोत्राच्च। न हि प्रकाशैकरूपस्य रवेः प्रकाशात्मकचक्षुर्विषयत्वे सत्यप्रकाशतापत्तिर्दृष्टा । एवं हानोपादानादिलिङ्गकानुमानज्ञानगम्यत्वं परानुभूतेः सिद्ध्यति, अहमन्वभूवमिति स्वानुभूतेश्च । 'औपनिषदः पुरुषो' 'ज्ञानं ज्ञेयं ज्ञानगम्य'मित्याद्याः श्रुतिस्मृतयो विज्ञानस्वरूपस्य ब्रह्मणो वेद्यत्वबोधिका नोपरुध्येरन् । तस्मादनुभवितैवात्मा। अनुभूतिस्तु तस्य धर्मः। स च विषयप्रकाशनसमये स्वप्रकाशः प्रतीतः, अन्यदा

स्य ज्ञानग्राह्यत्वे स्वीकृते सतीत्यर्थः । हानेति । एष विप्रो ब्रह्मविद्विषयरागित्वे सति ब्रह्मभक्तिग्राहित्वादिति विप्रस्य ब्रह्मवेदनमनुमितम् । स्फुटार्थमन्यत् । एतेन फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्वि++तं ब्रह्मण्यज्ञाननाश+वृत्तिव्याप्तिरपेक्ष्यत इति निरस्तम् । मनसैवानुद्रष्टव्यमिति श्रुतेर्वृत्तिव्याप्यं ब्रह्म । यन्मनो न मनुते इति श्रुतेस्तु फलव्याप्यं तन्नेति वदन्ति । अन्तःकरणवृत्तिरावरणनिवृत्त्यर्थमज्ञानावच्छिन्नचैतन्यं व्याप्नोतीति वृत्तिव्याप्यत्वम् । आवरणे निवृत्ते स्वयम्प्रकाशमानं चैतन्यमुच्यते, तन्न । चित्तवृत्तिर्व्याप्नोति आवरणस्य प्रागेव निवृत्तेः । प्रयोजनाभावात्तदाऽन्तःकरणस्यापि विनाशाच्च कथं तद्व्याप्तिः शक्या वक्तुम् । तस्मादिति । उक्तनिर्णयाद्धेतोरात्मानुभविता ज्ञानी न तु केवलानुभूतिस्वरूप इत्यर्थः । अनुभूतिस्तु तस्यात्मनः स्वानुबन्धी धर्मो भवति । ननु ज्ञानी चेदात्मा तर्हि न दृष्टेरित्यादिना ज्ञानि-

Digitization by Arya Samaj Charitable Foundation, Chennai

ज्ञानगम्यश्च । 'न दृष्टेर्द्रष्टारं न मतेर्मन्तार'मित्यत्र तु तथाभूतं जीवं निषिध्य सर्वान्तरात्मानमीशमुपास्स्वेति व्याख्यानान्न काचिच्छङ्का ॥ २१ ॥

इति श्रीसिद्धान्तरत्नाख्ये भाष्यपीठके
केवलानुभूतिव्युदासः सप्तमः पादः ॥ ७ ॥

त्वप्रतिषेधः कथं सङ्गच्छेतेति चेत्तत्राह न दृष्टेरिति । स्फुटार्थम् । तथाभूतं जीवं निषिध्येति । तदुपासने क्लेशाधिक्यादिति भणितं भगवता ये त्वक्षरमनिर्देश्यमित्यादिभिः ॥ २१ ॥

इति श्रीगोविन्दभाष्यपीठकटिप्पण्यां सप्तमो
नन्दकपादो व्याख्यातः ॥ ७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अष्टमः पादः ।

तदेवं ज्ञानस्वरूपो ज्ञाताहमर्थश्चात्मा कर्तृत्वादिमान् । स चेशो जीवश्चेति द्विविधः । तत्रेशो विभुः स्वद्वारा जगत्कर्ता, स्वायत्तवृत्तिकप्रकृतिद्वारा तु तदुपादानं चेति 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधा'दित्यादिकात् सूत्रपञ्चकात्तद्भाष्याच्चाऽवसीयते । प्रकृतिजीवरूपात् प्रपञ्चात्तदाश्रयस्येशस्य भेदस्त्वानन्दमयाद्यधिकरणेभ्यः सिद्धः ॥ १ ॥

ग्रन्थारम्भे विज्ञातानन्दस्य सार्वज्ञ्यादिगुणरत्नाकरस्य श्रीपतेः सर्वेश्वरस्य विष्णोर्भक्तिराटांतिकयोः सुखदुःखप्राप्तिपरिहारयोर्हेतुः । सा च स्वसंवित् पूर्वया तत्संविदा प्रवृत्तेति भगवतो बादरायणस्य मतेनापादितं तद्दृढतायै सर्वदेवतैक्यादिवादा निराकृताः । निर्गुणात्मैक्यवादस्तु पञ्चमादिभिस्त्रिभिः पादैः परिदूषितः । तेन सविशेषब्रह्मवादो दृढतां नीतः । अथ तद्वादमुद्दिष्टं पुमर्थं वर्णयितुं पद्मपादोऽयमारभ्यते तदेवमित्यादिना । स्वद्वारेति । पराख्यस्वरूपशक्तिमतात्मनेत्यर्थः । प्रकृतिश्चेति । विश्वस्योपादानं निमित्तं च ब्रह्मैव । कुतः ? एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मृत्पिण्डादिदृष्टान्तस्य चानुगुण्यादित्यर्थः । अवशिष्टानि सूत्राणि भाष्ये विज्ञेयानि ॥ १ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य स्वरूपलक्षणं सत्यानन्तज्ञानत्वं जगज्जन्मादिहेतुत्वं च चिदचिच्छक्तिमानसौ जगन्निमित्तोपादानतां भजतीति तदुभयरूपतायाः स्वतो ब्रह्मगतत्वेनौपाधिकत्वाभावादुपलक्षणत्वनामकतटस्थलक्षणत्वानियमोपि नातीव समञ्जसः। जगज्जन्मादिहेतुत्वमेव ब्रह्मलक्षणं शास्त्रकृद्भिर्दर्शितम्—'जन्माद्यस्य यत' इति । इतरथा लक्षणासङ्गतिः। जगच्च परमार्थतः सत्यमित्युपपादितम् ॥ २ ॥

ये तु मृषाभूतं जगद्रज्जुभुजङ्गादिवद्भ्रमारोपितमित्या-

तस्येति । तदभिन्नत्वे सति तद्बोधकं स्वरूपलक्षणम् । तद्भिन्नत्वे सति तद्बोधकं तु तटस्थलक्षणम्। यथा ब्रह्मणः सत्यत्वादि यथा च जगज्जन्मादिकर्तृत्वमिति । मायिनो वदन्ति—जगतो ब्रह्मभिन्नत्वेपि स्वकर्तृत्वेन ब्रह्मबोधकत्वमस्तीति ब्रह्मोपलक्षकत्वात्तटस्थलक्षणत्वमिति । नैतत् सुपेशलं यथा सास्नादिकं गोरसाधारणं स्वरूपानतिरेकीति सास्नादिमत्त्वं तस्य स्वरूपलक्षणं स्यादेवं परादिशक्तित्रयं शक्तिमतो ब्रह्मणोऽसाधारणं स्वरूपानतिरेक्येव नवजपापुष्पारुण्यादौपाधिकम् । अतस्तत्त्रयेण निमित्तोपादानत्वं तस्य सास्नादिमत्त्ववत् स्वरूपलक्षणमेवेति भावः । जन्मादीति । यतो हेतोरस्य जगतो जन्मादि भवति तद्ब्रह्मेति सूत्रार्थः ॥ २ ॥

जगद्भ्रमवादं निराकरोति ये त्विति। भ्रमस्थले भ्रमाधिष्ठानं

Digitization by Arya Samaj Charitable Foundation, Chennai

हुस्तन्मते निरधिष्ठानं तत् स्यात्। सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वं खल्वधिष्ठानत्वे तन्त्रं, तच्च निर्विशेषे निःसामान्ये ब्रह्मणि न सम्भवतीति मृद्घटादयो दृष्टान्ताः श्रौताः। शुक्तिरजतादयस्तु बौद्धा एव। तस्माज्जगन्निमित्तोपादानरूपत्वं ब्रह्मणस्तस्य पारमार्थिकम् ॥३॥

एवं हि स्मरन्ति—'एष प्रकृतिरव्यक्तः कर्ता चैव सनातनः। परश्च सर्वभूतेभ्यस्तस्माद् वृद्धतमोऽच्युतः॥बुद्धिर्मनो महान् वायुस्तेजोऽम्भः खं मही च या। चतुर्विधं च यद्भूतं सर्वं कृष्णे प्रतिष्ठितम्॥चतुर्विधानां भूतानां त्रिषु लोकेषु माधवः। प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिरे'-ति। 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जन'मित्या-

---

सामान्यतो ज्ञातमज्ञातविशेषवच्च प्रतीतम्। यथा शुक्तिकारज्जुप्रभृतिः। न चैवं त्वया ब्रह्म स्वीक्रियतेऽतोऽसङ्गतोऽयं भ्रमवादः। किं च यैर्दृष्टान्तैरेष वादः प्रवर्तितस्ते श्रुतिषु नोपलभ्यन्ते। ननु पुराणे क्वचित्ते दृष्टा इति चेत्तत्राह बौद्धा एवेति। जगत्यनित्यत्वबुद्ध्यर्था विरक्तिफलका इति यावत्। वैराग्यजिग्राहयिषुभिराचार्यैर्बुद्ध्यैव कल्पिता इति भावः॥ ३॥

उभयस्वरूपत्वे प्रमाणं-एवं हीति। एष इति। भारते सभापर्वणि भीष्मवाक्यम्। प्रकृतिरुपादानं कर्ता निमित्तं च। सनातन इत्यविकारित्वं, बुद्धिरिति महत्तत्त्वं, मन इति तत्कारणमह-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्या श्रुतिस्तु तथापि न कश्चिद्विकार इति वक्तीति सर्वं समञ्जसम् ॥ ४ ॥

जीवस्त्वणुः। 'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' ॥ एषोणुरात्मा चेतसा वेदितव्यः, 'सूक्ष्माणामप्यहं जीव' इत्यादिश्रुतिस्मृतिभ्यः। तस्य कर्तृत्वभोक्तृत्वादिकं पारमार्थिकं परायत्तं चेति 'कर्त्ता शास्त्रार्थतत्त्वा'दित्यादिसूत्रदशकात्तद्भाष्याच्च विदितम् ॥ ५ ॥

न्तत्त्वं, तेनेन्द्रियतद्देवतानां ग्रहणम्। महान् वायुरित्यादिना भूतपञ्चकं, चतुर्विधं च यज्जरायुजाण्डजादिभूतं प्राणिजातं सर्वमेतत् कृष्णे प्रतिष्ठितं तेन पालितमित्यर्थः। प्रभवो जनकः, निधनं संहर्तेति, निखिलैकहेतुत्वं कृष्णस्योक्तम्। नन्वेवं जगत्कर्तृत्वे सिद्धे तस्य निष्क्रियत्वं कथं श्राव्यते श्वेताश्वतरैस्तत्राह निष्कलमिति। विकारः श्रमादिः ॥ ४ ॥

एवमीशं निरूप्याऽथ जीवं निरूपयति जीवस्त्विति। बालाग्रेति। श्वेताश्वतराणां वाक्यम्। आनन्त्याय मुक्तये। एषोणुरिति। मुण्डके। सूक्ष्माणामित्येकादशे। तस्येति। परायत्तमीशतन्त्रम्। कर्तेति। जीवः कर्ता। कुतः? यजेत ध्यायेदित्यादिश्रुतेश्चेतने कर्तरि सति सार्थक्यात्। प्रकृतेः कर्तृत्वे व्यर्थं तत् स्यादित्यर्थः ॥ ५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परमार्थतो बहुत्वं च मन्तव्यम् । 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ इदं ज्ञानमथाश्रित्ये'त्यादिषु विध्वस्ततमसां भगवत्साम्यभाजां बहुत्वाभिधानात् । ज्ञानस्वरूपस्यापि तस्य ज्ञानगुणकत्वं स्वीकार्यं, 'यो विज्ञाने तिष्ठन्' 'मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष' इतिश्रुतेः । नित्य एव स गुणः, 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत' इत्यादिश्रुतेः । 'यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः। दोषप्रहाणात्तज्ज्ञानमात्मनः क्रियते तथा ॥ यथोदपानख-

---

ईश्वरो यथैक एव न तथा जीवः किं तु बहवो जीवा इत्याह परमार्थत इति । बहुत्वं जीवतत्त्वस्येत्यर्थः । ज्ञानेनेति । श्रीगीतासु । प्रकाशस्य भानोः प्रकाशकत्ववज्ज्ञानस्य जीवस्य ज्ञातृत्वमित्याह ज्ञानस्वरूपस्यापीति । य इति । बृहदारण्यके । योऽन्तर्यामी। विज्ञाने चिदेकधातौ जीवे । तिष्ठंस्तदन्तर्यमयतीत्यर्थः । मन्तेति षट्प्रश्न्याम् । विज्ञानात्मेति । चिदेकधातुत्वम् । बोद्धेति । विज्ञातृत्वम् । ननु मनसा-संयुक्ते आत्मनि ज्ञानस्योत्पत्तेरनित्यं तदिति चेत्तत्राह नित्य एवेति । न हीति । बृहदारण्यके । विज्ञातुर्जीवस्य । विज्ञातेर्धर्मभूतज्ञानस्य । विपरिलोपो विनाशो नास्ति अविनाशित्वादिति वाक्यशेषः । अविनाशी वा इत्यादिकं चादिपदात् । यथेति । शौनकवाक्यम् । इह हेयगुणाः पापा जरादयः । अवबोधो गुणोऽभ्युदितः संसृतितिमिरं

Digitization by Arya Samaj Charitable Foundation, Chennai

ननात् क्रियते न जलान्तरम् । सदैव नीयते व्यक्तिमसतः सम्भवः कुतः॥ तथा हेयगुणध्वंसादवबोधादयो गुणाः। प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि त' इति स्मृतेश्च । केवलानुभूतिवादस्य निरासाच्च । इत्थं चेशतुल्योऽपि स्वरूपसामर्थ्याभ्यामल्पीयस्त्वेनोपसर्जनत्वात्तदृशोसौ भण्यत इत्यंशाधिकरणे तद्भाष्ये च विवृत्तम् । तदेवं नित्यज्ञानादिगुणकमणुचैतन्यं जीवस्वरूपमिति सिद्धम् ६

यत्तु वदन्ति—ब्रह्मैवाणुभूतान्तःकरणोपाधियोगाज्जीवसंज्ञमतो ब्रह्मांशत्वं जीवस्येति तदिदमविचारिताभिधानम् । तथा हि न तावदङ्कच्छिन्नपाषाणखण्डवद्व्यास्तवोपाधिपरिच्छिन्नो ब्रह्मखण्डो जीवः, अच्छेद्यत्वादखण्डत्वाभ्युपगमाच्च ब्रह्मणः, आदिमत्त्वापत्तेश्च जीवस्य ।

नाशयति यत् सूर्यसहस्रेणापि नापनेतुं शक्यते, यस्यानुदये सर्वत्यागिनोपि पशोरिव न मुक्तिः । यस्योदये गृहिणोपि जनकादेरिव मुक्तिरिति । एवमुक्तं मोक्षधर्मे । आकिञ्चन्ये न मोक्षोऽस्ति किञ्चने नास्ति बन्धनम् । किञ्चने चेतरे चैव जन्तुर्ज्ञानेन मुच्यते ॥ इति सुलभां भिक्षुकीं प्रति जनकेन ॥ ६ ॥

ब्रह्मोपसर्जनत्वाद्ब्रह्मांशत्वं जीवस्योक्तं तत्राद्वैतिनो वदन्ति-अंशशब्दस्य वस्त्वेकदेशे शक्तत्वादुपाधियोगि ब्रह्मैकदेशत्वं जीवस्य ब्रह्मांशत्वं नामेति । तदिदं निराकर्तुं प्रवर्तते पश्चिमादिना ।

Digitization by Arya Samaj Charitable Foundation, Chennai

यत एकस्यैव सतो द्वैधीकरणं छेदः। नाप्यच्छिन्न एवोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषः, उपाधौ गच्छत्युपाधिसंयुक्तब्रह्मप्रदेशाकर्षणायोगादनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशभेदात् प्रतिक्षणं बन्धमोक्षापत्तेः ॥ ७ ॥

न चोपाधिसंयुक्तं ब्रह्मस्वरूपमेव सः, अनुपहितब्रह्मव्यपदेशासिद्धेः 'य आत्मनि तिष्ठ'न्नित्यादिश्रुतिविरोधाच्च ॥ ८ ॥

नापि ब्रह्माधिष्ठानमुपाधिरेव सः, मुक्तौ जीवनाशापत्तेः ॥ ९ ॥

तत्र छेदेन तन्निरस्यति न तावद्टङ्केति । टङ्कः पाषाणदारणः इत्यमरः । ननूपाधिना टङ्केनैव छेदो नोच्यते किं तु योगमात्रात्तत्प्रदेशस्य तत्त्वं स्यात्ततश्च न विकारापत्तिरिति चेत्तत्राह नाप्यच्छिन्न एवेति। उपाधौ गच्छतीति । उपाधेरन्तःकरणस्य परिच्छिन्नत्वाज्जीवत्वाच्च चलनं सम्भवेदेव । ततश्चोपाधियोगी ब्रह्मप्रदेशो बद्धस्तद्वियोगी तु मुक्त इत्यापद्येतेत्यर्थः ॥ ७ ॥

उपहितब्रह्मजीवपक्षं निराकरोति न चोपाधीति । अनुपहितेति । शिवमद्वैतं चतुर्थं मन्यन्त इति ब्रह्मणस्तुरीयत्वश्रवणव्याकोपाद्य आत्मनीत्यादिजीवान्तर्यामित्वश्रवणव्याकोपाच्चेत्यर्थः॥८॥

अन्तःकरणजीवपक्षं निराकरोति नापीति । ब्रह्माधिष्ठितमन्तःकरणमेव जीव इत्यर्थः । मुक्ताविति । तथा च नित्यो नित्यानामित्यादिश्रुतिव्याकोपापत्तिः ॥ ९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

न च भ्रान्तं ब्रह्मैव सः, सार्वत्र्यदेशिकश्रुतिव्याकोपात् ॥ १० ॥

न चोपाधिप्रतिबिम्बितं ब्रह्मैव सः, तस्य विभुत्वान्नैरूप्याच्च। न च नीरूपरूपवत्तस्य सः, रूपस्य साश्रयत्वेन दृष्टान्तवैषम्यात्। न च जपापुष्पारुण्यात्तस्य सः, प्रतिबिम्बत्वावच्छिन्नं प्रति रूपिद्रव्यस्य हेतुत्वेन विवक्षितासिद्धेः। न चाकाशवत्तस्य सः, विभुत्वेन नैरूप्येण च तन्निरासात्। उपाधिपरिच्छिन्नाकाशस्थज्योतिरंशस्यैव तत्तया प्रतीतिरवैदुषी। इतरथा वायुकालादिरपि तत्प्रसङ्गः। यस्तु ब्रह्मणः

भ्रान्तब्रह्मजीवत्वपक्षं निराकरोति न च भ्रान्तमिति। भ्रान्तो राजपुत्रो यथा धीवरस्तद्वद् भ्रान्तं ब्रह्मैव जीव इति न च वाच्यमित्यर्थः ॥ १० ॥

उपाधिप्रतिबिम्बितब्रह्मजीवत्वपक्षं निराकरोति न चोपाधिप्रतीति। तस्येति। ब्रह्मणः विभोर्नीरूपस्य नभसः प्रतिबिम्बो यथा न भवति तथा ब्रह्मणोपि तादृशस्य स न भवेदित्यर्थः। ननु रूपं विभु नीरूपं च यथा दर्पणादौ प्रतिबिम्बति तथा स्यादिति चेत्तत्राह न च नीरूपेति। ब्रह्मणो रूपवत् स्वाश्रयत्वाभावाद्विषमोऽयं दृष्टान्त इत्यर्थः। न च जपेति। जपापुष्पारुण्यस्य यथाश्रयनिरपेक्षः स्फटिके प्रतिबिम्बः स्यादेवं ब्रह्मणो निराश्रयस्य सोऽस्त्विति न वाच्यमित्यर्थः। कुत इत्याह प्रतिबिम्बत्वेति। यो यः प्रतिबिम्बः स सर्वोपि रूपवद्द्रव्यहेतुः। ततश्च स्फटिके जपापुष्पेणेव

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिबिम्बं प्रतिपादयन् ध्वनेरिव प्रतिध्वनिं तत्र निदर्शयति स किल प्राच्यां प्रस्थितः प्रतीचीमासीदति तयोरसाधर्म्यादेव ॥ ११ ॥

तच्छास्त्रं तु गौण्या वृत्त्या सङ्गतिमत्। एवमाह भ-

प्रतिबिम्बितमतिस्वच्छे तत्र तदारुण्यातिप्रसाराद्वर्तुलं तद्ग्रहीतुं न शक्यत इति विवक्षितस्ते नीरूपब्रह्मप्रतिबिम्बो न सिद्ध्यति। न चाकाशेति। प्रकटार्थः। ननु प्रतीतेः कः समाधिस्तत्राह उपाधिपरीति। ग्रहनक्षत्रप्रभामण्डलस्याकाशप्रतिबिम्बतया प्रतीतिर्भ्रान्तिरित्यर्थः। इतरथेति। नीरूपस्य विभोश्च प्रतिबिम्बस्वीकारे इत्यर्थः। यस्त्विति। तत्र प्रतिबिम्बनिरूपणे ॥ ११ ॥

ननु न चेद्ब्रह्मणः प्रतिबिम्बो जीवस्तर्ह्याकाशमेकं हि यथा घटादिषु पृथग्भवेत् तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमानित्यादि प्रतिबिम्बशास्त्रं कथमर्थवत् स्यादिति चेत्तत्राह--तच्छास्त्रं त्विति। गौण्या वृत्त्या गौणलक्षणया सिंहो देवदत्त इतिवत्प्रतिबिम्बसादृश्येनेत्यर्थः। इत्थमेव सूत्रकृता निर्णीतमित्याहैवमिति। अम्बुवदित्यस्यार्थः—अम्बुनि यथा सूर्यादेः परिच्छिन्नस्य रूपवतो ग्रहणं भवत्येवं ब्रह्मणो विभुत्वेन नैरूप्येण चाविद्यायां ग्रहणं न भवतीत्यतो न तथात्वं, जीवस्य ब्रह्मप्रतिबिम्बत्वं नेत्यर्थः। वृद्धीत्यस्यार्थः—जलाधारेष्विवांशुमानिति शास्त्रं मुख्यवृत्त्या न प्रवर्तते किं तु वृद्धिह्रासभाक्तं स्वधर्मांशमुपादाय गुणवृत्त्या प्रवर्तत इत्यर्थः। अन्तर्भावात् एतस्मिन्नंशे शास्त्राशयसमाप्तेः। एवं सत्युभयोरुपमानोपमेययोः सामञ्जस्यात् सङ्गतेः। सूर्यतत्प्रतिबि-

Digitization by Arya Samaj Charitable Foundation, Chennai

गवान् सूत्रकारः—'अम्बुवदग्रहणात्तु न तथात्वम्'। 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेव'मिति ॥ १२ ॥

तस्माद्ब्रह्मवदन्मदिसिद्धोऽपि ज्ञानात्मा जीवः, 'नित्यो नित्याना'मित्यादिश्रुतेः ॥ १३ ॥

स च तद्भिन्नोऽपि तच्छक्तिरूपत्वात्तदंशो निगद्यते। 'इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूता'मिति स्मृतेस्तच्छक्तिरूपत्वं तस्य सिद्धम्। अत एव सम्बन्धापेक्षावत्त्वं च। वर्णितं चैतदंशाधिकरणभाष्ये ॥ १४ ॥

तस्य तदंशभूतस्य स्वांशिभगवद्वैमुख्यान्मायया परिभवस्तत्सांमुख्ये तु सा विलीयते। तत्स्वरूपसाक्षात्कारश्च सदैव स्फुरति। 'क्षरप्रधानममृताक्षरं हरः क्षरात्मना

म्बौ यथा वृद्धिह्रासवन्तौ स्वतन्त्रावुपाधिधर्मासम्पर्कसम्पर्किणौ तथेशजीवाविति ॥ १२ ॥

निगमयति तस्मादिति। प्रकटार्थम् ॥ १३ ॥

भगवदंशत्वं जीवस्य तदुपसर्जनत्वादुक्तम्। तत्त्वं च तस्य तच्छक्तित्वादिति दर्शयति स चेति। इतस्त्वन्यामिति। श्रीगीतासु। प्रकृतिं शक्तिम्। तस्येति जीवस्य। अत एवेति। शक्तित्वादेः ॥ १४ ॥

तस्येति। जीवस्य। स्वांशिभगवद्वैमुख्यादिति। भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः। तन्मायया तो

Digitization by Arya Samaj Charitable Foundation, Chennai

वीक्षते देव एकः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूय-श्चान्ते विश्वमायानिवृत्तिः'। 'न स पुनरावर्तत'इत्यादि-श्रवणात् ॥ १५ ॥

तद्वैमुख्यं चाऽनादिकालिकमपि सत्सङ्गाद्विनश्यति

———

बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मेति । जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य । अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्येति च श्रीभागवतात् । यत्र क्वचिन्मायैव कर्मभिर्वा जीवस्य देहयोगात्मा संसृतिर्वर्ण्यते तत्रापि प्रागीशवैमुख्यमूह्यम् । वैमुख्यं त्वनादिवैमुख्यादृते मायाद्यावृत्तिर्न स्यात् । यथावृतं घटदीपमन्धकारस्तथा वैमुख्यावृतं जीवं मायावृणोतीति बोध्यम् । तत्सांमुख्ये च सत्प्रसङ्गाज्जाते, तेन वैमुख्ये ध्वस्ते मायापसरति, मुद्गरप्रहारेण घटे ध्वस्ते यथान्धकारः पलायते । ततश्च दीपस्येव स्वरूपं जीवस्य स्फुरति परमात्मानं च सर्वदा स वीक्षते । अत्र प्रमाणं क्षरमिति । श्वेताश्वतरवाक्यम् । प्रधानं परिणामित्वात् क्षरमुच्यते । हरपरमात्माक्षरात्मानौ प्रधानजीवावेको देवः परमात्मा हर ईशते नियमयति । अथ तस्य देवस्याभिध्यानात् योजनादसम्प्रज्ञातसमाधितः तत्त्वभावात् स्वरूपद्वयस्फुरणादन्ते विश्वमायानिवृत्तिर्जीवस्य भवति विमुक्तिं स लभते इत्यर्थः । न स इति । छान्दोग्ये । स मुक्तो भगवल्लोकान्नावर्तते न पततीत्यर्थः ॥ १५ ॥

तद्वैमुख्यं चेति । अनादिकालिकं भगवद्विषयकमानसापरोक्षप्रागभावत्वादिति बोध्यम् । अनादीति । अनादिवैमुख्यप्रवृत्तया ह-

Digitization by Arya Samaj Charitable Foundation, Chennai

सामुख्यं चाविर्भवति । 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा॥ महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् । महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये' इत्यादिश्रुतिभ्यः ॥ १६ ॥

सत्सङ्गविशुद्धे जीवे ज्ञानानन्दात्मकभगवत्स्वरूपावरकाविद्याविशेषविनाशात्मा वेदान्तजन्यभगवद्विषयकमानसापरोक्षप्रागभावविनाशात्मा वा भगवत्सम्बन्धः। स एष सत्सङ्गहेतुकाद्भगवत्प्रसादशब्दितात्तत्सांमुख्यादेव भवति । ततो विरतोऽनुवृत्त्या जीवं प्रति भगवद्गुणावर-

---

रिमायया मोहित इत्यर्थः। यदा प्रबुध्यते सत्सङ्गेन वैमुख्यनाशे तत्सांमुख्यं विन्दतीत्यर्थः । तदाऽजं हरिं बुध्यते स्वामित्वेन लभते इत्यर्थः । महत्सेवामिति । पञ्चमे ऋषभवाक्यम् । स्फुटार्थम् ॥ १६ ॥

उक्तमर्थं विवृणोति—सत्सङ्गविशुद्धेति । सत्सङ्गेन विनष्टभगवद्वैमुख्ये जीवे सत्सङ्गहेतुकाद्भगवत्प्रसादरूपात्तत्सांमुख्यात्तत्सम्बन्धः स्वस्वामिभावलक्षणो भवतीत्यन्वयः । स कीदृश इत्यपेक्षायां विशेषणद्वयं ज्ञानानन्देति वेदान्तजन्येति च । स्फुटार्थम्। सत्सङ्गाद्वैमुख्यनाशेन सांमुख्योदयाद्भगवत्स्वरूपं जीवस्य स्फुरतीत्युक्तम्। अथ प्रेमलक्षणया भक्त्या तद्गुणाः स्फुरन्तीत्याह ततो

Digitization by Arya Samaj Charitable Foundation, Chennai

कोऽविद्याविशेषो विनश्यति, ततस्तमसौ साक्षात्करोतीति द्वयोरविद्ययोर्ध्वंसो विमोक्षः ॥ १७ ॥

एवमेवाह श्रुतिः—'विमुक्तश्च विमुच्यते' इति, 'भूयश्चान्ते विश्वमायानिवृत्ति'रिति च। ये त्वनया श्रुत्या बन्धामिथ्यात्वं प्रतिपादयन्ति ते खलु तद्विषयकवेदाप्रामाण्यकरणान्नास्तिका एवेत्यभाणि प्राक् ॥ १८ ॥

तद्ध्वंसश्च कार्योऽपि नित्यः, अभावरूपत्वात् अना-

विरतेत्यादिना । ततस्तमिति । तमनन्तगुणलीलाविभूतिं स्वामिनं हरिमित्यर्थः ॥ १७ ॥

अविद्याद्वित्वे प्रमाणमाह विमुक्तश्चेति । काठके । स्वरूपावरिकयाऽविद्यया विमुक्तो जीवो गुणावरिकया तया विमुच्यत इत्यर्थः । भूयश्चेति । स्वरूपावरिकया मायया विमुक्तस्यान्ते परभक्तिलाभोत्तरकाले विश्वमायानिवृत्तिर्गुणावरिकायाश्च पलायनं भवतीत्यर्थः । ये त्विति । चिन्मात्राद्वैतिनः । देहादेः शुक्तिरजतादिवद्भ्रमरचितत्वात्प्रतीतिकालेपि जीवो वस्तुतो मुक्त एवास्ति । स पुनरेकमेवाद्वितीयं नेह नानास्ति किञ्चनेत्यादिवेदान्तवाक्यार्थपरिशीलनात्तद्भ्रमेण विमुच्यते इत्यर्थः । एवं भूयश्चेत्यत्र व्याख्येयम् । तद्विषयकेति । यतो वा इत्यादिप्रपञ्चविषयकेत्यर्थः । प्रागिति । षष्ठे पादे ॥ १८ ॥

ननु द्विविधाऽविद्या । विध्वंसस्य कार्यत्वेनानित्यत्वात्तद्विध्वंसेऽविद्ययोस्तयोरुज्जीवनापत्तिरिति चेत्तत्राह तद्ध्वंसश्चेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

वृत्तिशास्त्राच्च ॥ १९ ॥

न च परोक्षस्वभावस्य हरेरापरोक्ष्यं कथमिति वाच्यं, तादृशस्यापि तस्य देवादिवत् षड्जादिवच्च सार्वदिकानुशीलनेन तत्सम्भवात्। आह चैवं भगवान् सूत्रकारः-'प्रकाशश्च कर्मण्यभ्यासा'दिति। एवं च दुःखहानिसुखलाभरूपो मोक्षः ॥ २० ॥

यत्त्वाहुः—मुक्तावहमर्थो विनश्यति चित्सुखरूपं तु किञ्चिदवशिष्यते तदेवात्मवस्तु पुमर्थस्वरूपमिति। तदतीव मन्दं, केनाप्यननुभूतस्य ज्ञानानन्दत्वं ज्ञानानन्दाननुभवितुश्चात्मत्वमिति परिभाषामात्रत्वात्। ईदृक् पुमर्थो हि

अभावेति। ध्वंसाभावरूपं कार्यं नित्यं ध्वस्तस्य घटस्य पुनरनागतेः ॥ १९ ॥

न चेति। परोक्षस्वभावस्य प्रत्यक्स्वरूपस्य। आपरोक्ष्यं साक्षात्कारः। सार्वदिकानुशीलनेनेति। श्रुतिश्च ध्याननिर्मथनाभ्यासादेवं पश्येन्निगूढवदिति। अनुशीलनावृत्त्युदितया कृपाशक्त्या परोक्षस्वभावस्याप्यापरोक्ष्यम्। सच्चिदानन्दरूपत्वात् स्यात्कृष्णोधोक्षजोऽप्यसौ। निजशक्तेः प्रभावेन स्वभक्तान् दर्शयेत्प्रभुरिति पाद्मात्। प्रकाशश्चेति। कर्मणि ध्यानेऽभ्यासाद्ब्रह्मप्रकाशो भवतीत्यर्थः। एवं चेत्युक्तप्रकारेण ॥ २० ॥

मुक्तो निर्दुःखः सुखीत्युक्तं, एतत्प्रतिकूलं केवलानुभूतवादिमतं निराकृतमपि पुनः प्रसङ्गान्निराकरोति ये त्वाहुरित्यादिना।

Digitization by Arya Samaj Charitable Foundation, Chennai

विगीतः । 'दुःखहानिः सुखप्राप्तिः श्रेयस्तत्रेह चेष्यत' इति स्मृतेः । दुःखशून्यः सुखी स्यामितीच्छैव तत्त्वे मानं तदभावादप्रमाणं तत्कल्पनम् । तदुभयरूपः पुमर्थः खल्वात्मावधिको दृष्टः । आत्मनोऽहमर्थस्य विनासौ सम्भवेत् ॥२१॥

यत्त्वाहुरात्मा खलु दुःखहेतुः पापार्जनादतस्तन्नाशादेव दुःखनिवृत्तिः स्यादिति, तत् किल कुबुद्धिविजृम्भितमेव । जागर एव दुःखोदयो न तु सुषुप्तावित्यन्वयव्यतिरेकाभ्यामात्मनोऽहमर्थस्य तत्राऽहेतुत्वात् । किञ्च शरीरेन्द्रियविषयवेदनादेरपि तत्र हेतुत्वम् । ज्ञानभोगाभ्यां कर्मणो विनाशे सति हेत्वभावेन शरीराद्यनुत्पत्तौ स्यादेव दुःख-

---

केनापीति । तदा ह्यनुभवितुर्धर्मिणोऽभावस्तन्मतः । ज्ञानानन्देति । न हि विज्ञातुर्विज्ञातेरित्यादिश्रुत्यात्मनोनुभवितृत्वं स्वीकृतमस्ति । ईदृगिति । दुःखहानिसुखप्राप्तिभिन्नः । दुःखेति । चतुर्थे श्रीनारदवाक्यम् । इहेति । कर्मानुष्ठाने । दुःखशून्य इति । तत्त्वे मोक्षस्य दुःखहानिसुखप्राप्तिरूपत्वे । तदभावात्तादृशेच्छाविरहात् । तदुभयेति । आत्मावधिको जीवात्माश्रयकः । असावात्मावधिकः पुमर्थः ॥२१॥

यत्त्विति । आहुर्भावक्षणिकत्ववादिनो बौद्धाः । पापार्जनात्पापकर्मोत्पादनात् । जागर इति । शरीरेन्द्रियविषयविज्ञानवती जाग्रदवस्था दुःखहेतुस्तस्यां नष्टायां सुषुप्तौ तु न दुःखमित्यन्वयव्यतिरेकाभ्यां जाग्रदवस्थैव तादृशी दुःखहेतुर्न त्वात्मेत्यर्थः । ज्ञानेति । कर्मणः पापस्य हेतोः । पापस्याभावेन तत्कार्यस्य शरी-

Digitization by Arya Samaj Charitable Foundation, Chennai

निवृत्तिरतोऽनुचित एवात्मविनाशस्वीकारः ॥ २२ ॥

किञ्च दुःखाभावोऽप्यात्मनिष्ठः सन् पुमर्थः, अन्यथा स्तम्भादिनिष्ठोऽपि स तथा स्यात्। तस्मादात्मभिन्नानामेव दुःखहेतूनां मुक्तौ विनिवृत्तिर्न त्वात्मनश्च। इतरथा स्तम्भादिशून्यतापि मुक्तिः स्यात्। आत्मशून्यत्वस्तम्भादिशून्यत्वयोर्विशेषाङ्गीकारे निर्विशेषत्वक्षतिः। अपि च—आत्मविनाशो मोक्षः किमात्मनः फलमनात्मनो वा। नाद्यः तस्यैवाभावात्। न हि फलिनोऽभावे फलमुपपद्यते। नेतरः अनात्मनस्तेनोपकाराभावात्। तस्मादुपेक्ष्याः कुबु-

---

रादेरनुत्पत्तौ सत्यम् ॥ २२ ॥

किञ्चेति। अन्यथा दुःखाभावस्यात्मनिष्ठतया पुमर्थत्वास्वीकारे स्तम्भादिनिष्ठोपि दुःखाभावः पुमर्थः स्यादित्यर्थः। तस्मादिति। दुःखहेतूनां जागरोपलब्धसम्बन्धानां शरीरेन्द्रियविषयवेदनानां तद्धेतूनां कर्मणां चेत्यर्थः। इतरथेति। आत्मनोपि मुक्तौ विनिवृत्तिस्वीकारे। स्तम्भादीति। यथात्मशून्यताया न कोपि द्रष्टा तथा स्तम्भादिशून्यतायाश्च न कोपीति तयोर्विशेषस्वीकारे तौल्यक्षतिरित्यात्मास्तित्वप्रसिद्धिरिति भावः। अपि चेति। नाद्यः, आत्मविनाश आत्मनः फलमिति प्रथमः पक्षो नेत्यर्थः। तस्यैवेति। फललिप्सोरात्मन इत्यर्थः। आत्मविनाशो देहादेरनात्मनः फलमिति द्वितीयोपि पक्षो नेत्यर्थः। कुतः? अनात्मनो देहादेस्तेनात्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्धयः ॥ २३ ॥

तदेवं सर्वेश्वरस्य भगवतः श्यामसुन्दरस्य जीवजडात्मकात् प्रपञ्चाद्भेदस्तज्ज्ञानभक्तिभ्यां जीवस्यात्यन्तिकदुःखहानिसुखप्राप्तिसम्भव इति कृत्स्नं शास्त्रं जीवेशभेदपरं निर्णीतम् ॥ २४ ॥

तत्र यान्यभेदपराणीव वाक्यानि कानिचित् प्रतीयन्ते तानि क्वचित्तन्मात्रायत्तवृत्तिकतया तन्निष्ठतद्व्याप्यतया वा विश्वं तदात्मकमिति बोधयेयुः । क्वचिज्जीवेशयोः स्थानैक्यान्मत्यैक्याच्चाऽभेदं बोधयन्ति । क्वचिच्छक्तेर्जीवजडरूपायाः शक्तिमतः परेशादनन्यत्वादभेदमाहुः ।

विनाशेनोपकाराभावात् । आत्मनैव देहादेरुपकारो भवति ॥२३॥

महाप्रकरणमुपसंहरति तदेवमिति ॥ २४ ॥

ननु शास्त्रं चेत् सर्वं भेदपरं तर्ह्यभेदवाक्यानां सङ्गतिः कथमित्यपेक्षायां पूर्वदर्शितामपि तां पुनर्विशदतयाऽन्ते दर्शयति तत्रेति । शास्त्रे । तन्मात्रेति । ब्रह्माधीनस्थितिजीविकतयेत्यर्थः । तन्निष्ठया ब्रह्माधिकरणतया । स्थानैक्यादिति । यथा प्रातर्विभिन्नाश्चरन्तः पशवः सायमैक्यं भजन्तीति । मतैक्यादिति । यथाऽद्य विवदमाना राजानः श्वऐक्यं गन्तार इति स्वरूपभेदे विद्यमानेपि स्थानमत्यैक्येनाभेदो व्यपदिश्यते । क्वचिच्छक्तेरिति । विशेषणानां विशिष्टान्नतिरेकादित्यर्थः । क्वचिच्च भगवदिति । अवताराणामवतारिस्वरूपत्वादित्यर्थः । चिन्मात्रैक्यवादे तु स्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

क्वचिच्च भगवदाविर्भावेषु प्रतीतेः स्वगतभेदं निवारयन्तीति सर्वमनवद्यम् ॥ २५ ॥

परे त्वेवं वाक्यार्थं वर्णयन्ति 'आत्मैवेदं सर्वम्' 'सर्वं खल्विदं ब्रह्म' 'नेह नानास्ति किञ्चने'त्याद्याः श्रुतयः सर्वेश्वरस्य ब्रह्मणः सर्वाभेदमाहुः, 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टं यदा पश्यति अन्यमीशम्' 'द्वा सुपर्णा सयुजा सखाया' 'कर्मक्षये याति स तत्त्वतोन्यः' 'निरञ्जनः परमं साम्यमुपैती'त्याद्यास्तु तस्य सर्वस्माद्भेदम् । द्विविधयोश्च तयोर्मिथोविरुद्धार्थतया प्रतीतावपि तयोरप्रामाण्यस्यान्याय्यत्वात् । द्वयोः प्रामाण्ये स-

---

ष्टिरुपदेशश्च चिन्मात्रादेकस्मान्न सम्भवतीति तन्मतं सुधीभिर्न श्रद्धेयम् ॥ २५ ॥

अथ विशिष्टाद्वैतवादं समर्थयति परे त्विति । परे श्रीवैष्णवाः । कर्मेति । स मुक्तो जीवः । याति ब्रह्म प्राप्नोति । तत्त्वतः स्वरूपतस्तदाप्यन्यो भिन्नः । अथाभेद एव भेद एव च निखिलाः श्रुतयो नाञ्जस्येनान्वयं भजेरन्नित्यतस्तासां द्विविधानां व्यवस्थायै भाव्यमित्याह द्विविधयोरिति । द्विविधयोरभेदभेदावेदिकयोः श्रुत्योर्मिथोविमर्दितार्थतया प्रतीतयोर्विषयभेदेन व्यवस्था वक्तव्येत्यन्वयः । कुतस्तयोर्व्यवस्था कार्येत्यत्र हेतुस्तयोरिति । अपौरुषेयवाक्यत्वाविशेषादिति भावः । न चाऽद्वैतं वा मृषाभूतमापाद्य तदेकतरश्रुतेरप्रामाण्यं वाच्यमित्याह द्वयो-

Digitization by Arya Samaj Charitable Foundation, Chennai

म्भवत्येकतराप्रामाण्यस्यापि तथात्वाद्विषयभेदेन न व्यवस्था तयोर्वक्तव्या। तथा हि सुबालोपनिषदि-'अन्तःशरीरे निहितो गुहायामज एको नित्य एती'त्यादौ 'यस्य पृथिवी शरीरं, यस्य तेजः शरीरं, यस्य वायुः शरीरं, यस्याकाशः शरीरं, यस्य मनः शरीरं, यस्य बुद्धिः शरीरं, यस्याहङ्कारः शरीरं, यस्य चित्तं शरीरं, यस्याव्यक्तं शरीरं, यस्याक्षरं शरीरं, यस्य मृत्युः शरीरमेष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण' इत्यभिधानादैक्यश्रुतीनां शरीरशरीरिभावेनाभेदो विषयेष्वेवं श्रुतीनां तु स्वरूपभेदः सः, इतरथा जीवगता दोषा ब्रह्मणि प्रसज्येरन्निति भेदाभेदश्रुत्योर्विषयभेद-

---

रित्यादि। अत्रापि तत्त्वाविशेषादिति बोध्यम्। तथात्वादित्यन्याय्यत्वादित्यर्थः। तथा च प्रामाण्यत्यागे नास्तिकतापत्तिरिति भावः। अन्तरिति। अव्यक्तं प्रधानम्। अक्षरं जीवः। मृत्युः कालः। शरीरशरीरिभावेनाभेद इति। यथा गवादिशब्दानां विशेषणभूतगोत्वादिवाचिनां गोत्वादिविशिष्टेषु गवादिषु पर्यवसानं दृष्टं तथा विशेषणभूतशरीरवाचिनां प्रकृतिजीवकालशब्दानां तत्तच्छरीरविशिष्टे नारायणे ब्रह्मणीति विशिष्टमेकं ब्रह्मेति निष्कर्षः। स्वरूपेति। विभुत्वाणुत्वादिभिर्नित्यैर्धर्मैर्जीवब्रह्मस्वरूपयोर्यो भेदः स द्वैतश्रुतीनां विषय इत्यर्थः। इतरथेति।

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रदर्शनान्मिथोविरुद्धार्थप्रतीतिर्निवर्तिता ॥ २६ ॥

चिज्जडयोर्भेदस्य चाऽभेदस्य च स्वाभाविकत्वे व्याघाताज्जडाभेदसाधकानां च पुंसां जाड्यापादकत्वेन स्वव्याघाताच्च जीवप्रधानब्रह्माभेदानुपपत्तेस्तेषां स्वरूपभेदः सिद्ध्यतीत्यस्मिन्नपि पक्षे जीवेशस्वरूपभेदपरमेव शास्त्रमिति विस्फुटम् ॥ २७ ॥

नवीनास्तु केचिन्मन्यन्ते कार्य्यकारणयोर्भेदाभ्यां तथा देहदेहिनोर्गुणगुणिनोर्जीवेशयोश्च स्वरितस्वरवत् । स्वरितस्य यथोदात्तत्वानुदात्तत्वाभ्यां द्विरूपत्वं

जीवब्रह्मणोः स्वरूपतोऽप्यभेदस्वीकारे सतीत्यर्थः ॥ २६ ॥

नन्वीशजीवप्रधानानां भेदाभेदावूरीकृत्य द्विविधयोः श्रुत्योरविरोधः कथं न समर्थ्यते तत्राह चिदिति । जीवादीनां त्रयाणामभेदानुपपत्तेस्तेषां स्वरूपभेदः सिद्ध्यतीत्यन्वयः । कुतस्तेषां त्रयाणामभेदानुपपत्तिरिति चेत्तत्राह चिज्जडयोरिति । भेदेनाभेदस्याभेदेन तु भेदस्य च व्याघातः, मिथोविमर्दित्वादित्यर्थः । ये पुरुषा जडेन प्रधानेन सार्धमात्मनामभेदं साधयन्ति तेषां चेतनत्वव्याघातान्न तत्साधकतेत्येवं जीवादीनां त्रयाणामभेदासिद्धेः स्वरूपतो भेदः सिद्ध इत्यर्थः ॥ २७ ॥

अथाधुनिकीं कल्पनां दूषयति नवीनास्त्विति । स्वकल्पनायां निर्मूलतादोषमपाचिकीर्षवो भेदवाक्यान्यभेदवाक्यानि च सङ्गमयन्तो भट्टभास्करादय इत्यर्थः । देहदेहिनो-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वरितत्वेन त्वैकरूप्यमिति । तथा हि कार्य्यकारणयोर्भेदे हि कपालादेर्गुरुत्वमेकं घटादेश्चैकमिति तुलारोपे द्विगुणं तत् स्यात् । अभेदे तु जलानयनादिकार्य्यापन्हवः कारकव्यापारवैयर्थ्यं च । तस्मात्तयोर्भेदाभेदौ स्याताम् । न च विरोधः, एकरूपेण विरोधेऽपि भिन्नरूपेणाऽविरोधात् । मृत्तिकात्वादिनाऽभेदः घटत्वकपालत्वादिना तु भेद इति । देहदेहिनोर्गुणगुणिनोश्च ब्रह्मत्वेनाऽभेदः, गौणत्वेन मुख्यत्वेन च भेदः । एवं जीवेशयोश्च । इत्थं च तत्तद्विषयकाणि वचांस्याञ्जस्यं भुञ्जीरन्निति । नैतच्चारु, यदि जीवेशयोः स्वरूपेणैवाभेदस्त-

---

रिति । भगवद्विग्रहस्य भगवता विग्रहिणा सह भेदाभेदाभ्यां भाव्यमित्यर्थः । एवमन्यच्च व्याख्येयम् । अभेदे त्विति । घटश्चेन्मृत्पिण्डात्मा तर्हि जलानयनादिकमपलपनीयम् । मृत्पिण्डश्चेद्घटात्मा तर्हि कारकव्यापारो व्यर्थः स्यादित्यर्थः । तस्मान्नास्त्यभेद इत्यर्थः । अन्यत्राप्येवमित्याह देहेति । विग्रहविग्रहिणोः सार्वज्ञ्यादितद्वतोश्च । ब्रह्मत्वेनेति । विज्ञानानन्दब्रह्मरूपत्वेनेत्यर्थः । गौणत्वेनेत्यादि । देहो गुणश्च गौणः । देही गुणी च मुख्य इत्यर्थः । इत्थं चेति । तद्विषयाणि भेदाभेदयोः प्रतिपादकानि । आञ्जस्यं मुख्यार्थताम् । भुञ्जीरन् भजेयुः । निराकरोति नैतदिति । जगत्कर्तृत्वादीत्यत्राप्यांशिकमिति बोध्यम् । तथा च बादरायणसिद्धान्तविरोधः । तत्सिद्धान्ते हीशस्य कदाचि-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्हीशस्याप्यांशिकं सुखदुःखभाक्त्वं जीवस्य च जगत्कर्तृत्वादि। यदि 'वाचं धेनु'मित्यादिवदारोपित एवासौ मतस्तदा नयान्तरताऽसिद्धिः। स्वरितस्य त्वर्द्धनारीश्वरादिवत् द्विरूपत्वान्न तत्र दृष्टान्तीभावः। जलानयनादिकार्यापह्नवादिभिः कार्य्यकारणाभेदवांस्तु न स्यात्। तदनन्यत्वाधिकरणे तद्भाष्ये चं तदर्थस्य समर्थितत्वादिति। तस्मात् कल्पनमात्रमिदम्॥ २८॥

यत्तु केचिदाहुः—एकमेव निर्धर्मकमिति परे वदन्ति भिन्नं धर्मीति त्वपरे। परं त्वत्रोभयत्रापि नोपयुक्तिं पश्या-

---

दपि न सुखदुःखभाक्त्वं जीवस्य मुक्तस्यापि न जगत्कर्तृत्वादीति सूत्रभाष्यादिषु द्रष्टव्यम्। यदीति। असावभेदः। नयान्तरेति। भेदाभेदमतासिद्धिः। शुद्धभेदकुक्षिप्रवेश इत्यर्थः। दृष्टान्तं दूषयति स्वरितस्येति। ह्रस्वस्वरित एकमात्रत्वादद्वैतभाक् दीर्घस्वरितो द्विमात्रत्वाद्द्वैतभागिति स न दृष्टान्तः। द्वैगुण्यं तूभयोरस्तु। तत्र भेदाभेदमते। जलानयनेति। उपादानोपादेययोर्भेदे पृथक् प्रतीतिः स्यात् सम्पृक्तत्वे परिमाणाधिक्यं स्यादतस्तयोरभेद एव। कारकव्यापारस्तु घटावस्थाभिव्यक्त्यर्थस्तदभिव्यक्तौ च जलानयनादि तेनैव सिद्ध्येदिति न तदपन्हव इति भाष्ये निरूपितं द्रष्टव्यम्॥ २८॥

यत्त्विति। केचित् स्वकल्पनाया निर्मूलत्वं दूषणमपनिनीष-

Digitization by Arya Samaj Charitable Foundation, Chennai

मः, भागतो वाक्यार्थकदर्थनात् । किन्त्वेकमेव तत् परमार्थतः सर्वाकारमित्येव सम्यक् । एतन्मते जीवेश्वरयोः स्वरूपैक्येऽपि व्यूहतद्वतोरिव वैलक्षण्यव्यवहारो नित्यस्तेन न क्वापि वाक्यव्याकोपः । नाप्यत्र सर्वथा धर्मव्यतिकरः क्वचिदैक्येऽपि सति तददर्शनात् । न हि घटकपालयोर्गुणगुणिनोश्च सत्यपि तस्मिंस्तमीक्षामहे । सगु-

---

वो विष्णुस्वाम्यनुयायिनंमन्या नवीना एवेत्यर्थः । परे शङ्कराचार्याः । अपरे मध्वाचार्याः । उभयत्र मतद्वयेपि । भागतो वाक्यार्थेति । परे भेदवाक्यार्थानन्यथयन्त्यपरे त्वभेदवाक्यार्थानित्यर्थः । भवता कथं वाक्यार्थो वर्ण्यत इति चेत्तत्राह–किं त्विति । परमार्थतो वस्तुतस्तद्ब्रह्म सर्वाकारमीशजीवप्रकृतिकालरूपं चतुर्दशभुवनात्मकं चेति निखिलः प्रपञ्चश्चिद्रूप एव । इह जडत्वभानं तु चिद्रूपत्वाज्ञानहेतुकं सुवर्णजलवद्ग्राह्यमित्यर्थः । व्यूहेति । यथा वासुदेवादेर्व्यूहस्य नारायणेन सार्धमभेदेपि परत्वव्यूहत्वाभ्यां वैलक्षण्यमस्ति तद्वज्जीवेशयोस्तन्मन्तव्यं न तु द्वैतमित्यर्थः । तेन न क्वापीति । द्वा सुपर्णेत्यादौ वैलक्षण्यमादाय द्वान्येत्यादिपदप्रयोग इत्यर्थः । नाप्यत्रेति । धर्माणां व्यतिकरः साङ्कर्य्यम् । सत्यपीति । अभेदे सत्यपि तं धर्मव्यतिकरं न पश्यामः । यथा घटत्वं न कपाले कपालत्वं च न घटे तथा जीवत्वं नेश्वरे ईश्वरत्वं च न जीवे इति न भक्तिसिद्धान्तहानिरिति भावः । सगुणेति । सगुणवाक्यं स्वरूपानुबन्धिगुणपरम्, निर्गुणवाक्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

णनिर्गुणवाक्ययोस्तु हिंसाहिंसावाक्यवद्विषयभेदेन व्यवस्थेति सर्वं निरवद्यमिति ॥ २९ ॥

तदेतदविचारिताभिधानं, दुःखभोगान्यथानुपपत्तेर्बाधकत्वात् । यदि जीवो नाम ब्रह्मैव स्यात्तर्हि दुःखभाक् न स्यात् । ननु जडप्रपञ्चस्य सत्यत्वे स्यादयं दोषः स तु नयान्तरवदिहापि मिथ्यैवेति चेन्न, वेदा-

---

तु प्रातीतिकमायिकगुणनिषेधपरम् । यथा हिंसावाक्यं यज्ञीयपशुहिंसापरम्, अहिंसावाक्यं तु यज्ञादन्यत्र पशुहिंसानिषेधपरं, तद्वत् ॥ २९ ॥

निराकरोति–तदेतदिति । दुःखभोगेति । जन्मजरामरणनरकानुभवो जीवस्य श्रूयते तस्येश्वराभेदे स नोपपद्यते तदनुपपत्त्या तस्य तदभेदो बाध्यत इत्यर्थः । ननु जडेति । यथा केवलाद्वैतिनां जडप्रपञ्चः स्वाप्निकरथाश्वादिवन्मृषैव तथास्माकमपीति जन्मजरादिदुःखानुभवस्य वस्तुतोऽसत्त्वात्तदनुभवान्यथानुपपत्त्या जीवस्येश्वराभेदो न शक्यो बाधितुमिति चेदित्यर्थः। परिहरति–नेति । जडप्रपञ्चस्य मिथ्यात्वे तत्प्रतिपादकस्य यतो वा इमानीत्यादिकस्य वेदस्य वन्ध्यासुतो भातीत्यादिवाक्यवन्निरर्थकत्वेनाप्रामाण्यादौद्धत्यापत्तेरित्यर्थः । किं चेति । ये भगवति कारुण्यपावनत्वादयो गुणास्तेषामभावः स्यात् । करुणा खलु स्वस्मादन्यं दीनं पतितं चोद्दिश्य प्रभोर्भवति न त्वात्मानमेव तादृशमुद्दिश्येति, तस्मात्तस्य कारुणि-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रामाण्यादिदोषापत्तेः । किञ्च कारुण्यादीनां चात्र दत्तोत्तरतापत्तिर्निरुद्देश्यत्वात् । तस्माद्वाक्यार्थावगाहनाशक्तैः कैश्चिन्मन्दमतिभिः कल्पितमिदं मतद्वयमतो यत्किञ्चिदेतत् ॥ ३० ॥

विद्यारूपं भूषणं मे प्रदाय
ख्यातिं निन्ये तेन यो मामुदारः ॥

कत्वादिवाक्यानि न सम्भवेयुरित्यर्थः । तस्मादिति । उभये ह्येते केवलाद्वैते सदोषत्वात् केवले द्वैते च निर्दोषेपि तद्वादिशिष्यतापत्तिलाञ्छनभयादरुचयः स्वातन्त्र्येच्छवः कौणिकाः सन्निहिताश्च तत्त्ववादिभिः स्वानीया (?) इत्युपेक्ष्या एव कुधियः ॥३०॥

एवं भाष्यपीठकं निर्माय भाष्यनिर्माणे भगवता कृतमनुग्रहं प्रकटयन्नन्ते तत्परमोत्कर्षाशंसनं मङ्गलमाचरति विद्येति । यः श्रीगोविन्दो मे मह्यं विद्यारूपं भूषणं प्रदाय तेन तद्रूपेण भूषणेन मां ख्यातिं प्रसिद्धिं निन्ये प्रापितवान् । नन्वेवं कुतः कृतवान् तत्राहोदार इति । उदारो दातृमहतोरित्यमरः। स जीयान्निजोत्कर्षं सर्वत्राविष्करोतु । कीदृशः? राधाबन्धुर्वार्षभानवीप्रियः। बन्धुराङ्गः कमनीयसर्वावयवः । स्वप्ननिर्दिष्टभाष्यः स्वप्ने त्रिर्निर्दिष्टं भाष्यं येन सः। अत्रेदं बोध्यम्–नन्दात्मजस्वयंभगवत्परतया ब्रह्मसूत्रार्थनिर्णयं परैः पृष्टो भाष्यकृततया तन्निर्णयस्यालब्धत्वादतिखिन्नो बभूव, तदतिखेदमसहिष्णुः स भगवान् श्यामसुन्दरः पीताम्बरो यज्ञोपवीती धृतोर्ध्वपुण्ड्रो धमिल्ली स्वापे त्रिरादिदे-

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीगोविन्दः स्वप्ननिर्दिष्टभाष्यो
राधाबन्धुर्बन्धुराङ्गः स जीयात् ॥ ३१ ॥
यद्ब्रह्मसूत्रेषु विभाति भाष्यं
कृष्णात्मकं व्यक्तनवप्रमेयम् ॥
तस्योपवेशाय सुवर्णपीठं
सिद्धान्तरत्नं न भवेत् किमेतत् ॥ ३२ ॥
सिद्धान्तरत्नकिरणात् किल भाष्यचन्द्रा—
दद्वैतशार्वरहरादमलप्रकाशात् ॥

श । प्रथमे कुर्विति, द्वितीये कुरु तव भविष्यतीति, तृतीये ब्रह्मसूत्राणि व्याचक्ष्व तद्भाष्यं ते संसेत्स्यतीत्येवं भाष्यसिद्धये यो मां त्रिर्निरुक्तवानिति । इदमप्रकाश्यमप्युक्तं स्वामिकृपाया गेयत्वात् स्वकर्तृताभ्रान्तेः परिहार्यत्वाच्च ॥ ३१ ॥

भाष्यं स्तुवन् पीठकस्य तत्पोषकतामाह—यदिति । कृष्ण आत्मा वर्ण्यो यत्र तत्, पक्षे कृष्णवत्पूज्यत्वं भाष्यस्योक्तम् । व्यक्तानि हरिपारतन्त्र्यादीनि नवैव प्रमेयाणि यत्रेति माध्वत्वं स्वस्योक्तम् । उपवेशाय सुखस्थितये । एतदुक्ताः श्रुतियुक्तीर्विना भाष्यस्यापोषात् । सुवर्णं कनकम् । पक्षे शोभनान्यक्षराणि सिद्धान्ता रत्नानि यत्र तत् । एतन्नामकं पीठमासनम् ॥ ३२ ॥

तच्च भाष्यं तत्त्वविवित्सूनां परमोपकारि । हरिगुरुभक्तिमद्भिश्च तैरधीतं सत्त्वानि प्रकाशयति न तु जीविकार्थकपाण्डि-

Digitization by Arya Samaj Charitable Foundation, Chennai

दृष्टं न किं किमिह तत्त्वमुदग्रधीभिः
श्रीमन्मुरारिचरणाम्बुजभक्तिभाग्भिः ॥ ३३ ॥
विजयन्ते श्रीराधादामोदरपादपङ्कजद्युतयः ॥
याभिः सकृदुदिताभिर्विनिर्मितो मे महान् मोदः॥ ३४॥

इति सिद्धान्तरत्नाख्यभाष्यपीठके अष्टमः पादः ।

त्यकामनयाऽधीतं सत्तथेति भावेनाह सिद्धान्तेति । सिद्धान्तरत्नं पीठकमेवामृतवर्षिणः किरणा यस्य तस्मात् । अद्वैतं निर्गुणचिदैक्यवादस्तदेव शार्वरं तिमिरं तद्धरात्तद्विनाशकात् । अमलो विशदः प्रकाशो वस्तुसाक्षात्कारलक्षणः प्रभामण्डलो यस्य । तस्मात् किं किं तत्तत्त्वं परेशस्वरूपं जीवस्वरूपं तद्धामतद्भक्तिस्वरूपं प्रकृत्यादिस्वरूपं वा न दृष्टमपि तु सर्वं तत्त्वं दृष्टमित्यर्थः । मुरारिर्नन्दसूनुः स्वयंभगवान् । पक्षे स्वपूर्वचतुर्थश्च ॥ ३३ ॥

अथ स्वमन्त्रदेशिकोत्कर्षं मङ्गलमन्ते प्रदर्शयति—विजयन्त इति । राधादामोदरः कान्यकुब्जविप्रवंशावतंसः स्वस्य मन्त्रोपदेष्टा महत्तमो विद्वदग्रणीस्तस्य पादपङ्कजद्युतयः महत्तमतां द्योतयितुम्। सकृदिति । मोदः परतत्त्वावगतिहेतुकः सत्सभानुकम्पाभाजनताहेतुको नृपेन्द्रसभाजनहेतुकश्च । पक्षे श्रीराधा च श्रीदामोदरश्च कृष्णः, तयोः पादपङ्कजद्युतयः । महान् मोदस्तदेकान्तिताहेतुकः ॥ ३४ ॥

इति श्री गोविन्दभाष्यपीठकटिप्पण्यामष्टमः पद्मपादो व्याख्यातः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Vidyavilas Press, Gopalmandir Lane, Benares City.

Digitization by Arya Samaj Charitable Foundation, Chennai

ERRATA

Page	Line	Read	For
12	15	वाक्यं च	वाक्य च
23	2	भेदप्रतिनिधिर्वि-शेषः	'भेदप्रतिनिधिवि-शेषः
87	14	स्वमूर्तिं	स्वमूर्ति
103	6	'माधुर्य्यम्	'माधूर्य्यम्
107	7	लोकं वैकुण्ठ'	लोकवैकुण्ठ'
108	21	मुण्डके	मुण्ढके
109	2	'त्यादिवपुषा	'त्यादिवषा
119	1	'तत्तल्लीला'	'तत्तलीला'
121	5	"कलामुहूर्त्तादि'	कलामुहूर्त्तादि'
127	11	विद्यते	विद्यतेः
128	16	वैष्णवाचार'	वैक्ष्यवाचार'
129, 131, 133, 137, 139, 141	—Head Line	तृतीयः पादः	द्वितीयः पादः
151	9	केशवानां	केशवाना
156	8	'त्यादिना	'त्यादीना
162	7	नन्विति	न त्विति
162	18-19	स्वेच्छयेति । आत्मेच्छया	स्वेच्छयेति आत्मेच्छया ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

INDEX.

अभेदवाक्य, the scriptural declaration of identity between Îśvara and Jīva, which are really different, explained in four ways, pp. 341–2; the same explained from the standpoint of Viśiṣṭādvaitavāda, pp. 342–4;

अंश, meaning of the term stated, p. 86.

अहमर्थ, described primarily as Pure Self, and not अनात्मा, pp. 305–317; persists in Mokṣa, p. 314; its secondary form identified with ahaṅkāra produced for mahat, pp. 312-3.

आनन्द, the existence of निर्विषयक आनन्द testified to by the evidence of pleasure in dreamless sleep, p. 49; due to sense-contact described as the reflection of Divine Joy, pp. 50–51; sense pleasure to be neglected, p. 51; universal striving for sense pleasure and indifference to Divine Joy explained, p. 51.

ऐक्यवाद, identity of all devas denied, pp 130-132; of the three Devas denied, pp 132–136; of Hari and Hara denied, pp. 136–140.

ईश्वर, His nature and functions, pp. 325–8.

कला, meaning of the term stated, p. 86.

चित्तशुद्धि, through Karma, p. 43; through Bhakti, p. 43.

जगत्, its character as तटस्थ लक्षण of Brahma, as the Māyāvādins assert, denied, p. 326 (com.); its reality, p. 326; its unreality refuted, pp 326–7.

जीव, its nature described, pp. 328–334; the different Advaita views regarding it stated and refuted, pp. 330–334; these views are—

Jiva=

(i) Brahma as associated with an Upādhi, viz. the atomic inner organ;

Digitization by Arya Samaj Charitable Foundation, Chennai

(ii) Brahma in Essence conditioned by an Upādhi.
(iii) Upādhi i. e. Inner Organ as presided over by Brahma.
(iv) Brahma subject to Nescience.
(v) Reflection of Brahma in an Upādhi.
Its characters,—atomic, p. 328; multiple in number, p. 329; its essence is rational, p. 329; its quality is eternal consciousness, pp. 329–330; inferior to God in Essence and Power, p. 330; its obscuration by Māyā due to its recoil (वैमुख्य) from God of whom it is a part, p. 334; its liberation from Māyā due to its facing (साम्मुख्य) the Lord, pp. 334–5.

तर्क, its value to a seeker after God, stated, pp. 14–15.

पुरुषार्थ, its nature, positive and negative, p. 4; means to its realisation, stated, pp. 4–9—(i) according to Kapila, pp. 4–5; (ii) accoding to Patañjali, p. 5; (iii) according to Kaṇāda, p. 6; (iv) according to Gotama, pp. 6-7; (v) according to Jaimini, p. 7; and (vi) according to Bādarāyaṇa, pp. 7–9.

भक्ति, as a kind of Jñāna, and hence Vidyā, p. 29; its exact nature described, p. 30; as an inseparable quality in God & as a separable quality in the Bhakta, p. 39; though of the nature of Bliss, appears as Action during Saṁsāra, how and why, p. 42; an End in itself. p. 42; embracing its object (i.e. God), p. 43; to be distinguished in fruit from Jñāna, p. 42; its appreciation by the Siddhas, explained, pp. 42–43; obtained through the Grace of Bhaktas, pp. 43, 47; its freedom from desire explained, p. 47; twofold, viz. (i) Vidhibhakti, pp. 81–82, and (ii) Ruchi-

Digitization by Arya Samaj Charitable Foundation, Chennai

bhakti, pp. 82–83; two-fold, viz. (i) Sādhana° and (ii) Sādhya°, p. 124.

भगवान्, His Grace does not accrue to a Jīva intent on contemplation of pure 'त्वं'—पदार्थ, p. 30; it descends on him who contemplates on pure 'तत्' पदार्थ in the shape of Sālokya & the other forms of Mukti, pp. 30–31; His subjection to a pure Bhakta free from desire and personal taint, pp. 31–32; His Person and Qualities not different from His Essence, pp, 23–26; but the भेदव्यवहार explained through "Viśeṣa" p. 26; knowledge of Him as possessed of विग्रह, गुण, लीला, etc. enables the Jīva to have Absolute Joy and Freedom from Pain, pp. 8-9, 27-28.

भट्टभास्कर, his synthesis of the dualistic & monistic declarations in the scriptures stated and repudiated, pp. 344-6.

रस, identified with the Divine Essence as qualified by Eternal Līlā, p. 15.

राधा, described as Love embodied consisting in the Essence of Hlādinī and Saṃvit combined, pp. 96–99; the view that a certain dancing girl became Rādhā, refuted, pp. 99–100; her perfection, pp. 100–101.

लीला, two fold-(i) eternal (when performed through Prakṛti and Kāla) pp. 122-123; its eternity explained, pp. 105–106, 111–122.

लक्षण—

(a) स्वरूप, defined, p. 326 (Com.)
(b) तटस्थ, defined, p. 326 (Com.)

विलास, meaning of the term stated, pp. 86, 124.

Digitization by Arya Samaj Charitable Foundation, Chennai

विशेष, why admitted and where, p. 19; its nature, what, p. 19; necessary even for the Monist, p 19; identified with **स्वभाव**, p. 20.

विष्णु, identified with Supreme God and held superior to the devas, pp 126-129; Himself the author of creation and destruction, while Brahmā and Rudra, His servants, are only the nimittas, p. 142.

विष्णुस्वामी, the view of his alleged followers (Vallabhīyas) in regard to the inter-relation of the dualistic and monistic statements in the scriptures, stated and refuted, pp. 346-349.

वैकुण्ठधाम, identified with **स्वमहिमा**, **संव्योम**, **परव्योम**, etc. and described, pp. 105-111.

शक्ति, must be admitted in Brahma, p. 300; its reality & infinity asserted, pp. 300-301.

शास्त्र, aims at difference between Īśvara and Jīva, p.341.

सत्संग, destructive of the Jīva's forgetfulness (**वैमुख्य**) of God (which is beginningless) and productive of His **सांमुख्य**, pp. 335-6.

सन्धिनी, explained, p. 39.

संवित्, explained, pp. 39-40.

साक्षी, its meaning stated, p.312; described as **अहमर्थ**, p.313.

साम्यवाद, equality of the three gods denied, pp.140-142.

स्वयं भगवान्, meaning of the term, stated, p. 86; identified with Kṛṣṇa, pp. 86, 124.

ह्लादिनी, explained, p. 40.

Digitization by Arya Samaj Charitable Foundation, Chennai

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvālī Bhāskara, a Commentary on Udayana's Kiraṇāvali, Dravya section, by Padmanābha Miśra.
Ed.with Introduction and Index by Gopināth Kavirāj,M.A. Rs. 1-12

No. 2—The Advaita Chintāmaṇi, by Raṅgoji Bhaṭṭa, Ed. with Introduction etc. by Nārâyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-12

No. 3—The Vedānta Kalpalatikā,by Madhusūdana Sarasvatī.
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1-12

No. 4—The Kusumāñjali Bodhanī, a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj,M.A,Rs. 2-0

No. 5—The Rasasāra, a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhatta Vādīndra.
Ed. with Introduction etc.by Gopīnath Kaviraj, M.A. Rs. 1-4

No. 6—(Pārt I)-The Bhāvanā Viveka by Maṇḍana Miśra,with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-12

No. 6-(Part II)—Ditto Ditto Rs. 0-12

No. 7-(Part I)-Yoginīhṛdaya dīpikā, by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed.with Introduction etc.by Gopīnath Kaviraj, M.A. Rs. 1-4

No 7—(Part II) Ditto Rs. 1-8

No. 8—The Kāvyaḍākinī, by Gaṅgānanda Kavīndra.
Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya, Rs. 0-10-6

No. 9—(Part 1)-The Bhakti Chandrikā,a Commentary on Sāṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed.with a PrefatoryNote by Gopināth Kavirāj,M.A. Rs. 0-15

Digitization by Arya Samaj Charitable Foundation, Chennai

No. 10-(Part I)-The Siddhāntaratna, by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10-(Part-II)-The Siddhāntaratna by Baladeva Vidyābhūṣaṇa.
Ed. with Introduction by Gopinath Kaviraj, M. A.

No. 11-The S'rī Vidyā Ratna Sūtras, by Gauḍapāda, with a Commentary by Saṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhasiddhānta Saṅgraha, by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14-The Triveṇikā, by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15-(Part 1)-The Tripurārahasya. (Jñāna Khaṇḍa)
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-14

No. 15-(Part-II)-The Tripurārahasya (Jñānakhaṇḍa) Ed. by Gopinath Kaviraj, M. A.

No. 16-The Kāvya Vilāsa, by Chiraṅjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1-2

No. 17-The Nyāya Kalikā, by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-14

No. 18-(Part I)-The Gorakṣa siddhānta Saṅgraha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A. Rs, 0-14

No. 19-(Part. I)-The Prākṛita Prakāśa by Vararuchi with the Prākṛita Saṅjivani by Vasantarāja and the Subodhini by Sadānanda.
Ed. with Introduction etc. by Batuk Nath Sharma, M. A. and Baladeva Upādhyāya, M. A.

Digitization by Arya Samaj Charitable Foundation, Chennai

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its evolution, by Gaṅgānātha Jhā.

(b) The View point of Nyāya Vaiśeṣika Philosophy, by Gopi nath Kaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 5

Vol. II—

(a) Paraśurāma Miśra ALIAS Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) Studies in Hindu Law (2):—its sources, by Gaṅgānāth Jha.

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f) Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Batuka nātha Sarmā.

(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj

(j) Nyāya Kusumāñjali (English Translation), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇā S'āstri Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the late Col. G.A.Jacob.

(b) Studies in Hindu Law (3) Judicial Procedure: by Gaṅgā nātha Jha.

(c) Theism Ancient India, by Gopinath Kaviraj.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭāchārya.

(f) Indian Dramaturgy, by P. N, Pātankar. Rs. 5

Digitization by Arya Samaj Charitable Foundation, Chennai

Vol. IV—

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgānātha Jhā.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the Ṛgveda Prātiśākhya, by Maṅgala Deva Sāstrī.

(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Rāmāyanic Age, by Manmatha nātha Roy

(f) Satkāryavāda: Causality in Sāṅkhya, by Gopinath Kaviraj,

(g) Discipline by Consequences, by G. L. Sinha.

(h) History of the origin and expansion of the Aryans by A. C. Ganguly.

(i) Punishments in Ancient Indian Schools by G.L. Sinha. Rs. 5

Vol. V.—(In progress)

To be had of
The Suprentendent, Government Press,
ALLAHABAD, U. P. (India)

Bharatiya Vidya Bhawan's Sri Sankaracharya Mandir Vidyalaya
289

Digitization by Arya Samaj Charitable Foundation, Chennai

Bhavan's Sri Sankaracharya Sansk
Vidya Vidya

Digitization by Arya Samaj Charitable Foundation, Chennai

DATE DUE

Class No. _____ **Book No.** _____

Accession No. 1103

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai